विद्वन्मूर्धन्यश्रीगोकुलनाथात्मजेन गोस्वामिदीक्षितेन प्रणीतो

लघुव्याख्याग्रन्थसमुच्चयः

प्रश्नोत्तरसाहस्रीपर्यालोचन-

लेखचतुष्टयाभ्यां च समेतः

श्रीमदिन्दिराकान्तचरणान्तेवासिभिः

नारायण राम आचार्य काव्यतीर्थ

इत्येतैः संशोधितः

मुद्रणस्थलम्—निर्णयसागरप्रेस, मुंबई.

विक्रम संवत् २०१६

मुद्रक :—
लक्ष्मीबाई नारायण चौधरी,
निर्णयसागर प्रेस,
२६-२८ कोलभाट स्ट्रीट, बम्बई २

प्रकाशक :—
गोस्वामि दीक्षितजी महाराज,
बडा मंदिर, ३ रा भोईवाडा,
भूलेश्वर, बम्बई २

विद्वद्रत्न श्रीयुत नवजीवनरस्तोगी एम.ए. महाशयाय सस्नेहमुपायनीक्रियते। गो. दीक्षितः
ई. १९६४ फा. शु. १४। शनिवार। ५-३-६३

ब्रह्मवादः

श्रीब्रह्मसूत्रद्वितीयाध्यायप्रथमपादे 'स्वपक्षदोषाच्च' इति सूत्रे श्रीमत्शंकराचार्याणाम् वचनम्–'परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः' एतत्वचनावलोकनेनैव मनसि विचारः संवृत्तः यत् श्रीशंकराचार्यास्तु ब्रह्मनिर्विशेषं निर्धर्मकमिति प्रतिपादयन्ति, जगत्कारणत्वं तु मायाया एव। शबलकारणवादोऽपि प्रकृतिकारणवादपर्यवसन्न एव। ब्रह्मणि कारणत्वादिधर्मसत्त्वैव नास्ति, तत्तु अपास्तसमस्तविशेषरूपम्। जगद् विवर्ताधिष्ठानमात्रं विवर्तोपादानमेव तत्। परिणाम्युपादानरूपा निमित्तरूपा तु मायैव। कर्तृत्वधर्मस्य क्रियाकारकभेदसापेक्षतया भ्रान्तप्रत्ययरूपत्वमेव, एवम् विमर्शसरणिरद्वैतिनामवलोक्यते किमस्य वादस्य ब्रह्मवादत्वम् वक्तुम् शक्यं ? । किन्त्वेतन्निर्णयस्य ब्रह्मवादशब्दार्थनिर्णयपरतन्त्रतया प्रथमं ब्रह्मवादशब्दार्थ एव निर्णेयः। ब्रह्मणोऽधिष्ठानमात्रत्वम् मायैव विश्वनिर्माणकर्त्री, प्रपञ्चस्य तु विवर्तरूपत्वम् किमस्य वादस्य ब्रह्मवादत्वम्, अथवा ब्रह्मनिमित्तकारणतावादस्य ब्रह्मवादत्वम्, यद्वा अभिन्ननिमित्तोपादानकारणं ब्रह्म इति वादस्य ब्रह्मवादत्वम्, निर्दिष्टविकल्पोत्तरदानतः प्राक् अत्र किंचित् ऐतिह्यालोचनमपि आवश्यकम्। तत्र प्रकृतिवाद–परमाणुवाद–ब्रह्मवाद–परिणामवाद–विवर्तवादादीनाम् विकासक्रमोऽप्यवलोकनीयः। क्रमशः श्रीवेदव्यासाविर्भावानन्तरं ब्रह्मवादस्य व्यक्तप्राकट्यक्रमोऽप्यालोचनीयः सूक्ष्मतया। एतत् सर्वमपि आलोच्य ब्रह्मवादप्राकट्यकालसामयिकदार्शनिकवातावरणमध्ये श्रीवेदव्यासद्वाराविर्भूतस्य ब्रह्मवादस्य वस्तुतः किंशब्दार्थस्वारस्यमिति निश्चिनुमः। प्रथमतस्तावत् सुखदुःखमोहान्वितत्वम् जगतो दृष्ट्वा त्रिगुणपरिणामभूतम् जगत् इत्येषा कल्पना महर्षिकपिलहृदये आविर्भूता। किन्तु प्रकृतिपरिणामवादः तार्किकहृदयसिंहासनमधिरोढुं नार्हतीति महर्षिगौतमद्वारा परमाणुवादप्रवर्तनमारब्धम्। अनेकचेतननियन्त्रिततायास्तु अकिंचित्करत्वम्, अनियन्त्रितायाः प्रकृतेः कथं व्यवस्थितपरिणतिः जडत्वात् इत्याद्यनेकप्रश्नोद्भवोऽत्र भवति। तदर्थम् एकचेतननियन्त्रितताङ्गीकारो न्यायदर्शने ईश्वरस्वीकारेण कृतः। ईश्वरनियन्त्रितपरमाणुद्वारा विश्वमारब्धम् इति तत्र प्रतिपादितम्, जडपदार्थस्य चेतनसम्बन्धविरहेण किंवा तन्नियन्त्रणविरहेण व्यवस्थितपरिणतिरेव भवितुम् नार्हति, अनेकचेतनसम्बन्धस्य तु व्यवस्थाविप्लवसहायकत्वमेव इति पूर्वोक्तयुक्तिद्वयेनैव परिणामवादासङ्गतिम् प्रदर्श्य आरम्भवादसमर्थनम् काणादाक्षपादीयैरारब्धम्। ईश्वरस्वीकारो नैयायिकवैशेषिकैः कृतो योगदर्शनेऽपि कृतः। किन्त्वेतदभ्युपगमबीजभूतहेतुकलापसूक्ष्मनिरीक्षणेन उभयोः पार्थक्यमनुभवपथमायाति। न्यायमते वैशेषिकमते च ईश्वरस्य जगत्कर्तृत्वेन निमित्तकारणत्वेन प्रतिपादनमभीष्टम्। किन्तु योगमते तु ईश्वरस्वरूपस्य आदिगुरुत्वेन आदिसंकेतप्रवर्तकत्वेन जगन्नियन्तृत्वेन शास्त्रप्रकाशकत्वादिरूपेण प्रसिद्धिः। एवम् मतत्रयस्य सेश्वरदर्शने समावेशः। न्यायस्तु परिणामवादस्य तर्कानुपपन्नत्वम् प्रदर्श्य आरम्भ-न-

वादस्य तर्कसङ्गतत्वं साधयत् स्वोक्ततर्कदार्ढ्यार्थम् ईश्वरमभ्युपगच्छति । योगदर्शनं तु साधकस्य निरवलम्बनत्वपरिहृतये, समाधौ अलौकिकसौन्दर्यनिर्मित्यर्थम् परमकारुणिकस्य निग्रहानुग्रहसमर्थस्य साधकसम्बन्धावश्यकता अस्त्येव, अन्यथा तु समाधेः काठिन्यम्, एवं रीत्या ईश्वरमुपोद्बलयति ॥

अत एव योगमते क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इति ईश्वरशब्दव्याख्यापि निरतिशयचातुर्येणोपस्थापिता । कर्तृत्वचर्चया ईश्वरशब्दव्याख्यायाः पार्थक्यम् बुद्धिपूर्वकमेवापादितम् ॥ द्वितीयव्याख्यापि स हि सर्वेषां गुरुरित्येवमुक्ता, सापि कर्तृत्वासम्बद्धैव। नैयायिकशिरोमणिभूताः श्रीजयन्तभट्टास्तु न्यायमञ्जर्यां सुरुचिरप्रक्रियया आरम्भवादं समर्थयन्त ईश्वरं साधयन्ति निक्षिपन्ति च ईश्वरापह्नोतुः वक्षसि स्ववामपादम् । तद्यथा मञ्जर्याम् 'त इमे परमाणवो चेतनमन्तरेण विशिष्टक्रमकमितरेतरसंघटनमलभमानाः कार्यसिद्धये न पर्याप्नुयुः, अचेतनत्वादिति चेतन एषां अधिष्ठाता सकलभुवननिर्माणमतिरीश्वरोऽभ्युपगतः । तत्सिद्धये च सकलकुतर्कतिमिरतिरस्कारपूर्वकम् पूर्वमेव निरवद्यमनुमानमुपपादितम् ॥ एतासां एव पंक्तीनां हार्दतात्पर्यम् [illegible] अस्माभिर्निरूपितम् । प्रशस्तपादभाष्यारम्भे 'प्रणम्य हेतुमीश्वरं' इति पद्यमपि ईश्वरस्य जगत्कर्तृत्वम् प्रत्याययत्येव । उदाहृतोद्धरणद्वयेनैव नैयायिका वैशेषिकाश्च कथम् ईश्वरम् अङ्गीकुर्वन्तीति स्फुटं भवति । 'ईश्वरः कारणम्, पुरुषकर्माफल्यदर्शनात्' इति सूत्रेऽपि ईश्वरशब्दकारणशब्दसमभिव्याहारोऽप्यभिसन्धिपूर्वक एव । अत्र कारणशब्देन निमित्तकारणत्वरूपकर्तृत्वस्यैव सूचनं भवति । अत्र वार्तिककाराणाम् वार्तिकतात्पर्यकाराणां च महानेव विवादोऽस्ति । वार्तिककारास्तु अत्र कारणशब्दस्य निमित्तकारणरूपो जगत्कर्ता इति अर्थम् कुर्वन्त इदम् सूत्रम् सिद्धान्तपक्षप्रतिपादकम् मन्यन्ते । तात्पर्यकारास्तु अस्य सूत्रस्य पूर्वपक्षप्रतिपादकत्वम् मन्यमानाः कारणशब्दम् उपादानार्थकम् वदन्ति । अस्मिन् सूत्रे ब्रह्म उपादानमिति पूर्वपक्षाशयं निरूपयन्तः 'तत्कारितत्वात्'इति सूत्रे सिद्धान्तसम्मतां निमित्तकारणतां समर्थयन्ति । अत्र 'प्रावादुकानां दृष्टयः प्रदर्श्यन्ते' इति पंक्तिं मुख्यतः सहायीकृत्य तात्पर्यकारा वाचस्पतिमिश्राः वार्तिककारतो भिन्नरीत्या व्याख्यानम् कुर्वन्ति–'किन्तु आप्तकल्पश्चायम् यथा पिताऽपत्यानाम् तथा पितृभूत ईश्वरो भूतानाम्' एषा भाष्यपंक्तिर्वार्तिकव्याख्यानपक्षपातित्वं स्वस्या अभिव्यनक्ति । अत एव अत्र कानिचित् दर्शनानि प्रतिषिध्यन्ते, कानिचित् अभ्युपगम्यन्ते इति निर्णयम् स्वव्याख्यानयुक्तत्वस्थापकरूपेण वार्तिककाराः संस्थापयन्ति ।

अत्र वार्तिककारश्रीउद्द्योतकराचार्यव्याख्यानमेव उचितमिति प्रतीयते । अन्यथा सूत्रकारमुखेन कर्तृत्वचर्चैव नैयायिकैः नोपलभ्येत । अत्र यत् विश्रुतयशःपटहपरिपूरितदिगन्तरैः महामहोपाध्यायपदभाग्भिः विद्वद्वरेण्यैः डॉ. श्रीगङ्गानाथझाशर्मभिः खद्योतकारैः खद्योतटीकायामुक्तम्–'अत्र प्रसङ्गे ईश्वरस्य निमित्तकारणत्वं प्राचीनतमन्यायाचार्याणाम् अभिमतम् न वा' इत्येतदपि विचारमर्हति । तृतीयाध्यायद्वितीयाह्निकगत ६६ तमसूत्रवार्तिके सर्गादेरनभ्युपगमात् इत्युक्तम् तदेव पुनरत्रत्य २१ सूत्रवार्तिके । एवम् सर्गा-

देरनभ्युपगमात् सर्गस्य निमित्तकारणस्य क्वोपयोगः? । तथा च 'ईश्वरः केवलम् नियन्ता' इति न्यायमतम् प्रतिभाति । भाष्यकारोऽप्यग्रे–'ईश्वरो द्रष्टा बोद्धा सर्वज्ञाता' इत्येवोक्तवान्, न पुनः कर्ता स्रष्टा वेति । खद्योतोक्तिरियं प्रमाणविरहिणी हेत्वाभासयुक्ता निर्मूला इति तु वक्तुम् न शक्नुमः; किन्तु अवश्यमेव चिन्त्या इति तु वदामः । ईश्वरकर्तृकत्वस्य न्यायदर्शनप्राणभूतत्वात् वार्तिककारीयमेव व्याख्यानमत्र प्रधानतयोपन्यस्यते । न्यायदर्शनप्राणभूतस्य ईश्वरकर्तृकत्वस्य प्रावादुकदृष्ट्यभिधानासंभवात् ॥

एतत् पंक्तिद्वयेन खद्योतकाराः स्वयमपि 'ईश्वरो जगत्कर्ता' इति सिद्धान्तं न्यायदर्शनप्राणरूपत्वेन स्वीकुर्वन्तीति स्पष्टम् । न्यायदर्शनप्राणरूपस्य सिद्धान्तस्य सर्वथा सूत्रभाष्यानुक्तत्वसाधनम् प्राणरूपत्वस्थापनं च उभयं तु नोचितम् परस्परविरुद्धमपि । यदि दर्शनप्राणरूपस्य सिद्धान्तस्यैव सूत्रभाष्यासम्मतत्वम् तर्हि तस्य कथम् प्राणरूपत्वमिति तु बुद्ध्यगम्यम् ॥ यत्सिद्धान्तमूलत्वेन दर्शनप्रवर्तकवचनानुलब्धिः तत्सिद्धान्तस्य तस्मिन्नेव दर्शने प्राणरूपत्वम् एतदपेक्षया का वा अधिकतया कस्यापि दर्शनशास्त्रस्य स्वरूपप्रच्युतिः कल्प्या । श्रीउदयनाचार्याः श्रीजयन्तभट्टाः श्रीवर्धमानमिश्राः श्रीश्रीधराचार्याः श्रीवल्लभाचार्याः (न्यायलीलावतीकाराः) श्रीशंकरमिश्रादयः सर्वेऽपि आन्वीक्षिकीविद्विद्वद्शिरोरत्नभूतास्तार्किकचूडामणयो विद्वांस एकहृदयेन न्यायदर्शनसिद्धान्तरूपत्वेन 'ईश्वरो जगत्कर्ता' इति सिद्धान्तमभ्युपगच्छन्ति । तेषां सर्वेषामपि अभ्युपगमः सूत्रकारभाष्यकाररूपमुख्यप्रवर्तकोक्तिमूलविरहित इति कथनं तु न विद्वन्मनोरमम् ॥ यद्युच्येत मुक्तावल्यादिषु सप्तपदार्थवादः यथा वैशेषिकेभ्यः परिगृहीतो न तु तस्य प्राचीननैयायिकसिद्धान्तत्वं, तथैवायं कर्तृत्ववादोऽपि वैशेषिकेभ्यः प्राप्तः नैयायिकैः, एतत् कथनमपि चिन्त्यम् । मुक्तावल्यादिचिन्तामण्यनन्तरभाविग्रन्थसरणिः मञ्जर्यादिप्राचीनग्रन्थसरणितः भिन्नैव । मुक्तावल्यादिग्रन्थेषु न्यायवैशेषिकमिश्रसिद्धान्तप्रतिपादनम् उपलभ्यते, मञ्जर्यादिषु तु केवलन्यायसिद्धान्तप्रतिपादनम् । मञ्जर्यादिषु लेशतः अपि नान्यसिद्धान्तमिश्रणं जातम् । एभिर्ग्रन्थकारैः वैशेषिकेभ्यः अयं सिद्धान्तो गृहीतः इत्युक्तिस्तु हृदये न प्रविशति ।

जैनबौद्धादिग्रन्थेष्वपि ईश्वरकर्तृत्वसिद्धान्तो न्यायदर्शनसिद्धान्तत्वेनोक्तः इत्यतोऽपि खद्योतकारोक्तिः चिन्त्यैव । एतेन योगदर्शने न्यायदर्शने च भिन्नाभिसन्धिपूर्वकं ईश्वरस्वीकार इति सुव्यक्तम् सिद्धम् ॥ एतावता परिणामवादानन्तरम् परमाणुवादस्य कथं विकास इति ज्ञापितम् । किन्तु परमाणुवादेनापि ऋषिसमुदायहृदयतुष्टिर्नाभूत् । 'ऋषयस्तु मन्त्रद्रष्टारः' इति वेदार्थविचारकत्वम् तेषां विवादरहितम् । वैदिकदर्शनविरुद्धाक्षरस्वीकारोऽपि तेषां नेष्टः, एवंविधायां परिस्थितौ परमाणुवादस्य हृदयाधिरूढत्वं कथम् भवितुमर्हति? । अत एव श्रीशंकराचार्याणाम् ब्रह्मसूत्रभाष्ये उक्ता इमाः पंक्तयः– 'प्रधानकारणवादः कैश्चित् मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवनाभिप्रायेण उपनिबद्धः । अयं तु परमाणुवादो न कैश्चिदपि शिष्टैः केनचित् अपि अंशेन परिगृहीत इति अत्यन्तमेवानादरणीयो वेदवादिभिः ।' 'तदेवमसारतरतर्कसंदृब्धत्वात्

ईश्वरकारणश्रुतिविरुद्धत्वात् श्रुतिप्रवणैश्च शिष्टैः मन्वादिभिः अपरिगृहीतत्वात् अत्यन्तमेवानपेक्षास्मिन् परमाणुवादे कार्या श्रेयोर्थिभिः इति वाक्यशेषः।' (शां. भा. २.२.३.१७)

वैशेषिकसिद्धान्तो दुर्युक्तियोगाद् वेदविरोधात् शिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तम्–तत् तत् सामयिकपरिस्थित्यवगमार्थम् पर्याप्तम्। पंक्तिभिरेताभिः परमाणुवादेन ऋषिहृदयपरितोषः कथम् नाभवत् इत्यपि ज्ञातुम् सहजम्। औडुलोमिअसितदेवलनारदकाशकृत्स्नादयः वैदिकविचारपरम्पराप्रवर्तकाः एतद्वादालोचनायां एव प्रसक्ता आसन्, तदानीमेव महर्षिः ज्ञानावतारः भगवान् वेदव्यासः अवततार। भगवता बादरायणेन श्रीब्रह्मसूत्रश्रीभागवतश्रीमहाभारतादिग्रन्थान् विरचय्य वैदिकोपनिषद्दर्शनस्य पुनरुद्धारः कृतः। ब्रह्म एव जगदभिन्ननिमित्तोपादानकारणमिति सिद्धान्तस्योद्घोषः कृतः।

'ब्रह्मभिन्नपरमाण्वारब्धम्' जगत् इति सिद्धान्तस्वीकारे तु अनेकश्रुतिवचनविरोधः प्रत्यक्षः सञ्जायते। तथा अनेकश्रुतिमुख्यार्थबाधेन गौणी लक्षणा वा आश्रियते। उदाहरणरूपेण 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति' इयं श्रुतिः जगदुत्पत्तिस्थितिलयाः ब्रह्मण्येव भवन्तीति कथयति। अत्र लयोऽपि सुस्पष्टम् ब्रह्मणि प्रदर्शितः। कार्यविलय उपादान एव भवति, न तु निमित्ते। घटलयो मृत्तिकायामेव दृष्टः, न सर्वथा कुम्भकारे॥ यदि ब्रह्मणः निमित्तकारणतैवाभ्युपेयते न कथंचिदपि जगद्विलयो ब्रह्मणि भवितुमर्हति, विलयानुपपत्तौ तु अस्याः श्रुतेः 'तज्जलान्' इति श्रुतेश्च विरोध एव भवति। अत्र भवति च–लयप्रतिपादकभागस्य गौणार्थत्वाश्रयणम्। मुख्यार्थस्यापि बाध एव। एतत्तु वैदिकऋषीणाम् असह्यम् मुख्यार्थबाधः किमर्थम् करणीयः। प्रत्यक्षविरोधेन तर्कविरोधेन शब्दविरोधेन वा मुख्यार्थो बाध्यते। एतेषु विरोधेषु विरोधद्वयस्य तु अनवसरपराहततैव॥ शब्दैकसमधिगम्यत्वादस्य विषयस्य। 'योनिश्च हि गीयते' तथा 'एतेन शिष्टापरिग्रहा अपि व्याख्याताः' इत्यनयोः सूत्रयोर्भाष्ये श्रीभगवत्पादोक्तयस्त्वत्र विशेषोपयोगिन्यः। ता यथा–'नलोकवदिह भवितव्यम्। न ह्ययमनुमानगम्योऽर्थः शब्दगम्यत्वात्त्वस्यार्थस्य यथाशब्दमिह भवितव्यम्। शब्दश्च ईक्षितुः ईश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम। एतेन प्रकृतेन प्रधानकारणवादनिराकरणकारणेन शिष्टैः मनुव्यासादिभिः केनचित् अंशेन अपरिगृहीताः ये अण्वादिकारणवादास्तेऽपि प्रसिद्धतया व्याख्याता निराकृता द्रष्टव्याः। तुल्यत्वान्निराकरणकारणस्य नात्रपुनराशंकितव्यम् किंचिदस्ति। तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्याप्रतिष्ठितत्वम्, अन्यथा अनुमानेऽप्यविमोक्षः आगमविरोधश्च इत्येवंजातीयकम् निराकरणकारणम्'॥

उपन्यस्तवचनैः सिद्धमेतत् श्रीमत्शंकराचार्यावतारसमयपर्यन्तम् वैदिकऋषिपरम्परा ब्रह्मजगत्कारणता केवलवेदप्रमाणगम्येति सिद्धान्तयन्ती आसीत्। केवलवेदशब्दप्रमाणकप्रमेयप्रतिपादकवेदभागे [श्रुतिवाक्येषु] गौण्या लक्षणाया वा आश्रयणम् तेषां सर्वथानिष्टमासीत्। एतत् साक्षित्वेन 'तन्निष्ठस्य मोक्षोपदेशात्' इति सूत्रभाष्यस्थानि श्रीशंकरभगवत्पादवचनान्येवोद्ध्रियन्ते। अपि च क्वचित् गौणः शब्दो दृष्टः

नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या, सर्वत्र अनाश्वासप्रसङ्गात् ॥ उदाहृतैः श्रीशंकराचार्यवचनैः व्यासाविर्भावसामयिकऋषीणां का विचारधारासीत् इति विद्वद्भिः सरलतया ज्ञातुम् शक्यम् ॥ यदि श्रीशंकराचार्यसामयिकऋषिसमुदायस्यापि मुख्यार्थबाधः अनिष्ट आसीत् । तदा व्यासाविर्भावसामयिकऋषिसमुदायः "यत्प्रयन्ति", 'तज्जलान्' इत्यादिवाक्यानां मुख्यार्थबाधम् कृत्वा ब्रह्मनिमित्तकारणमेव इति सिद्धान्तस्वीकारे कथम् सज्जः भवेत् ? । एतेषामेव हृदयार्तिम् परिमृश्य करुणामयमहर्षिद्वैपायनेन औपनिष-द्ब्रह्मवादस्थापनमेव मुख्यध्येयत्वेन परिस्थाप्य ब्रह्मसूत्ररचना कृता । अभिन्ननिमित्तोपादानकारणं ब्रह्म इति सिद्धान्तम् 'तद्भूतयोनिम् परिपश्यन्ति धीराः' 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्' इत्यादिश्रुत्यन्तर्गतयोनिशब्दमुख्यार्थरक्षणार्थम् लयप्रतिपादकश्रुतिवाक्य-मुख्यार्थसंरक्षणार्थम् च ब्रह्मवादे स्थापितम् ॥ एतेनैव छान्दोग्यस्थएकविज्ञानेन सर्वविज्ञानप्रतिपादकप्रतिज्ञानिरूपकवचनानाम् मृदादिदृष्टान्तनिरूपकवचनानां च मुख्यार्थसंरक्षणम् सम्पन्नम् ॥ एवम् निर्दिष्टवादानाम् विकासक्रमः ऐतिह्यदृष्ट्या श्रीव्यासमहर्षिसामयिकदार्शनिकवातावरणे वेदार्थविचारकाणां विचारपरम्परा च दृष्टा । इदानीम् ब्रह्मवादशब्दार्थस्य निर्णयं कुर्मः । पूर्वविवेचनेनैव इदम् स्पष्टम् यत् केवलनिमित्तकारणवादिनाम् न ब्रह्मवादित्वम् । किन्त्वभिन्ननिमित्तोपादानकारणवादिन एव ब्रह्मवादिनः । एतेन द्वितीयविकल्पनिरासप्रकारोऽपि सूचितः ।

एतदुपादानत्वम् ब्रह्मणः–'विवर्तदृष्ट्या परिणामदृष्ट्या वा स्वीकार्य'मित्येतन्निर्णयेनैव प्रथमविकल्पनिरसनपद्धतिरपि बुद्धिपथमायास्यति ब्रह्मवादशब्दार्थश्च निर्णीतो भविष्यति । ब्रह्मविवर्तोपादानं अस्ति वा नास्ति इति निर्णयात् प्राक् सृष्टिप्राक्कालसामयिकपरिस्थितिनिरूपकौपनिषद्वचनैः सृष्टिनिरूपकवचनैश्च साकं विवर्तोपादानत्वस्य सम्बन्धोऽस्ति न वा इत्यस्य विमर्शस्य परमावश्यकतास्ति । विवर्तोपादानत्वाभ्युपगन्तृपक्षे प्रपञ्चस्य भ्रमरूपत्वम् अकामेनाप्यभ्युपगमनीयम्, भ्रमस्य ईक्षणस्य च सम्बन्धसत्ता न वा इदमपि परामृष्टव्यम्, स्वमतसाधकत्वेन वेदान्तिनः ईक्षणं सविशेषमुपयुञ्जते इति सुप्रथितम् । सृष्टिप्राक्कालसामयिकपरिस्थितिनिरूपकोपनिषद्वाक्येषु 'तदैक्षत बहु स्याम्' इत्यादिषु ईक्षणम् सुव्यक्तमुक्तमिति पूर्णतया निगमप्रमितत्वमपि । यद्यनेन विवर्तोपादानत्वराद्धान्तः अविरुद्धः स्यात् तदैव विवर्तोपादानत्वस्य वैदिकसम्मतत्वम् सम्पद्येत । अन्यथा शिष्टापरिगृहीतत्वम् न्यायवैशेषिकवत् अत्र तुल्यतया प्राप्यते श्रेयोर्थिनाम् हेयत्वमुपेक्ष्यत्वमपि । अत एव भ्रमोत्पत्तितः प्राक् ईक्षणमावश्यकम् न वा इत्यपि विमृशामः । शुक्तिरजतादिभ्रमोत्पत्तितः प्रथमं कुत्रापि ईक्षणं दृष्टिपथे नायाति न केनापि प्रकारेण ईक्षणावश्यकता प्रतीयते । जगति कस्यापि भ्रमोद्भवतः पूर्वम् प्रेक्षावान् तत्सम्बन्धि विमृश्य पश्चात् भ्रान्तो भवतीति नैतादृशः कश्चित् नियमोऽस्ति । भ्रमस्तु यदृच्छया अकस्मादेव भवतीति तत्र प्रथमतः नास्ति विमर्शावश्यकता ॥ भ्रमरूपप्रपञ्चो-

---

१ कारणनिरूपकवाक्येषु निरूपितेक्षणेन, निगमप्रमितेक्षणेनेति बोध्यम् ।

त्पत्तितः प्राक् ब्रह्म विमृश्य भ्रमात्मकम् विश्वमुत्पादयतीति कथनं तु धिषणातिरेक-विलसितमेव। अन्यदप्यत्र विचारणीयम्–अध्यस्तम् जगदुत्पाद्य परमात्मा स्वयं भ्रान्तो भवति अथवा जीवः भ्रान्तो भूत्वा भ्रमानुभवम् करोति। यद्वा ऐन्द्रजालिकः प्रेक्षकसमूहम् यथा भ्रान्तिमनुभावयति तथा ईश्वरः जीवान् भ्रामयति। विमृश्य ईश्वरः स्वयम् भ्रान्तो भवतीति वचनं तु ईश्वरस्य घोरोपहासरूपमेव। इतोऽधिकस्य उपहासस्य शक्यतैव नास्ति। युक्त्यसङ्गतत्वमपि अस्य कथनस्य, विचारस्य विशेषज्ञानोत्पादकत्वेन प्रत्युत भ्रमबाधकत्वात्। अन्यमनस्कता काचतिमिरादिकारणसामग्री देवदत्तनिष्ठा यज्ञदत्तो भ्रमानुभवं करोतीत्यस्य पक्षस्य यथा तर्कासङ्गतत्वम् तद्वत् जीवो भ्रमानुभवम् करोति इति पक्षस्यापि तर्कानुपपन्नत्वमेव। ऐन्द्रजालिकवत् ईश्वरो भ्रमानुभवम् कारयति इति तृतीयः पक्ष एव अवशिष्टः, अत्रापि तर्कानुपपत्तिस्तु तुल्यैव। ऐन्द्रजालिकः स्वयं मिथ्याभूतान् न भ्रमानुभवं कारयति, किन्तु सत्यरूपप्रेक्षकान् एव मिथ्यावस्तु अनुभावयति। प्रतिबिम्बवादे तु जीवस्य स्वयं भ्रमरूपत्वेन भ्रमानुभवकरणस्य अशक्यतैव। अवच्छेदवादपक्षे स्वल्पशक्यताया अस्तित्वमपि तथापि अवच्छेदवादिनस्तु जीवाश्रिताविद्यावादिन इत्येषा चर्चापि तेषामनुपयोगिनी। अवच्छेदवादपक्षे तु जीवाश्रिताविद्यैव जगद्भ्रमजननीति ऐन्द्रजालिकवत् ईश्वरोपयोग एव नास्ति। अवच्छिन्नचेतनेन तथा दोषेणैव सर्वकार्यसिद्धौ अनुभावक ईश्वरस्य अजागलस्तनप्रायत्वमेव। एवम् तृतीयः पक्षोऽपि निरस्तः। प्रपञ्चस्य विवर्तरूपत्वाभ्युपगमे तु इतोऽप्यधिकदोषाणां प्रसक्तिः। मुख्यतया इदमालोचनीयम्–ईश्वरः अपरमार्थः परमार्थो वा? परमार्थत्वपक्षे तु द्वैतापत्तिः। अपरमार्थत्वपक्षे तु एतद्भ्रमाधिष्ठानत्वेन शुद्धमेवाङ्गीकरणीयम्। किन्तु शुद्धस्य ज्ञानाविषयतया अधिष्ठानत्वमनुपपन्नम्॥ अधिष्ठानत्वानुपपत्तौ तु कारणाभावात् भ्रमाभाव एव। यदि सादृश्याधिष्ठानज्ञानविषयतादिकारणानाम् सादिभ्रम एव अपेक्षा, 'जीव ईशः' 'विशुद्धा चित्' इत्यादिवचनैः ईश्वरभ्रमस्यानादित्वेन अनादिभ्रमे कारणापेक्षा नास्तीति वचनं तु डिम्भजनव्यामोहनमात्रमेव। 'अनादिभ्रमे अधिष्ठानदोषात्मककारणद्वयापेक्षासत्त्वेऽपि अन्यकारणापेक्षा नास्ति, दोषजन्यत्वेऽपि अनादित्वमस्ति' इत्यादिवचनानि तु स्वगोष्ठीप्रसिद्धसमयान्येव। कारणद्वयापेक्षापि नास्ति इति स्वीकारे तु बौद्धशून्यवादप्रवेश एव सुनिश्चितो भवति। दोषजन्यत्वमपि अनादित्वमपि इति तु व्याहतम् वचनम्। अत्र विशेषजिज्ञासायां तु श्रीभाष्यश्रुतप्रकाशिकातत्त्वमुक्ताकलापसर्वार्थसिद्धिशतदूषण्यादीनां अवलोकनं परमावश्यकम्। यद्येवमुच्येत न वयम् अधिष्ठानस्वरूपसत्ताम् भ्रमसमयस्थलोभयावच्छेदेन व्यासेधामः येन सौगतसमयं प्रविशेम, अपितु अधिष्ठानज्ञातत्वापेक्षामेव अप्रत्यक्षेऽपि आकाशे बालास्तलमलिनतामिति भाष्यवचनानुसारेण व्यासेधाम इति चेत् अत्र किंचित् परामृश्यते–अनुद्भूतरूपवत्वेन चाक्षुषप्रत्यक्षाभावेऽपि यथा बालानाम् तलमलिनताद्यध्यासः चाक्षुषः भवति तथात्रापि ज्ञानाविषयतया अज्ञातेऽपि अधिष्ठाने ईश्वरभ्रमः विश्वभ्रमश्च भवतीति न वक्तव्यम्, अज्ञातेऽपि अधिष्ठाने यदि भ्रमः भवतीत्यङ्गीक्रियते–तर्हि इदम् मलिनमित्यत्र इदमिति सर्वनाम्ना

कस्य परामर्शो भवति आकाशस्य मलिनताया वा?–प्रथमपक्षाङ्गीकारे तु अधिष्ठानस्य सामान्यतया ज्ञातत्वमेवायातम् इति सर्वथा अज्ञातत्वसाधनम् अरण्यरुदितप्रायमेव। द्वितीयपक्षस्वीकारे तु आकाशाश्रिताभ्रादिसम्बन्धिमलिनताया एव इदमित्यनेन ग्रहणात् तस्मिन्नेव तद्बुद्धिः भवतीति अध्यासो नाम अतस्मिंस्तद्बुद्धिः इति व्याख्याविरुद्धतया–"परत्र पूर्वदृष्टावभासः स्मृतिरूपः" इति लक्षणानाक्रान्ततया च इदम् मलिनमिति प्रत्ययस्य अध्यासत्वमेव न भवेत्। तस्मात् इदम् मलिनमिति प्रत्ययस्याध्यस्तत्वाभ्युपगमे अधिष्ठानस्य ज्ञातत्वम् सामान्यतयाभ्युपेयमेव॥ अतः आकाशस्य अचाक्षुषत्वेऽपि मानसज्ञानविषयत्वेन सर्वथाज्ञानाविषयता नास्तीति भ्रमसंभवः॥

शुद्धब्रह्मणस्तु सर्वथाऽज्ञातत्वेन तदधिष्ठानकभ्रमासंभव एव। यादृशो भ्रमः तादृशमेवाधिष्ठानं सर्वत्र दृश्यते, यथा चाक्षुषे चाक्षुषं, श्रावणे श्रावणं इत्यादि अयं नियमस्तु अत्र भग्नो भवतीति चेत् पञ्चेन्द्रियग्राह्यभ्रमेषु प्रत्येकेन्द्रियग्राह्यभ्रमे एतन्नियमस्य नियतत्वं दृश्यते, किन्तु मनसस्तु सर्वेन्द्रियनियामकत्वेन सर्वेन्द्रियसम्बद्धत्वेन मानसग्राह्ये अधिष्ठाने मानस इव चाक्षुषादिभ्रमोऽपि सम्भवति। अत एव विप्रयुक्तस्य प्रासादे सा पथि पथि च सा इत्याकारकविरहसामयिकानुभवे मानसग्राह्य एव अधिष्ठाने चाक्षुषभ्रमोऽपि दृश्यते इति नास्मदुक्तस्यानुपपन्नत्वम्। एवमभ्युपगम एव इदम् मलिनमिति प्रत्ययस्य भ्रमत्वं भवेत्। अन्यथा तु वियदाश्रिताभ्रादिमालिन्यस्य इदमित्यनेन परामर्शो भवति नाकाशस्येति साधने अध्यासलक्षणानाक्रान्तत्वेन अध्यासत्वमेवानुपपन्नम् भवति, इति [redacted]दुपपादितम्॥ एतत्तु प्रौढ्या कृत्वाचिन्तया उक्तम्। अत्रान्यदपि किंचित् वक्तव्यमवशिष्यते–अवकाशात्मकाकाशस्य तु प्रत्यक्षत्वमेवानुभूयते। अन्यथा तु गृहनिर्माणादिक्रियाया गमनोपवेशनादिक्रियाया अपि असम्भवः। चक्षुषा दृश्यमानोऽवकाशस्तु न पृथिव्यां न जले न तेजसि न वा वायावन्तर्भूतो भवति, पृथिव्यादिभिन्नतयैव स्पष्टतया दृश्यमानत्वात्। तत्तल्लक्षणासम्बद्धतयापि पृथिव्यादिभिन्नत्वमवकाशस्य। अवकाशदर्शनाभावे आधेयभूता मलिनतापि न दृश्येत इति अभ्रादिमालिन्याधारभूतस्य अवकाशात्माकाशस्य चाक्षुषत्वमेव अङ्गीकरणीयम्। एतावता अज्ञातत्वं अधिष्ठानस्य निरस्तम् ज्ञातत्वमेव सिद्धम्॥ अन्यथा तु इदम् मलिनमिति प्रत्ययस्य भ्रमत्वमेव न भवेत् इत्युक्तमेव। अनुद्भूतरूपवत्त्वेन वायुर्यथा अप्रत्यक्षः तथा अनुद्भूतरूपवत्त्वेन आकाशस्यापि अप्रत्यक्षत्वम् एवोचितम्। कथमुच्यते प्रत्यक्षत्वम् इति चेत् तुल्ये अनुद्भूतरूपवत्त्वेऽपि उभयोः एकस्य चाक्षुषप्रत्यक्षविषयत्वमन्यस्य न इत्यत्रापि किंचित् कारणं वक्तव्यम्–अवकाशात्मकाकाशस्य प्रत्यक्षसिद्धत्वेन उभयोः वैलक्षण्यं प्रत्यक्षमनुभूयते। अन्ततो गत्वा कश्चन स्वभावविशेष एव नियामकतयाऽङ्गीकार्यः, येन वैलक्षण्यमुपपद्येत। अतिनिबिडान्धकारे मनसि कल्पिते मानसग्राह्य एवाधिष्ठाने कदाचित् कस्यापि कान्दिशीकस्य भावनाप्रकर्षेण चाक्षुषपिशाचादिभ्रमो भवतीति मानसग्राह्ये अधिष्ठानेऽपि चाक्षुषादिभ्रमो भवतीति अस्मदुक्तनियमस्यैव स्थैर्यम्॥

अत्र पुनः किंचित् उच्यते—विशेषतो विमर्शे तु अधिष्ठानस्य अज्ञातत्वं अन्ततो गत्वा भ्रमानुपयोगित्व एव पर्यवस्यति। भ्रमस्य प्रसिद्धिः अपारमार्थिकी सत्तापि भ्रान्ताधीनैव; यतः यो हि भ्रमानुभवम् करोति तदधीनैव भ्रमस्य प्रसिद्धिः अपारमार्थिकी सत्ता वाच्या। अन्याधीना तु सत्ता नैव निरूपयितुम् शक्या, अन्यथा भ्रान्तसहवर्तिनामपि भ्रमानुभवो दुर्निवार एव भवेत् इति शुक्त्यादिषु रजतादिकम् सर्वैरनुभूयेत। अतः भ्रमप्रसिद्धिः अपारमार्थिकी सत्ता च भ्रान्ताधीनैव निरूप्या। भ्रमस्वरूपनिर्वाहोऽपि भ्रान्ताधीन एवेति यत् भ्रमप्राक्क्षणे भ्रमसमये वा भ्रान्तानुपयोगि तत् भ्रमानुपयोगीति अनिच्छयापि सिद्ध्यति। एवमनुपयोगित्वसिद्धौ भ्रमसमये अधिष्ठानस्वरूपस्थितिः अप्रयोजिकेति निरधिष्ठानकभ्रमप्रसिद्ध्या तुर्यबौद्धतूर्यस्य मुखरत्वप्रसङ्गः। अतः सिद्धमेतत् इदम् मलिनमिति प्रत्ययस्य भ्रान्तत्वम् अधिष्ठानसामान्यज्ञानेनैव सिद्ध्यति। अन्यथा तु सद्वस्त्ववगाहिज्ञानमेव भवेत्, अतः अप्रत्यक्षेत्युक्तिः चिन्त्यैव।

वास्तविकता त्वत्रेत्थम्—यत् जैनादयो व्यक्तशत्रुत्वं प्रदर्शयन्त ईश्वरकारणत्वम् खण्डयन्ति—विवर्तवादिनस्तु स्वगृहस्थितगुप्तशत्रुवत् छद्मतः गुप्ताक्रमणम् कुर्वन्ति ब्रह्मकारणत्वसिद्धान्तोपरि। ब्रह्मकारणं नास्तीति स्पष्टतया कथनम् व्यक्तशत्रुतया युद्धो-द्घोषतुल्यम् ब्रह्मणः कल्पितम् कारणत्वम् इति कथनं तु विश्वासघातपूर्वकम् ब्रह्मणो वञ्चनमेव। दृष्टान्तरूपेण कस्यचन व्यक्तिविशेषस्य पाण्डित्यविरोधप्रसङ्गे एतेषु पाण्डित्यं नास्ति इत्येवम् विरोधः भवति—एतेषु पाण्डित्यम् कल्पितमस्ति इत्येवमपि विरोधस्य शक्यताऽस्ति, किन्तु प्रथमप्रकारेण विरोधो द्वितीयप्रकारकविरोधतोऽधिकतया इष्टः ऋजुहृदयसुज्ञजनदृष्ट्या। एवमेव जैनादिविरोधप्रकारः अद्वैतिविरोधप्रकारत उत्कृष्ट इत्यङ्गीकार्यमेव। अत एव साधूक्तम् सर्वतन्त्रस्वतन्त्रैः मीमांसासरसीरुहसहस्रांशुरूपैः श्रीपार्थसारथिमिश्रैः=तद्वरमस्मान्मायावादान्माहायानिकवाद=इति। एतत् सर्वमपि विमृश्य एवं अस्माभिः निर्णीयते यत् प्रकृतेः स्वातन्त्र्यम् सत्यत्वं च स्वीकृत्य प्रकृतिः जगत्कारणम् इति सांख्यसिद्धान्तः। प्रकृतेरनिर्वचनीयत्वम् अङ्गीकृत्य वचनमात्रेण ब्रह्मपारतन्त्र्यम् प्रदर्श्य, ब्रह्मणः प्रकृतिपारतन्त्र्यम् निर्माय (अनीश्वरतुल्यतां साधयित्वा) सर्वथाकर्तृत्वकारणत्वादिधर्मशून्यतां शुद्धब्रह्मणः स्वीकार्य 'प्रकृतेः क्रियमाणानि' तथा 'तस्य कर्तारमपि मां' इति गीतावाक्यद्वयस्य अन्यथार्थम् कृत्वा सविशेषणे हीति न्यायेन ब्रह्मकारणतामपह्नुत्य प्रकृतेः जगत्कारणत्वम् प्रतिपाद्य ब्रह्मकर्तृत्वस्य निषेधः विवर्तो-पादानवाद्यद्वैतिसिद्धान्तः। तुल्यतया सांख्यन्यायवैशेषिकवत् ब्रह्मोपादानकारणताया अद्वैतेऽपि विरोधः। अतः 'एतेन शिष्टापरिग्रहा' इत्यादिसूत्रभाष्य उक्तो निर्णयः स्वसिद्धान्तेनापि सम्बध्यते इति अविस्मरणीयमद्वैतिभिः। तस्मादिदम् निष्प्रत्यूहम् सिद्धम् यत् अभिन्ननिमित्तोपादानवादिन एव ब्रह्मवादिनः इति अस्मदुक्तम् सर्वमपि निरवद्यम्॥

—:०:—

* स्वबुद्धिस्थं यत्सर्वं न तन्मान्यं कदाचन ॥
अर्थोऽप्ययमेव निखिलैरपि वेदभाष्यैः
रामानुजार्यसहितमाध्वपञ्चरात्रैः ।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रैः
निर्णीयते स्फुटमयं हरिणा सदैव ॥

पुरुषोत्तमस्य प्रसादभक्तिलभ्यत्वम् ॥

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥' अत्र प्रवचनपदं वेदवाचकम्, वाच्यतासम्बन्धेन वेदोक्तयावत्कर्मज्ञानभक्त्यादिसाधनानां ग्रहणम् उपलक्षणविधया भवति। तेनायमात्मा न वेदोक्तसाधनलभ्यः, न वा पुरुषनिष्ठान्यस्वाभाविकसाधनलभ्यः, नागन्तुकसाधनलभ्यः इत्येतत्सिद्धान्तस्य श्रुत्या सिद्धिः । सोऽयमेव परमात्मा यस्य कठोपनिषदि 'सर्वे वेदा यत्पदमामनन्ति' इत्येवं प्रतिपादनम् । यद्येतासां श्रुतीनां समन्वयपूर्वकमेकवाक्यता भगवद्गीतया सह क्रियेत तर्हि पुष्टिलभ्यतैव परमात्मस्वरूपस्येति निश्चितं भवति। पुष्टिभक्तेः अनुग्रहलभ्यत्वम् अनुग्रहापरपर्यायभूतायाः कृपाया वरणलभ्यत्वम्, वरणस्य इच्छाधीनत्वम्। एतेन मुख्यसाधनता तु इच्छायां पर्यवसिता, अवान्तरव्यापाररूपसाधनता तु पुष्टिभक्तौ । अतः 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतिप्रतिपाद्यमेव स्वरूपं 'वेदैश्च सर्वैरहमेव वेद्यः' इति वाक्येनोक्तम्, किन्तु अस्य स्वरूपस्य कथं प्राप्तिः ? इत्याकांक्षायां तत्पूर्तये 'नाहं वेदैर्न तपसा' इत्युक्त्वा 'भक्त्या त्वनन्यया शक्यः', 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' इति उक्तम्। अत्र प्रतिपादितः परः पुरुषो न कश्चन अन्यः, किन्तु 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । परं ब्रह्म परं धाम पवित्रं परमं भवान्' इत्यादिवाक्यप्रतिपाद्यः कृष्ण एव। इयं अनन्यभक्तिरपि न पुष्टिभक्त्यतिरिक्ता, किन्तु अनतिरिक्तैव । 'मय्यावेश्य मनो ये मां', 'मन्मना भव मद्भक्तः' इत्यादिवचनानि सूत्रीकृत्य तद्भाष्यरूपत्वेन यदि 'तन्मनस्कास्तदालापाः' इति वचनं गृह्येत तर्हि 'अनन्यभक्त्यनतिरिक्तैव पुष्टिभक्तिः' इति निश्चितं भवति। श्रीमद्भागवतेऽपि अस्य स्वरूपस्य अनुग्रहभक्त्यादिलभ्यत्वमेव प्रदर्शितम्, नतु साधनलभ्यत्वम् । 'यन्न योगेन सांख्येन' 'सर्वं मद्भक्तियोगेन मद्भक्तो लभते' 'तथाप्यहं भवदनुग्रह ईश मन्ये' 'तस्माद् मद्भक्तियुक्तस्य' 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह । नायं सुखापो भगवान् देहिनां' 'प्रीयतेऽमलया भक्त्या हरिः' इत्यादिवचनानि अस्मदुक्तसाधकान्येवोपलभ्यन्ते। 'तद्विस्तारो भागवतम्' इति श्रीमदाचार्योक्त्या भगवद्गीताविस्तारत्वमेव भागवतस्य ॥ यदि गीतोक्तसूत्रवाक्यं भाष्यरूपभागवतवाक्यद्वाराऽवलोक्यते तर्हि विशेषानन्दोऽनुभूयते इति सर्वसुज्ञजनविदितम्। उदाहरणरूपेण यदि 'नायमात्मा' इति श्रुतिवचनं सूत्रत्वेन परिकल्प्य एतद्वृत्तितया 'नाहं वेदैर्न तपसा' इति वाक्यं व्यवस्थाप्य पूर्वोक्तसूत्रभाष्यत्वेन यदि 'न रोधयति मां योगः', 'यन्न योगेन सांख्येन दानव्रत-' 'तेनाधीतश्रुतिगणाः' इत्यादिवाक्यान्युपयुञ्जरन् तर्हि निरतिशयानन्दमनुभवेम। 'भक्त्या लभ्यस्त्वनन्यया' इति सूत्रभाष्यत्वेनापि पूर्वनिर्दिष्टवचनसन्दर्भोपयोगो भवति। 'मय्यावेश्य मनो ये माम्' इत्यादिसूत्रभाष्यरूपेणापि 'तन्मनस्कास्तदालापाः', 'तानाविदन्नि'त्यादिवचनानि योज्यानि । एवमुदाहरणरूपेणाधिकालोचने कृते सति विशेषप्रकाशोपलब्धिः भविष्यति। अत एव श्रीमदाचार्यैः 'उत्तरं पूर्वसन्देहवारकम्' इति राद्धान्तः प्रदर्शितः । यद्यपि पूर्वसन्देहवारकताप्रमाण-

चतुष्टयेऽपि अस्ति, तथापि श्रीगीताभाष्यत्वेन श्रीभागवतस्य व्यवस्थापनं किञ्चित् विशेषदृष्ट्या । अन्येषां तु केवलपूर्वसंशयनिरासकत्वमेव । भागवतस्य तु भाष्यत्वमपि भाष्यलक्षणाक्रान्तत्वात् । एतावता अनुग्रहभक्त्यादिलभ्यत्वं परमात्मनः प्रसाधितम् । इदानीम् अन्याचार्यमतालोचनमपि कार्यम्, आवश्यकत्वात् ।

तत्र तावत् प्रथमं एतत्सम्बन्धि श्रीमत्शंकरभगवत्पूज्यपादमतमेवालोच्यते । बृहदारण्यकभाष्ये श्रीभगवत्पादा निरूपयन्ति–'तस्मात् तार्किकचाटभटराजाप्रवेश्यम-भयं दुर्गमिदम् अल्पबुद्ध्यगम्यं शास्त्रगुरुप्रसादरहितैश्च । 'कस्तं मदामदं देवम् मदन्यो ज्ञातुमर्हति ।' 'देवैरत्रापि विचिकित्सितम् पुरा।' 'नैषा तर्केण मतिरापनेया ।' 'वरप्रसाद-लभ्यत्वश्रुतिस्मृतिवादेभ्यश्च' 'तदेजति तन्नैजति' इत्यादिविरुद्धधर्मसमवायित्वप्रकाशक-मन्त्रवर्णेभ्यश्च ।'एतद्वचनतात्पर्यार्थस्तु ब्रह्मरूपम्, किं वा ब्रह्मात्माद्वैतरूपं ? यत् दुर्गम् तत्तु अभयं अल्पबुद्ध्यगम्यं तार्किकदस्युराजाप्रवेश्यम्–शास्त्रगुरुप्रसादरहितैरपि अगम्यम् इति निरूप्य एतत्स्वरूपस्य साधनालभ्यत्वम् तर्काद्यगम्यत्वं च प्रदर्श्य केवलवरप्रसादलभ्यत्व-स्थापनम् तथा उक्तसिद्धान्तसमर्थकत्वेन विरुद्धधर्माश्रयत्वदृढीकरणम् शुद्धाद्वैत-ब्रह्मवाद-प्रवेशरूपम् पुष्टिमार्गप्रवेशरूपम् इति अतिरोहितमेतत् ॥ 'अपराधसहस्रभाजनं', 'अगतिं शरणागतम्', 'कृपया केवलमात्मसात् कुरु', 'भवतु मम परस्मिन् शेमुषी भक्तिरूपा' इति श्रीयामुनेयोक्तिः । श्रीयतिराजोक्तिरपि श्रीयतिपतिसमयस्य अस्मत्समयानुकूल्य-साधने पर्याप्ता इति स्पष्टम् । स्वल्प एव मतभेदोऽस्माकम् । यद्युच्येत ब्रह्मवरणलभ्यम् कृपालभ्यमिति नात्र श्रीमदाचार्यश्रीशंकराभिप्रेतम्, किन्तु ब्रह्मात्माद्वैतज्ञानस्य वरप्रसाद-लभ्यत्वमेव श्रीभगवत्पादाभिप्रेतम् । एतदप्यालोचनीयम्–किमत्र ब्रह्मात्माद्वैतज्ञानं परोक्षम् अपरोक्षम् वा ? । यदि परोक्षस्य ग्रहणम् तदा तस्य मीमांसितागमजन्यत्वम् स्वीकार्यम् । अत्र तु 'शास्त्रगुरुप्रसादरहितैः' इति विशेषणेन परोक्षं ज्ञानम् सूचितम् । 'वरप्रसादलभ्यत्वश्रुतिस्मृतिवादेभ्यश्च' इति वचनेन अपरोक्षज्ञानसूचनस्यापि श्रीशंकरा-चार्याशयसमाविष्टत्वम् विद्यते । यद्यपरोक्षं ज्ञानमत्र गृहीतमित्युच्यते, तदापि तत् ब्रह्मभिन्नं वा ब्रह्माभिन्नं वा ? । भिन्नत्वे तु द्वैतापत्तिः । अभिन्नत्वे तु प्रसादलभ्यत्वस्य स्वरूपपर्य-वसानमेव सञ्जातमिति निष्प्रत्यूहाऽस्मन्मतसिद्धिः । एतावता पुरुषोत्तमस्य प्रसादभक्ति-लभ्यत्वम् सिद्धम् । श्रीकनकदासादिभक्त्यैव परितुष्टा कृष्णमूर्तिः परिवर्तिता, भित्तिरपि भग्ना एतत् कृपालभ्यत्वमेव, नान्यत् किमपि; एवं मध्वमतस्याप्यानुकूल्यम् । सर्वेषामपि मतमत्र अनुकूलं, प्रातिकूल्यं तु न कस्यापि । भगवद्गीता तु डिण्डिमघोषपूर्वम् इदमेव उपदिशति चरमरहस्यभागे–'मन्मना भव' इति भक्तिदानमपि तदा प्राप्यते सर्वगुह्य-तमश्रवणमपि तदा लभ्यते यदि इष्टत्वप्रियत्वप्राप्तिर्भवेत्, इष्टत्वप्रियत्वप्राप्तिरेव वरणं कृपा वा । अतः 'सर्वथा चेत् हरिकृपा न भविष्यति, यस्य हि तस्य सर्वमशक्यं स्यात् मार्गेऽस्मिन् सुतरामपि ।' 'प्रेमसेवात एव स्यात् विशिष्टव्यक्तिरुत्तमा । प्रेम्णोऽन्यत् साधनं लोके नास्ति मुख्यं परं महत्' इत्यादिश्रीमद्वल्लभाचार्योक्तिरेव विश्वविजयिनी । 'अहं भक्तपराधीनः' इति सिद्धान्तस्यापि स्थैर्यम् । एवम् प्रसादभक्तिलभ्यत्वं पुरुषोत्तमस्येति सिद्धम् ॥

२. यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥
—श्री वल्लभाचार्य

कर्मयोग(कर्ममार्ग)स्याप्यपवर्गसाधकता ।

श्रीमद्भागवत एकादशस्कन्धान्तर्गत-उद्धवोपदेशप्रसङ्गे पद्यमेकं समुपलभ्यते—'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित् ।' इति । उपस्थापितभगवद्वचनेन कर्मज्ञानभक्तिरूपमार्गत्रयस्यापि अपवर्गाख्यश्रेयःसाधकता प्रसाध्यते । तत्र तावत् ज्ञानभक्त्योस्तु अपवर्गसाधकता विवादपरिधिमप्रविष्टा सर्वजनविदिता चेति प्रायः सर्वेषामेकमत्यम् । किन्तु कर्मणो मोक्षप्रापकत्वं विवादग्रस्तमेव । कर्मणः केवलचित्तशुद्धिसाधकत्वमङ्गीकृत्य–विविदिषायामेव तस्य साधनत्वेन साक्षादुपयोगः प्रस्थापितः, नतु मुक्तौ । ज्ञानभक्त्यात्मकसाधनद्वयं तु साक्षादपवर्गसाधकमिति बहुभिरभ्युपेयते । किन्तु पूर्वलिखितभागवतस्थभगवद्वचनेन तथा भगवद्गीतान्तर्गतेन 'सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः । एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् । यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥' एतत्पद्ययुग्मेन कर्मणो मोक्षप्रापकत्वं दृढतया सिद्धम् इति व्यक्तमेतदपलापस्य अशक्यवचनत्वम् । परंपरया मुक्तिसाधकं यदि कर्म भवेत् भवेत्तर्हि उपरिष्टान्निर्दिष्टभगवद्गीताश्लोकद्वयस्य स्वरूपानिर्वाहः । भागवतीय 'योगास्त्रये'ति पद्यस्य आग्रहेण कथंचिदन्यथार्थकरणेऽपि भगवद्गीताप्रोक्त'सांख्ययोगे'ति वचनद्वयासमन्वयः स्थूलदृशाप्यवगम्यते । वस्तुतस्तु 'सांख्ययोग' इति वचनद्वयासमन्वितं 'योगास्त्रये'ति पद्यार्थकरणमपि अनौचित्यसीमानतिक्रान्तमेव । गीतास्थभगवद्वचनानां भागवतीयभगवद्वचनानां च परस्परं समन्वयस्तु परमावश्यक एव । अन्यथा तु उद्धवोपदेश-अर्जुनोपदेशयोरेव परस्परविरोधिता भगवत असम्बद्धवादिता अनाप्तता भगवद्वचनानामप्रामाण्यं अनाप्तिमूलत्वं चेति अनर्थसहस्रपरंपराबलादापतति अतोऽस्मदुक्तैव समन्वयसरणिः परिग्राह्या । यदत्र सांख्ययोगयोरैक्यमुक्तं तत्फलैक्यदृष्ट्यैव ।

स्वरूपैक्य-साधनैक्य-इतिकर्तव्यतैक्यादीनां अविवक्षितत्वात् यदि फलैक्यदृष्ट्या निश्चितमैक्यं तर्हि एकस्य साक्षान्मोक्षसाधकत्वम्, अन्यस्य परम्परया मोक्षसाधकत्वं इत्यस्य भेदस्यापि ऐक्यबाधकत्वं सुव्यक्तमेव । स्वरूपैक्यादीनां तु प्रत्यक्षशब्दोभयविरुद्धत्वं स्पष्टमेव । 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ । तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते' इति गीतावाक्यस्यापि निर्दिष्टसिद्धान्तसमर्थकतैवावलोक्यते । अत्र 'विशिष्यते' इति पदमपि न फलैक्यबाधकं, प्रत्युत साधकमेव; पूर्वार्धे 'निःश्रेयसकरावुभौ' इति पदद्वयं फलैक्यस्य अक्षुण्णतामबाधित्वैव कयाचित् विशेषदृष्ट्या वैशिष्ट्यप्रदर्शकम्, एतत्तु अन्यत्र प्रदर्शयिष्यामः । अत्र कर्मणोऽपि साक्षान्मोक्षप्रापकत्वं इति भगवद्गीतोक्तसिद्धान्ताभ्युपगम एव श्रेयान् । तत्त्वार्थदीपनिबन्धे सर्वनिर्णयप्रकरणे कर्मण आत्मसुखसाधनता ज्ञानसहकृतकर्मणो मोक्षसाधनता या सिद्धान्तिता सापि पूर्वस्थापितसिद्धान्ताविरोधिन्येव । अत एव 'ज्ञानिनस्तदभिव्यक्तौ 'कर्तुर्मोक्षः क्रमाद् भवेत्' इति पद्ये 'ज्ञातु'रिति पदमनुपन्यस्य

कर्तुरिति पदोपन्यासः अत्र ज्ञानस्य अङ्गत्वेनैव समावेशः नाङ्गित्वेनेति प्रमाणयति। अङ्गित्वं तु कर्मणोऽप्रतिहतम्। साधनता तु प्राधान्येन अङ्गिपर्याप्तैवाङ्गीकरणीया गौणतया अङ्गपर्याप्ता। समुच्चित्य साधनतास्वीकारेऽपि 'निःश्रेयसकरावुभौ' इति वाक्यबलेन समप्राधान्येन उभयसमपर्याप्तैव साधनताऽभ्युपेया। साधनताया समप्राधान्येन उभयसमपर्याप्तत्वसिद्धिरेव कर्मणोऽपि साक्षान्मोक्षप्रापकत्वं साधयतीति न बाधकलेशमपि पश्यामः। यदि 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति श्रुतिवाक्यं पुरस्कृत्य गीताभागवतादिवाक्यानां स्मृतिवाक्यत्वेन 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति जैमिन्युक्तन्यायेन 'श्रुतिस्मृतिविरोधे तु श्रुतिरेव बलीयसी' इति राद्धान्तबलेन भगवद्गीतास्थफलैक्यप्रतिपादकवाक्यानां तथा च मोक्षसाधनत्वप्रतिपादकवाक्यानां यदि गौणार्थत्वाङ्गीकारः तर्हि कर्मणः साक्षान्मोक्षसाधनता तु बाधितेति चेत्,–न; भगवद्गीताया अन्यस्मृतिसाम्यं तु भगवद्गीतास्वरूपाऽपरिज्ञानमूलकमेव। तथा हि–'वेदैश्च सर्वैः अहमेव वेद्यो वेदान्तकृत् वेदविदेव चाहम्'–इत्येवं योऽधिकारपूर्वकं स्वस्वरूपं प्रदर्शयति तद्वाक्यस्य वेदवाक्यस्य च परस्परविरुद्धत्वकल्पनया एकत्र मुख्यार्थस्वीकारः, अन्यत्र गौणार्थः इत्येषा व्यवस्था तु उपहासरूपैव। साक्षात्परब्रह्मोक्तवेदार्थस्यानौचित्यं तल्लेखस्य वेदविरोधित्वं अस्मदादिलेखस्य वेदाविरोधित्वम्, अस्मदुक्तस्यैव औचित्यमित्युक्तिस्तु खद्योतस्य दिनकरत्वेन स्वप्रदर्शनसाहसतुल्यैव। 'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्' इति वाक्योक्तरीत्या अलौकिकदुग्धरूपाया गीतायाः स्वावलम्बने उपनिषद्रूपगोविरोधित्वकल्पनापि आस्तिकहृदये नैव भवितुमर्हति। किंच भगवद्गीतायाः स्वयमुपनिषद्रूपत्वात् प्रत्येकाध्यायपरिसमाप्तौ 'भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे' इति मिलति। तस्मादप्यत्र 'विरोधे त्वनपेक्षं स्या'दिति न्यायस्य प्रसर एव नास्ति। 'न कर्मणा न प्रजये'ति वाक्येन कर्मणो मोक्षसाधनत्वनिषेधस्तु सकामकर्मपर्यवसन्न एव, 'न प्रजया धनेन' इति पदद्वयसमभिव्याहारेण अस्मदुक्तस्यैव दृढीकरणात् 'नान्यः पंथा' इत्यादिश्रुतौ तु ज्ञानमार्गानुयाय्यधिकारिपरत्वेन संकोचः परमावश्यकः; अन्यथा 'यमेवैष वृणुते'–इत्यादिवाक्यानां विरोधो दुष्परिहर एव भवेत्। एतत्तु–'गतेरर्थवत्त्वमुभयथा, अन्यथा हि विरोधात्'–इति सूत्रभाष्ये प्रकाशादिषु च सुव्यक्तं। एतदप्यभियुक्तानुसरणमात्रमेव, मम तु किंचित् अन्यदपि अत्र प्रतिभाति॥

तथा हि–'नान्यः पंथा' एतादृशोत्तरार्धघटितवाक्यं उपनिषद्द्वये समुपलभ्यते श्वेताश्वतरे पुरुषसूक्ते च, 'तमेव विदित्वा' ईदृशपूर्वार्धघटितवाक्यं श्वेताश्वतरेऽस्ति, 'तमेवंविद्वान् अमृत इह भवति' ईदृशपूर्वार्धघटितवाक्यं पुरुषसूक्तेऽस्ति। अत्र एतावदेव विचारणीयं यत्–'नान्यः पंथा' इति निषेधस्य ज्ञानातिरिक्तकर्मभक्त्यादिमार्गपरत्वं, विषयप्रकारादिपरत्वं वा ?। वस्तुतस्तु श्वेताश्वतरस्थ 'तमेव विदित्वा' इति वाक्यघटकएवकारस्य 'नान्य' इति निषेधस्य ब्रह्मातिरिक्तविषयकज्ञाननिषेधपरत्वमेव। अर्थात् विषयपरत्वमेव। पुरुषसूक्तवाक्यस्थ 'एवं' पदस्य, 'नान्य' इति निषेधस्य च पूर्वप्रति-

पादितप्रकारातिरिक्तप्रकारवैशिष्ट्यनिषेधपरतया इतरप्रकारविशिष्टब्रह्मज्ञाननिषेधकत्वमेव फलतीति प्रकारविशेषपरत्वमेव, न तु कर्मभक्त्यादिमार्गपरत्वम् । अन्यथा उभयश्रुतिवचने 'एव' 'एवं' इति विभेदमपह्नुत्य 'एव'पदोपलब्धिरेवोपलभ्येत । किन्त्वेवमनुपलब्धिरेव अस्मत्पक्षपक्षपातिनी । तस्मात् 'तमेव विदित्वा,' 'तमेवंविद्वान्' इति वाक्यद्वयस्य 'सांख्ययोगौ' इति गीतास्थवाक्यद्वयस्य कोऽपि विरोधावकाश एव नास्तीति 'विरोधे त्वनपेक्षं स्यात्' इत्यस्य न्यायस्य नात्र प्रसरः । निगमसौधदीपश्रीरूपभगवद्गीतायास्तु वेदार्थसन्देहवारकत्वेन व्यक्तभगवद्वाक्यरूपत्वेन च सर्वथा वेदार्थपोषकत्वमेवानुभूयते इति ईषदपि वेदविरोधित्वकल्पनाप्यत्र अनवसरपराहतैव । एवं कर्मणोऽपि मोक्षप्रापकत्वं सिद्धम् । ज्ञानभक्त्योस्तु मोक्षप्रापकत्वं सर्वजनविदितमिति कृत्वा तयोः मोक्षसाधकत्व-विवरणं नात्रास्माभिः कृतम् । योगस्य तु स्वतन्त्रतया मार्गत्वमेव नास्ति इति अङ्गत्वेनैव तस्योपयोगः कर्मज्ञानभक्त्यात्मकमार्गत्रयेऽपि विद्यते । अत एव भगवद्गीतायां कर्मयोग-ज्ञानयोग-भक्तियोग इति शब्दोपलब्धिः । मार्गास्तु त्रय एव । तेनैव भगवद्-गीतायां कर्मषट्क-ज्ञानषट्क-भक्तिषट्केति षट्कत्रयप्रसिद्धिः । पूर्वोक्तरीत्यैव अष्टादशाध्यायानां विभागः कृतः । यदि योगस्यापि स्वतंत्रतया मार्गत्वं स्यात् तर्हि सार्धचतुरध्यायात्मकविभागचतुष्टयोपलब्धिः भगवद्गीतायां भवेत्, किन्त्वेवं विभागानुपलब्धिरेव 'मार्गत्रय'–इति सिद्धान्तं सुव्यक्ततया समर्थयति इत्यस्मन्मतस्यैव निर्दुष्टता ॥

सगुण-निर्गुणशब्दार्थविमर्शः ॥

इह हि विविधवृजिनतापोपतप्यमाननिखिलजनापवर्गाय शास्त्रे श्रवणादयः प्रतिपाद्यन्ते, तेषां विषयश्च ब्रह्मैव तत् सगुणं निर्गुणं वेति भवति विचिकित्सा। तत्र तावद्-स्थूलादिश्रुतेः निर्गुणमेवेत्यद्वैतिनः, 'परास्य शक्तिर्विविधैव, स्वाभाविकी ज्ञानबलक्रिया च' 'एतस्य वा अक्षरस्य प्रशासने गार्गि,' इत्यादिश्रुतिभ्यः अप्राकृतनिखिलधर्मरूपमिति ब्रह्मवादिनः । किन्त्वेतन्निर्णयस्य सगुणनिर्गुणशब्दार्थप्रकारविचारनान्तरीयकत्वेन पुरस्तात् सगुण-निर्गुणशब्दार्थप्रकारविचारः समीक्ष्यते । सगुणनिर्गुणशब्दार्थस्य प्रकारद्वयं शास्त्रे समुपलभ्यते, एकमद्वैतिमतरीत्या, अन्यच्चैववैष्णवरीत्या । अद्वैतिप्रकारे प्राकृतगुणयुक्तत्वं सगुण-शब्दार्थः, सर्वथा गुणधर्मादिशून्यत्वं निर्गुणशब्दार्थः । वैष्णवशैवप्रकारे तु अप्राकृतदिव्य-गुणधर्मयुक्तत्वं सगुणशब्दार्थः, प्राकृतगुणराहित्यं च निर्गुणशब्दार्थः । एतत्प्रकारद्वये कस्य श्रुतिसम्मतत्वं कस्य श्रुतिसिद्धत्वं एतावदेव विमृश्यम् । तैत्तिरीयनारायणोपनिषदि–'अंभस्यपारे' इत्यारभ्य 'तदेव ब्रह्म परमं कवीनाम्' इत्यन्तैः श्रुतिवाक्यैः सकलजगदुत्पाद-कत्वादित्यादिप्रकाशकत्वान्तःप्रविष्टत्व-समुद्रान्तःशायित्वपरात्परत्वाद्यनेकधर्मसत्ता ब्रह्मण्यस्ति इति प्रदर्श्य एतद्गुणयुक्तस्यैव ज्ञानिसम्मतपरब्रह्मत्वमित्येतत् विद्वद्भूव्या साधितम् । अत्राऽप्राकृतनिखिलधर्मरूपस्यैव ज्ञानिसम्मतपरब्रह्मत्वसाधनेन तस्य गुण-शून्यत्वाभ्युपगमस्तु विपर्यास एवेति सुस्पष्टं श्रुत्यैव सिद्ध्यति इति वैष्णवमतस्यैव श्रुतिसम्मतत्वम् । नारायणपरब्रह्मत्वसिद्धान्तोऽपि श्रुत्यैव सिद्ध्यति इति समुद्रान्तः-

शायित्वधर्मेण अयं समुद्रान्तःशायी नारायण एव परंब्रह्मेति साधयित्वा तदेव ज्ञानिनां परब्रह्मेति साधनं वैष्णवमतस्यैव श्रुतिसम्मतत्वे प्रबलं प्रमाणमिति दृश्यते । नारायणपरब्रह्मत्ववादोऽपि वैष्णवसम्मतसगुणनिर्गुणशब्दार्थानुकूल एव, न त्वद्वैतिसम्मतसगुणनिर्गुणशब्दार्थानुकूलः । ऋग्वेदविष्णुसूक्ते 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि' इत्यनया श्रुत्या अनन्तगुणविशिष्टमेव ब्रह्मस्वरूपं सिद्ध्यति, अस्यैवानुवादो श्रीमद्भागवते—'यो वा अनन्तस्य गुणाननन्तान्' 'विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह'—इत्यत्र च कृतः । प्रदर्शितप्रमाणैः अप्राकृतदिव्यगुणधर्मयुक्ततैव ब्रह्मणः साधिता, नतु गुणधर्मशून्यता । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्यत्र 'अस्ये'ति पुंलिङ्गप्रयोगः 'स्वाभाविकी'ति पदप्रयोगश्च औपाधिकगुणवादोन्मूलनार्थं पर्याप्तः । ब्रह्मसूत्रदृष्ट्या विचारे तु मायिकगुणाभ्युपगन्तृमते ईक्षत्यधिकरणे सांख्यमतनिरासस्य वैयर्थ्यमेव । कथमिति चेत्, 'सविशेषणे ही'ति न्यायेनाऽद्वैतिमतेऽपि ईक्षणात्मकगुणस्य प्रकृतिपर्यवसायित्वमेवाभ्युपगन्तव्यं । सांख्यमते ब्रह्मानधिष्ठितायाः प्रकृतेरीक्षणम्, अद्वैतिमते तु ब्रह्माधिष्ठितायाः प्रकृतेरीक्षणम् इत्येतदुत्तरमप्यनुत्तरमेव; व्याससिद्धान्तप्रक्रियाविरोधित्वात् । ईक्षणस्य प्रकृतिपर्यवसायित्वसिद्धावेव व्याससिद्धान्तविरोधारम्भः । ईक्षणस्य प्रकृतिपर्यवसायित्वे गौणता अनिवार्या भवतीति 'गौणश्चेन्नात्मशब्दात्' इति सूत्रोक्तव्यासाशयविरोधित्वं सुव्यक्तमेवाऽद्वैतिमते । अन्यच्च—'अपि च क्वचिद्गौणः शब्दो दृष्टः न चैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या, सर्वत्रानाश्वासप्रसङ्गात्' इत्याद्यनेकस्ववचनविरोधोऽप्यत्र समायाति । 'दूरे गुणास्तव तु सत्त्वरजस्तमांसि तेन त्रयी प्रथयति त्वयि निर्गुणत्वम् । नित्यं हरे निखिलसद्गुणसागरं त्वां आमनन्ति परमीश्वरमीश्वराणाम् ॥' इत्यत्र या सगुणनिर्गुणशब्दार्थव्याख्या वैष्णवसम्मता सैव श्रुतिसम्मतेति निष्प्रत्यूहं सिद्धम् । 'अदृश्यत्वाद्युक्तगुणशून्यः धर्माराहित्योक्तेश्च' एवं सूत्रमनुपन्यस्य 'अदृश्यत्वादिगुणको धर्मोक्तेः' एवं सूत्रोपन्यास एव व्याससम्मतसगुणनिर्गुणशब्दार्थे पर्याप्तः । अनेनैव सूत्रेण 'यत्तदद्रेश्यं' इत्यादिश्रुत्याशयोऽपि सौकर्येणावबुध्यते । एतेषां वचनानां अलौकिकगुणसिद्धावेव तात्पर्यम्, नतु गुणशून्यत्वसिद्धौ । श्रुतिगीतासूत्रभागवतरामायणमहाभारतादिभिः सर्वैरपि प्रमाणभूतग्रन्थैः ब्रह्मगुणोद्घोषः क्रियते, किमर्थमेतावानद्वैतिनामेव ब्रह्मगुणविद्वेषः इति कृतेऽपि प्रयासे न बुद्धिपथमारोहति । 'अस्थूलमनणुमह्रस्वं' इत्यादिश्रुतेरपि न सर्वगुणनिषेधे निषेधे तात्पर्यं; अन्यथा 'एतस्य वा अक्षरस्य प्रशासने' इति श्रुतौ प्रशासनोक्तिरेव जरद्गववाक्यतुल्या भवेत् । अत एव सर्वलौकिकगुणनिषेधपूर्वकं प्रशासनाद्यलौकिकगुणविधान एव हृदयं श्रुतेः व्यक्तमनुभूयते । 'यदा पश्यः पश्यते रुक्मवर्णं'इति श्रुतावपि 'रुक्मवर्णे'त्यादिविशेषणपञ्चकं चमत्कृतिजनकं अनेकार्थगर्भितं विशिष्टार्थवदस्ति ॥ 'रुक्मवर्णे'ति विशेषणेन 'दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता,' 'आदित्यवर्णं तमसः परस्तात्' इत्यादिवाक्यानां प्रत्यभिज्ञानं भवति । एवमस्य विशेषणस्य नारायणपरतत्त्वनिर्णायकत्वं वैष्णवमतपोषकत्वं शैवमतालोचकत्वं चोपलभ्यते । 'कर्तारं

योनि'मिति विशेषणद्वयस्य अभिन्ननिमित्तोपादानसिद्धान्तसमर्थकत्वमस्ति । 'पुरुषं रुक्मवर्णम्' इति विशेषणद्वयस्य अद्वैतालोचकत्वं वैष्णवसिद्धान्तसमर्थकत्वं चोपलभ्यते । ईशमिति विशेषणमपि अद्वैतिस्वीकृतराद्धान्तालोचकं वैष्णवाभ्युपेतसगुणवादोपोद्वलकमवलोक्यते । अत्र विशेषणार्थक्रमस्त्वित्थम्–ईशेति प्रथमं विशेषणम्, एतेन ब्रह्मण ऐश्वर्यगुणवैशिष्ट्यं सिद्धम्; तदनन्तरं नैयायिकवैशेषिकान् एतदैश्वर्यव्यक्तप्रदर्शनपरं अभिन्ननिमित्तोपादनतासमर्थकं 'कर्तारं योनि'मिति विशेषणद्वयमस्ति । तदनु दैवीमीमांसाप्रत्यभिज्ञापकं 'पुरुषं रुक्मवर्णम्' इति विशेषणद्वयं वरीवर्ति । एतेनैतदध्यवसितं यत्–परब्रह्ममहाविष्णुर्नारायणः कृष्ण एव । एतच्छ्रुतिविमर्शेन सर्वाधिकलाभस्त्वयं संवृत्तः–यदेतादृशविशेषणविशिष्टब्रह्मदर्शनस्यैव मोक्षसाधकत्वं प्रदर्शितम् । एतद्दर्शनमपि 'पश्ये'ति पदेन ज्ञानिनः, न तु भ्रान्तस्य इति तत्त्वज्ञानसामयिकमेतत् न भ्रमसामयिकम् । अविद्यारोपितसकलानर्थमूलसांसारिकभ्रान्तिप्रत्ययनिवारकम् तु तत्त्वज्ञानमेव भवति न त्वतत्त्वज्ञानं; अन्यथा अद्वैतसिद्धौ दृश्यत्वहेतोः परिष्कृतरूपकथनावसरे शब्दाजन्यवृत्तिविषयत्वं दृश्यत्वमित्येव उक्तहेतोः परिष्कृतस्वरूपं विवरणानुयायिनः न प्रतिपादयेयुः, किन्तु भामतीमतानुसारेण वृत्तिव्याप्यस्य मिथ्यात्वमेव तैरङ्गीक्रियेत । किन्तु 'तत्त्वज्ञानमेव मोक्षसाधन'मिति सिद्धान्तं द्रढयितुं विवरणानुसारिविद्वद्भिः भामत्यनुयायि साजात्यं परित्यक्तम् । अतः यद्येतद्गुणविशिष्टं ब्रह्मदर्शनं शुद्धदर्शनमित्यङ्गीक्रियेत तदैव तस्य मोक्षसाधनत्वं, न तु शबलदर्शनतया । शबलस्य तु मायाकामधेनुवत्सरूपत्वेन स्वयं भ्रमरूपतया तद्दर्शनस्य मोक्षसाधनत्वं कथं शक्यम् ? । एतेन सर्वोत्तमस्तोत्रमङ्गलाचरणरूपा 'प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपम् निगमप्रतिपाद्यं स्तौमि' इत्येषा श्रीमत्प्रभुचरणप्रतिज्ञा सुस्थिरैव । एवं वैष्णवसम्मतसगुणनिर्गुणव्याख्याया वेदानुकूलयुक्तिसाङ्गत्यं प्रादर्शि । अत एव श्रीमधुसूदनसरस्वत्यः श्रीगीताव्याख्यायां एतदेव समर्थयन्ति तत् तेषां पद्येनैव स्फुटीभवति । इत्यतः श्रीमधुसूदनोक्तिरेव उद्ध्रियते–'पराकृतनमद्बन्धं परंब्रह्म नराकृति । सौन्दर्यसारसर्वस्वं वन्दे नन्दात्मजं महः ॥' अत्र 'परंब्रह्म नराकृति' इति पदद्वयम् अप्राकृतनिखिलधर्मरूपम् शुद्धम् तथा साकृति इति श्रीप्रभुचरणोक्तशब्दैः सह सर्वथा समानार्थकम् इत्यभिन्नमेव तात्पर्यम् उभयोरपि महानुभावयोः । श्रीमधुसूदनसरस्वतीनाम् हृदयं सर्वथा वैष्णवभावपरिपूर्णम्, एतत्साक्षितया भिन्नभिन्नस्थलीया तदुक्तिरेव अस्माभिरुपन्यस्यते । तत्र तावद् गीताव्याख्यायां 'प्रमाणतोऽपी'त्युक्तिः सर्वथा वैष्णवभावपरिपूर्णतां तेषां दर्शयति । अद्वैतसिद्धावपि निर्गुणवादानन्तरमव्यवहिततया 'वंशीविभूषिते'ति पद्ये प्रौढिपूर्विका स्पष्टोक्तिरपि तेषां हृदयं उच्चतरवैष्णवभावपरिपूर्णमिति परिचाययति । तथा सगुणनिर्गुणशब्दार्थव्याख्या वैष्णवसम्मतैव तेषां हृदयेऽस्तीति प्रमाणयति । सगुणनिर्गुणश्रुतिवाक्यव्यवस्थाविचारे अपच्छेदन्यायस्य अनियतविरोधपौर्वापर्यविषयतया अप्रसर इति गुणप्रतिपादकवचनानामबाध्यत्वेगुणप्रतिपादकवचनबाधाविरह एव अस्मदभ्युपेतां सगुणनिर्गुणशब्दार्थव्यवस्थां व्यवस्थापयति इति सर्वम् अस्मदुक्तम् निरवद्यम् । इति शम् ।

श्रीकुसुमप्रभानाम्नी पद्यमयब्रह्मवादग्रन्थव्याख्या ।

चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः ।
स्वीयानां तान्निजाचार्यान् प्रणमामि मुहुर्मुहुः ।
यदनुग्रहतो जन्तुः सर्वदुःखातिगो भवेत् ।
तमहं सर्वदा वन्दे श्रीमद्वल्लभनन्दनम् ॥

श्रीमद्हरिरायचरणाः सर्वथाप्रमाणविरहितकुतर्ककल्ककल्पितमायावादध्वान्तेनान्धेतमसि निमग्नान् अज्ञानान्धीभूतान् निखिलजनसंप्रतिपन्नधर्मादिपुमर्थचतुष्टयेऽपि महामोहग्रस्ततया मोमुह्यमानान् जनानवलोक्य तदुद्दिधीर्षया महाकारुणिकसान्निध्यमात्रदत्तश्रीकृष्णप्रेमा–विमुक्तिद–वाक्पतिरूप-श्रीकृष्णास्य-भक्तिमार्गाब्जमार्तण्ड-स्वदासार्थकृताशेषसाधन–करुणावरुणालय-जगद्गुरुश्रीमद्वल्लभाचार्यमुखसरसीरुहविनिर्गतम् उपनिषद्हृदयरूपम् ब्रह्मवादराद्धान्तमुपदिदिक्षवः ब्रह्मवादाभिधेयं ग्रन्थद्वयं विरचयांचक्रुः । गद्यमयमेकम् अपरं च पद्यपरिपूर्णम् ॥ गद्यमयब्रह्मवादग्रन्थव्याख्यां विधाय अयं पद्यात्मकब्रह्मवादग्रन्थोऽपि सर्वथा व्याख्येय इत्यस्य व्याख्यानं नातिविस्तृतनातिसंक्षिप्तसरण्या विधीयते ॥ तत्र तावत् 'यत्तदद्रेश्यमग्राह्यं' 'परांचि खानि व्यतृणत् स्वयंभूः' इत्यादिश्रुतिभिः ब्रह्मणः अप्रत्यक्षतया प्रत्यक्षप्रपंचाभेदः कथं प्रतिपाद्यते? । नह्यप्रत्यक्षाप्रत्यक्षयोरैक्यं संभवति, परस्परं विरोधात् । प्रत्यक्षसहानवस्थायि अप्रत्यक्षं कथम् प्रत्यक्षाभिन्नं भवितुमर्हति ? प्रसिद्धप्रत्यक्षाप्रत्यक्षव्यवहारविलोपप्रसङ्गात् ; अतः ब्रह्मप्रपंचयोर्यद्यभेदः प्रपंचप्रत्यक्षे ब्रह्मापि प्रत्यक्षं भवतीति 'परांची'त्यादिश्रुतिबाधः, साक्षात्कारसाधनानां साधनबोधकवाक्यानां च वैयर्थ्यं भवेत् ॥

प्रापंचिकपदार्थदर्शनमेव ब्रह्मदर्शनं इति प्रापंचिकघटपटादिद्रष्टार एव ब्रह्मज्ञानिनः संवृत्ता इति सर्वथा याज्ञवल्क्यशुकादिब्रह्मविच्छ्रेष्ठमाहात्म्यविलोपकोऽयं पक्ष इति त्याज्योऽयं शिष्टैर्वैदिकैः इत्याशंकां प्रदर्शयन्ति–

ब्रह्माभिन्नः प्रपञ्चश्चेत् अस्मद्दृग्विषयः कथम् ।
ब्रह्मभिन्नः प्रपञ्चश्चेत् ब्रह्मविद्विषयः कथम् ॥ १ ॥

ब्रह्माभिन्नः प्रपंचश्चेदिति । यदि ब्रह्मप्रपंचयोरभेदः ब्रह्माभिन्नप्रपंचस्य ब्रह्मरूपतया लौकिकजनदृश्यत्वं कथं संभवति? 'यत्तदद्रेश्य' मित्याद्यनेकश्रुतिविप्लवप्रसङ्गो ह्यत्र बाधकस्तर्कः । तस्मात् ब्रह्मप्रपंचाऽभेदवादिभिः प्रपंचस्यास्मद्दृग्विषयता सर्वथैवास्वीकार्या । तदैव 'परांची'त्यादिश्रुतिसंरक्षणं भवति, अन्यथा अनेकवैदिकवचनव्याकोपप्रसङ्गः, किंच अवतारवैयर्थ्यप्रसङ्गः । ब्रह्मणः सर्वदा सर्वजनदृश्यता प्रागेव सिद्धेति अवतरणं निष्प्रयोजनमेव स्यात्, किन्तु प्रपंचदर्शनानङ्गीकारे तु सर्वव्यवहारविलोपप्रसङ्गः अन्धीभावश्च शिरसि आपतेदिति नैवमपि आपत्तिविनिर्मुक्तिः । यद्युच्येत एतद्दोषपरिहारार्थं ब्रह्मप्रपंचभेद एवाभ्युपगमनीयः, नैतदपि वक्तुं शक्यते इत्याहुः–

ब्रह्मभिन्नः प्रपंचश्चेदिति। ब्रह्मज्ञानिनां प्रतीतौ सर्वत्र ब्रह्मविषयत्वं तु अनुक्तसिद्धम्, ब्रह्मप्रपंचभेदाङ्गीकारे तु ब्रह्मवेत्तॄणां श्रीशुकयाज्ञवल्क्यादीनामपि प्रपंचादर्शनप्रसङ्गः। तथा सति जनकविष्णुरातादिशिष्यात्मकप्रपंचादर्शनेन औपनिषत्संवादश्रीभागवतादिप्रवृत्तिरेव न भवेत्, अतः ब्रह्मविदामपि प्रपंचदर्शनमस्तीत्यङ्गीकार्यमेव सर्वथा। अत एव वामदेवांभृण्यादिभिः 'अहं सुवे पितरमस्य मूर्धन्' 'अहं राष्ट्री सङ्गमनी वसूनां,' 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्,' 'तद्धैतत् पश्यन् ऋषिः वामदेवः प्रतिपेदे' 'अहं वै मनुरभवं सूर्यश्चे'त्यादिवचनैः सूर्यादिप्रापंचिकपदार्थप्रतीतिपूर्वकमेव सूर्यादीनां स्वसमवायित्वेन (स्वोपादानकत्वेन) स्वाभिन्नकार्यत्वेन च व्यपदेशः कृतः—'अहं वै मनु' रिति। किंचात्र 'अहं वै मनुरभव' मित्यनेन 'अहं सुवे' इत्यादिना च स्वव्यापारेण सूर्याद्यभिव्यक्तिकथनात् विवर्तपक्षोऽपि अर्थादुन्मूलितः। रजतोत्पादने दर्शने वा शुक्तिव्यापारलेशस्याप्यननुभवात्। एतेन विवर्तपक्षनिराससूचनेन बाधार्थसामानाधिकरण्यादीनामपि अनवसरग्रस्तत्वप्रदर्शनेन च ब्रह्मात्मकत्वेन प्रापंचिकपदार्थप्रतीतिः ब्रह्मविदामप्यस्तीति न सर्वथा ब्रह्मभिन्नत्वनिरूपणं अपि निष्प्रत्यूहम् इति महतीयं उभयतःपाशा रज्जुरित्याहुः—

> **अतोऽभेदस्तथा भेदः शक्यते वदितुम् कथम्।**
> **इति चेन्न यथा ब्रह्म रूप्यते तत्प्रपंचयोः॥ २॥**

अतोऽभेदस्तथा भेद इति। अत्र आक्षेपार्थककिंशब्दनिष्पन्नोऽयं 'कथं'शब्दः आक्षेपार्थकः, न प्रश्नार्थकः। यतः पूर्वोक्तरीत्या भेदाभेदयोरुभयोरपि निरूपणमशक्यं, अतः भेदः अभेदो वा ब्रह्मप्रपंचयोर्नैव निर्वक्तुम् शक्य इति आक्षेपगर्भमिदं वचनम्; **अतोऽभेद** इत्यारभ्य **शक्यते वदितुम् कथमि**त्यन्तम्। एवमन्ततो गत्वा घट्टकुटीप्रभातन्यायेन अनिर्वचनीयतावाद एव पर्यवसानं भवतीति ब्रह्मवादसिद्धान्तासिद्धिः। तदेतद्वार्तम्। तथा हि—अनिर्वचनीयतावादिमते ब्रह्मास्तित्वमभ्युपगम्यते न वा?। न द्वितीयः। तथा सति तथागतमतप्रवेशप्रसङ्गः। प्राच्यपक्षस्वीकारस्तु अपौरुषेयतया निरस्तसमस्तदोषाशंके स्वतःसिद्धप्रमाणभावे वेदे स्वतःप्रामाण्याभ्युपगमनैव शब्दैकवेद्यविषये इतरप्रमाणप्रसरावरोधेनैव च भवति नान्यथा। अत एव अनिर्वचनीयतावादिकुलकूटस्थरूपैः श्रीशंकरभगवत्पादैरपि (२ अ. १ पा.) 'दृश्यत' इति सूत्रे 'रूपाद्यभावात् नायमर्थः प्रत्यक्षस्य गोचरः, 'लिङ्गाद्यभावाच्च नानुमानादीनाम्, आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्' इत्येव न्यरूपि। 'योनिश्चे'ति सूत्रेऽपि भगवत्पादाः पूर्ववदेव निरूपयन्ति—'न लोकवदिह भवितव्यम्', शब्दगम्यस्यास्यार्थस्य यथाशब्दमिह भवितव्यम्'॥ शिष्टापरिग्रहाधिकरणेऽपि भगवत्पादैः 'तुल्यमत्रापि परमगंभीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्याप्रतिष्ठितत्वं अन्यथानुमानेऽप्यविमोक्षः आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणम् इत्यादिवचनैरयमर्थोपोद्वलितः।

'विकरणत्वान्ने'ति सूत्रेऽपि श्रीमत्शंकराचार्यैः श्रुत्यवगाह्यमेवेदं अतिगंभीरं ब्रह्म न तर्कावगाह्यम्' इत्येवोक्तम् ॥ 'योनिश्चे'ति सूत्रभामत्यां वाचस्पतिमिश्रैरपि "–'आगमात् तत्सिद्धि' रिति चेत् हन्त तर्हि यादृशमीश्वरमागमो गमयति तादृशोऽभ्युपगन्तव्यः'–" इत्यनया पंक्त्या पूर्वोक्त एव सिद्धान्तः समर्थितः ॥

अतः शब्दैकवेद्यविषये यथाशब्दमेवानुसरणं विधेयं। शब्दः यथा ब्रह्म बोधयति तथैव ब्रह्मप्रपंचयोरभेदमपि बोधयति। कार्यकारणाभेदस्यापि शब्दैकसमधिगम्यत्वं तु भगवता व्यासेन तदनन्यत्वाधिकरणे 'आरंभणशब्दादिभ्य' इति हेतुमुपन्यस्यता 'वाचारंभण'मित्यादिश्रुतिवचनानि च सूचयता सुव्यक्तं साधितम्। तस्मात् शब्दैकसमधिगम्ये कार्यकारणाभेदे प्रत्यक्षतर्कादिविरोधोद्भावनमपि अनवसरपराहतं इत्याहुः– ब्रह्म यथा रूप्यते इत्यारभ्य स्पष्टमेव निरूपित इत्यन्तम् ॥ स्पष्टनिरूपणोक्त्या निःसन्दिग्धत्वं ध्वनितम् ॥ अत्र यथेति पदेन केवलशब्दगम्यत्वं सूचितम् ॥ तेन शब्देतरप्रत्यक्षतर्काद्यप्रसरः अत्र सूच्यते। अतः ब्रह्मसिद्धिरिव कार्यकारणाभेदसिद्धिरपि वेदेनैव भवति इति ब्रह्मप्रपंचयोः अभेदः सर्वथाभ्युपेय एव। निरस्तसमस्तदोषाशंकस्य स्वतःसिद्धप्रमाणभावस्य वेदस्याक्षरमात्रमपि नान्यथयितुं शक्यम् ॥ अतः यदि अङ्गीकरोषि ब्रह्म अङ्गीकुरुष्वाभेदमपि ॥ शब्दैकवेद्ये प्रमेये शब्दशब्देतरप्रमाणयोः समुपस्थिते विरोधे इतरप्रमाणस्यैव बाध्यत्वमङ्गीकार्यं, न तु शब्दस्य। शब्दबाधस्वीकारे तु वैनाशिकार्धवैनाशिकगोष्ठीप्रवेश एव भवति इति वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे निपातः। अतः अकृत्वा शब्दबाधं कामं प्रत्यक्षमेव बाध्यताम् इत्याहुः–

सर्वोपनिषदाऽभेदः स्पष्टमेव निरूपितः।
अतोऽसत्प्रत्ययो भ्रान्तो मायाधूतविलोकनात् ॥ ३ ॥

अतोऽसत्प्रत्यय इति। यद्वा अस्तु शब्दैकसमधिगम्ये ब्रह्मणि प्रत्यक्षतर्काद्यप्रसरः, न वयं स्वतन्त्रकेवलतर्कविरोधेन अभेदो नोपपद्यते इति ब्रूमः, अपि तु आपण्डितपामरप्रसिद्धप्रत्यक्षविषयप्रपंचस्य ब्रह्माभेदाभ्युपगमे ब्रह्मणोऽपि प्रत्यक्षगम्यत्वं भवति तत्तु 'पराञ्ची' त्यादि श्रुतिविरुद्धम् इत्यतः अभेदोऽनुपपन्न इत्यस्माकं पर्यनुयोग इति चेत्,– अज्ञस्य प्रापंचिकपदार्थप्रत्यक्षे विषयताविशिष्टविषयदर्शनं भवतीति पदार्थानां शुद्धब्रह्मांशतयाऽस्फुरणात् न प्रत्यक्षविषयं ब्रह्म भवतीति 'परांची'त्यादिश्रुतिविरोधावकाश एव नास्तीत्याहुः–**अतोसत्प्रत्ययो भ्रान्तः इति।** यद्यपि घटादीनां विषयतात्वं नास्ति तथापि चिदंशप्रतिकूलजडादिरूपेण स्फूर्त्या चिदंशाऽप्रतिकूलसदंशरूपब्रह्मांशत्वेनास्फुरणात् 'यत्तदद्रेश्यम्' इत्यादि वचनानां विरोधावकाश एव नास्तीति सुधीभिर्विभावनीयम्। अथवा पूर्वोदाहृतश्रुतीनामंशिपरत्वेन योजनास्तीति स्वीकारे विषयताविशिष्टविषयरूपेण ब्रह्मांशरूपघटपटादिदर्शनेऽपि नांशिनः प्रत्यक्षविषयत्वं भवतीति परांचीत्यादि श्रुतिविरोधचर्चापि वियत्प्रसूनायितैवेत्याहुः–**अतोऽसत्प्रत्ययो भ्रान्त इति।** 'भ्रान्त' इत्यनेन

विषयताविशिष्टविषयदर्शनसूचनेन विषयस्य स्वरूपतः शुद्धत्वेऽपि अज्ञभाने विषयतावैशिष्ट्येन न शुद्धरूपप्रतीतिरिति ब्रह्मप्रपंचाभेदे ब्रह्मणोऽपि प्रत्यक्षविषयतया परांचीत्यादिश्रुतिविरोधचर्चापि दूरतः परिवर्जनीयेत्याहुः–**मायावृतविलोकनादिति** ॥ यतोऽभेदः प्रमाणमूर्धन्येन वेदेन सिद्ध्यति, अतः व्यामोहिका मायाकार्यरूपाऽविद्याकार्यविषयतावृतविषयदर्शनात् असत्प्रत्ययस्य भ्रान्तत्वमित्यर्थः।

बाधितस्यैव भ्रान्तत्वमिति नियमसंरक्षणाय बाधमपि प्रदर्शयन्ति–

उत्पन्ने ब्रह्मविज्ञाने सद्यस्तद्बाधदर्शनात् ।
अवास्तवं रूपमेतत् वाचारब्धं विकारि यत् ॥ ४ ॥

उत्पन्ने ब्रह्मविज्ञाने इति। ब्रह्मज्ञानानन्तरं विषयताया बाधो भवति इति बाधितत्वमपि विद्यतेति सुखेन भ्रान्तत्वसिद्धिः। बाधोपयोगिनीं अवास्तवतां प्राहुः–**अवास्तवं रूपमेतदिति**। यदेतत् विषयतात्मकविकारावृतम् (विषयतारूपविकारविशिष्ट) रूपं दृश्यते तद्वाचारब्धं अवास्तवं चेत्यर्थः। नानेन घटपटादिनामधेयस्य अवास्तवत्वमुपपाद्यते, किन्तु विकारस्य केवलवाचारब्धनामधेयस्यावास्तवत्वमुच्यते; अतः बाधितस्यैव भ्रान्तत्वमवास्तवत्वं च सिद्ध्यति। बाधितस्यैव भ्रान्तमिथ्यात्वमित्यत्र श्रीमत्शंकराचार्यसम्मतिरप्यवलोकनीया। तथा हि 'वैधर्म्याच्चे'ति सूत्रे स्वप्नजाग्रदवस्थयोः वैधर्म्यप्रदर्शनाय वदन्ति, किं पुनः वैधर्म्यं बाधाबाधाविति ब्रूमः। बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य मिथ्यैव मयो [redacted] इति नह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रान्तिरुद्बभूवेति। पत्तद्धोमहाजन— समागम—

एवं श्रीशंकराचार्यसम्मतिरपि अस्मदिष्टमेव साधयति। वाचस्पतिमिश्रा अपि अस्मिन्नधिकरणे एतदेव समर्थयन्ति 'बाधाबाधौ वैधर्म्यम्' तेन हि स्वप्नप्रत्ययो बाधितो मिथ्येति अवगम्यते। तस्मात् बाधाबाधाभ्यां वैधर्म्यात् न स्वप्नप्रत्ययदृष्टान्तेन जाग्रत्प्रत्ययस्य शक्यं निरालम्बनत्वमध्यवसातुम्' इति कथयन्तः। एवं वाचस्पतिमिश्रसम्मतिरपि अस्मदनुकूलैव ॥ एवं बाधितस्य अवास्तवत्वं भ्रान्तत्वं विषयताया ब्रह्मज्ञानबाधितत्वं च निरूप्य विषयताविशिष्टविषयदर्शने यदेतत् वाचारब्धं अवास्तवं विकारिरूपं दृश्यते कुत्सितत्वान्योन्याभावादिविशिष्टं तत् ब्रह्मज्ञानपर्यन्तमेव तिष्ठति। आविर्भूते तु ब्रह्मविज्ञाने भ्रान्तिरूपतया दृश्यमानानृतस्य स्वप्रतीतिकारणीभूतायां अन्यथाप्रतीतिहेतुरूपायां विषयतात्मिकायां अविद्याशक्तौ लयः अन्यथाप्रतीतिरूपायाः शक्तेः स्वजनन्यां अविद्यायां लयः अविद्यायाः स्वकारणरूपायां व्यामोहिकामायायां लयः व्यामोहिकामायायाश्च ब्रह्मणि लय इति अज्ञदशायां यत्र अनृतभानमासीत् तत्र ब्रह्मैवावशिष्यते इति ब्रह्मण एव भानात् अनृतस्य न सर्वथा भानं इति वदन्ति–

ब्रह्मबोधेऽनृतस्यापि ब्रह्मत्वात् प्रत्ययस्तथा ।
यावद्बोधं सत्यस्यासत्यस्य कथनं पुनः ॥ ५ ॥

ब्रह्मबोधेऽनृतस्यापि ब्रह्मत्वात् प्रत्ययस्तथा इति ॥ ब्रह्मबोधानन्तरं अनृतस्यापि पूर्वोक्तपरंपरया ब्रह्मणि लय इति अनृतभानप्रदेशे ब्रह्मभानमेवावशिष्यते, अतः अनृतस्य ब्रह्मत्वात् ब्रह्मत्वेनैव प्रत्ययः इति कारिकार्थः। अनृतस्य ब्रह्मोपादानकत्वं तु नैव संभवति, येन सुवर्णं कुण्डलमितिवत् स्वोपादानककार्यकारणभावेन सामानाधिकरण्यव्यपदेशो भवेत्, अतः अविद्योपादानकत्वेन अनृतस्थले बाधार्थसामानाधिकरण्यस्य स्वीकारः। सत्यस्थले तु कार्यकारणभावरूपसामानाधिकरण्याङ्गीकारः। ब्रह्मवादिमते विषयतारूपान्तरासृष्टेः अनृततया अविद्योपादानकत्वमेवेति सर्वथा ब्रह्मोपादानकत्वाभावेन कार्यकारणभावरूपसामानाधिकरण्यस्य कथनं असंभवग्रस्तमेवेति अस्मदुक्तपद्धत्यैव अनृतस्य ब्रह्मत्वात् इत्यस्यार्थोऽभ्युपेयः॥ ब्रह्मज्ञानपर्यन्तमेवान्तरासृष्टिरूपं अनृतं भाति, ब्रह्मज्ञानानन्तरं तु स्वप्रतीतिकारणलयात् अनृतभानमेव न भवति इति इदं सत्यं इदं असत्यं इत्यादिकथनं तु ब्रह्मबोधावधिरेव। आविर्भूते तु ब्रह्मबोधे सर्वत्रापि ब्रह्मदर्शनं भवति इति मृषापदार्थस्यैवाननुभवात् सर्वत्र सर्वात्मकब्रह्मभानमेव भवति इति साधूक्तं–'यावद्बोधं तु इत्यारभ्य 'नानृतं किंचिदस्ति हि' इत्यन्तम्॥

पश्चात् सर्वस्य सर्वत्वं नानृतं किंचिदस्ति हि।
देहादयोऽनृतं तावत् यावत् कार्यतया मतिः॥ ६॥

ब्रह्मबोधपर्यन्तमेव इदं सत्यं इदं असत्यं इति कथनं भवति। अपरोक्षब्रह्मबोधाविर्भावे तु सर्वस्य सर्वात्मकब्रह्मरूपत्वमेव संपन्नमिति सर्वथा अनृतभानाभावात् अनृतविषयज्ञानस्यैवाभावः तदा यावत् ज्ञानानां प्रमारूपत्वमेवेति कारिकार्थः॥ ननु ब्रह्मवादे देहादिमिथ्यात्वानभ्युगमे 'देहं मनोमात्रमिमं गृहीत्वा' इत्यादि श्रीभागवतवचनविरोध आयातीति देहमिथ्यात्वमेव स्वीकरणीयं इत्याशंकामपनयन्ति–देहादयोऽनृतं तावदिति॥ देहादीनामपि न स्वरूपतो मिथ्यात्वं, किन्तु ममतारूपविषयतावैशिष्ट्येनैवेति यावत् विषयतावृतकार्यदर्शनं भवति तावदेव अनृतत्वं, अविद्याकार्यरूपविषयतानिवृत्तौ तु शुद्धब्रह्मांशत्वस्यैव स्फुरणं इति सर्वथा नानृतत्वं ब्रह्मांशतया ब्रह्मरूपत्वमेवेति पद्यतात्पर्यार्थः। 'कार्यतया मति'रित्यस्य अविद्याकार्यावृततया दर्शनमित्यर्थः। अत्र मतिशब्दस्य तात्पर्यवृत्त्या भानार्थकतैवाङ्गीकरणीया, तदैव सिद्धान्ताविरोधः ग्रन्थस्वारस्यसंरक्षणमपि। मतिशब्दप्रयोगस्तु विषयताभ्रमस्यान्यख्यातित्वप्रदर्शनार्थम्। 'तया व्यामोहिता बुद्धिः पदार्थान् अन्यथा मन्यते न तु पदार्था अन्यथा भवन्ति' इति श्रीसुबोधिन्युक्तेः। 'व्यामोहिकामायाजीवं व्यामोहयित्वा तदीयबुद्धौ प्रापंचिकसद्वस्तुसदृशं मायिकपदार्थमुत्पाद्य पुरःस्थितविषये प्रक्षिपति' इति प्रमेयरत्नार्णवोक्तेश्च। ममतारूपविषयतात्मकविशेषणविशिष्टे उक्तं मिथ्यात्वं तु सविशेषणे हीति न्यायेन विषयतारूपविशेषणसम्बद्धमेव भवति, विशेष्ये मिथ्यात्वं तु ब्रह्मप्रपंचाभेदप्रतिपादकश्रुतिभिः बाधितम् इति। विशिष्टे मिथ्यात्वोक्तिस्तु शिखीध्वस्तेत्युक्तिसदृशैवेत्यलमतिपल्लवितेन। एतत्तु फलानुभवकर्तृ-उत्कृष्टदशायुक्तभक्तानामनुभवेनापि दृढीकुर्वन्ति–

देहादिष्वपि भक्तानां वियुक्तानां हरेर्मतिरित्यनेन। वियुक्तानां उत्कृष्ट-भक्तानां देहादिष्वपि हरिदर्शनं भवति। 'कृष्णोऽहं पश्यत गतिं' इति वचनात्।

तन्निवृत्तौ पुनः सर्वं ब्रह्मरूपं न संशयः।
देहादिष्वपि भक्तानां वियुक्तानां हरेर्मतिः॥ ७॥

मतान्तरासक्तिनिवृत्त्यभावे का हानिः इत्याहुः-

कार्यं च तादृशं लीलानुकृतौ तेषु दृश्यते।
एवं शुद्धो ब्रह्मवादो यद्यायाद् हृदये सताम्॥ ८॥
तदा मतान्तरासक्तिः अपि यायान्न चान्यथा।
मतान्तरेऽन्यथाबुद्धेः फलमप्यन्यथा भवेत्॥ ९॥

श्रीहरिसदृशकार्यं लीलानुकृतिरपि दृश्यते इति देहादीनां न स्वरूपतः मिथ्यात्वं इति अस्मादुक्तपद्धतेरेवौचित्यम्। एवंप्रकारेण ब्रह्मवादः यदि सतां हृदये स्थिरो भवेत् तदैव ब्रह्मवादातिरिक्तमतान्तरासक्तिनिवृत्तिर्भवेत्, अन्यथा निवृत्त्युपाय एव नास्तीत्याहुः-'एवं शुद्धो ब्रह्मवादः' इत्यारभ्य 'यायान्न चान्यथा' इत्यन्तम्।

मतान्तरेति। मतान्तरे या आसक्तिः सा तु अन्यथाबुद्धिरूपा इति अन्यथा-बुद्धेः फलमपि अन्यथा भवेत्॥ 'योऽन्यथा सन्त'मिति वचनात्, तत्त्वज्ञानाभावाच्च। अतः अन्यथाफलप्राप्तिनिरासार्थं मनागपि यत्किंचिदपि मनः अन्यथा मा क्रियताम्। मनसः अन्यथाभावे तु सत्फलाप्राप्तिरसत्-फलप्राप्तिरूपा महती हानिर्भवेत्, मनसि संशयस्थितावपि 'संशयात्मा विनश्यति' इति वचनोक्तादशा भवेत् इति एवं सर्वथा न करणीयं। ब्रह्मवादसिद्धान्तस्तु अलौकिक इति स एव सर्वथा सर्वदा भावनीय इति वदन्ति-'मनो मनागपी'त्यारभ्य 'ब्रह्मवादमलौकिक'मित्यन्तम्।

मनो मनागपि नहि क्रियतां संशयास्पदम्।
हृदा सदा भावयन्तु ब्रह्मवादमलौकिकम्॥ १०॥
विचार्य वल्लभाचार्यं प्रचार्य मतमार्यजाः।
विदार्य संशयं कार्यमनार्यमतदूषणम्॥ ११॥

एवं नातिविस्तृतनातिसंक्षिप्तसरण्या ब्रह्मवादविवरणं विधाय एतत्कथनफलं उपदेशमुखेनाहुः-विचार्य वल्लभाचार्यं इति। श्रीमद्वल्लभाधीशं परिचिन्त्य संशयं 'सर्वथा दूरीकृत्य अनार्यमतदूषणपूर्वकं आर्यैः (वैदिकैः) ब्रह्मवादसिद्धान्तप्रचारो विधेयः इति श्लोकार्थः॥

श्रीवल्लभाधीशकृपाप्रसादसिद्धिरस्तु॥

इति श्रीसाकारब्रह्मवादैकस्थापक–सर्ववादिनिरासकृत्–मायावादनिराकर्तृ–अदेय-दानदक्ष–श्रीमन्महाप्रभुश्रीवल्लभाचार्यभृत्यभृत्येन श्रीमत्प्रभुचरणानुग्रहेण निरस्तसंशयेन श्रीगोकुलेशश्रीहरिराय-श्रीपुरुषोत्तमचरणादिमहानुभावानुचरेण श्रीनन्ददासादिमहा-भागवतचरणरजोभिषिक्तेन तेनैवात्मानं धन्यतया मन्यमानेन जगद्गुरुश्रीवल्लभाचार्य-वंशजविश्रुतयशःपटहपरिपूरितदिगन्तरविद्वदाश्रयरूपश्रीमद्गोकुलनाथाचार्यात्मजेन अनुकंपास्वरूपश्रीकुसुमप्रभामातृगर्भसंभवेन भगवदीयदासदासेन गोस्वामिदीक्षितेन विरचितेयं पद्यात्मकब्रह्मवादग्रन्थस्य श्रीकुसुमप्रभाव्याख्या परिपूर्तिमगात् ॥

श्रीमत्प्रभुचरणानुग्रहप्रसादसिद्धिरस्तु ॥

श्रीहरिरायमहानुभावप्रसादसिद्धिरस्तु ॥

एषा टीका मूर्तिमत्परोपकाररूपऔदार्यदयादिसकलसद्गुणविशिष्टयदुवंशोद्भव-श्रीश्रेष्ठिमूलजीपौत्रसज्जनाग्रगण्य-श्रीश्रेष्ठिरत्नसिंहसूनु-विनयविवेकादिसद्गुणविशिष्ट-चि.श्रीभूपेन्द्रकृते तथा च परमगीताभक्तगुरुभक्तिनिष्ठ-यदुवंशोद्भवश्रीश्रेष्ठिजीवनदासपौत्र-परमपूर्णसज्जनश्रेष्ठिकर्सनदासपुत्रविनयविवेकादिसद्गुणविशिष्ट- चि. श्रीकिशोरकृते च अनयोः पाठसमय एव निरतिशयकृपया हार्दिकप्रेम्णा च व्यलेखि ॥

सकलान्तरात्मा श्रीहरिः प्रसन्नोऽस्तु ॥ इति शम् ।

—:०:—

गोस्वामि-हरिरायजीविरचितो

गद्यमयब्रह्मवादः

अथेदं विचार्यते । ननु भक्तिमार्गे माहात्म्यज्ञानजननहेतुतयाऽऽनुकूल्येनोक्तः कोऽसौ ब्रह्मवादः ?

श्रीकुसुमप्रभानाम्नी गद्यमयब्रह्मवादग्रन्थव्याख्या ॥

चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः ।
स्वीयानां तान् निजाचार्यान् प्रणमामि मुहुर्मुहुः ॥
यदनुग्रहतो जन्तुः सर्वदुःखातिगो भवेत् ।
तमहं सर्वदा वन्दे श्रीमद्वल्लभनन्दनम् ॥

अथ श्रीमद्धरिरायचरणाः सर्गादौ अतिसंक्षिप्तसरण्या विधये भगवता प्रकाशितं कौन्तेयोद्धवयोः पुरतः पुनः नातिविस्तृतनातिसंक्षिप्तसरण्या प्रतिपादितं, अखण्डवरपण्डितप्रसृतचण्डपाषण्डवाक्-विखण्डनसुदक्ष,-द्वैपायनदर्शनमिहिर,-मायावादतूलाग्निरूप,-सर्ववादिनिरासकृत्,-वैनाशिकार्धवैनाशिकप्रतिपन्नपरतःप्रामाण्यारण्यानीप्रबलदावाग्निरूप,-श्रीव्रजसीमन्तिनीप्रवर्तितशुद्धपुष्टिभक्तिपुनःप्रकाशक,-प्रतिक्षणनिकुंजस्थरासलीलासुपूरित,-रासलीलैकतात्पर्य,-अदेयदानदक्ष,-जगद्गुरुश्रीवल्लभाचार्यचरणप्रकाशितं, ब्रह्मवादाख्यं राद्धान्तरत्नं प्रकाशयिषवः-स्वरूपवैलक्षण्यप्रयुक्ताऽद्वैतानुपपत्तिः १ भिन्नप्रतीत्यनुपपत्त्याऽद्वैतानुपपत्तिः २ शास्त्रे हेयत्वकथनप्रयुक्ता ब्रह्मात्मकत्वानुपपत्तिः ३ वेदान्ते प्रपंचस्य उपास्यत्वाकथनप्रयुक्ताऽभिन्नत्वानुपपत्तिः ४ जीवानां ब्रह्मरूपतया भजनानुपपत्तिप्रयुक्ता ब्रह्मात्मकत्वानुपपत्तिः ५ जीवानां ब्रह्मरूपतया अन्यूनत्वहेतुकभजनानुपपत्तिप्रयुक्ता ब्रह्मात्मकत्वानुपपत्तिः ६ अविद्यादिनिवर्त्यदोषाभावप्रयुक्ता भजनानुपपत्तिः ७ भजनस्य साधनत्वप्रयुक्ता पुष्टिमार्गत्वानुपपत्तिः ८ इच्छायाः करणत्वानुपपत्तिः ९ सहजहर्यंशजीवानां दैवासुरविभागानुपपत्तिः १० ब्रह्माऽभिन्नप्रकृतिलीनानां आसुरजीवानां अभेदप्रयुक्ताऽनन्दाननुभवानुपपत्तिः ११ प्रलयेऽपि भगवति प्रकृतिलये परंपरासम्बन्धप्रयुक्ताऽसुरजीवानां आनन्दाननुभवानुपपत्तिः १२ रूपद्वादशानुपपत्तिनिरसनपरं वादसरणिगुंफितं निगमरहस्यविचाररूपं इदं ब्रह्मवादाख्यं ग्रन्थं निर्मितवन्तः ॥ अस्मिन् ग्रन्थे ज्ञानभक्त्योरङ्गाङ्गिभावप्रदर्शनपुरःसरम् अङ्गभूते ब्रह्मवादे भक्त्यात्मके अङ्गिस्वरूपे च उक्तद्वादशानुपपत्तिप्रदर्शनपूर्वकं पूर्वपक्षमुत्थाप्य समाधाने सर्वानुपपत्तीः निरस्य सिद्धान्तरूपेण ब्रह्मवादः प्रस्थापितः ॥

अत्र १-२-३-४-१० अनुपपत्तिपंचकम् प्राधान्येन साक्षात् अङ्गसम्बद्धम् । अनुपपत्तिद्वयं ५-६- साक्षात् अङ्गिस्वरूपसम्बद्धमिव प्रतीयमानमपि फलतः प्राधान्येनाङ्गसम्बद्धम् ॥ अनुपपत्तिद्वयं ७-८-प्राधान्येन साक्षात् अङ्गिस्वरूपसम्बद्धम् ॥ एकानुपपत्तिस्तु-प्राधान्येन साक्षात् अङ्गिकारणसम्बद्धा । अनुपपत्तिद्वयं ११-१२- साक्षात् अङ्गिफलसम्बद्धमपि फलतः प्राधान्येन अङ्गसम्बद्धमिति विवेकः ॥

उच्यते-'एकमेवाद्वितीयं ब्रह्म,' 'पुरुष एवेदँ सर्वम्,' 'ऐतदात्म्य-

---

महदुपकारकस्यास्य ग्रन्थस्य व्याख्यानं निरतिशयावश्यकमिति मत्वा व्याख्याने प्रयत्नः कृतोऽस्माभिः । प्रतिपंक्ति अवतरणदानादिना पंक्तिघटकपदस्वारस्यप्रदर्शनपूर्वकं निर्णीतवाक्यार्थप्रकाशकं व्याख्यानमिदानीमारभ्यते ।

अत्र ग्रन्थारम्भे 'अथ'शब्दो मङ्गलार्थकः । इदं बुद्धिस्थं अग्रे वक्ष्यमाणं च विचारविषयीक्रियते इत्यर्थः । विप्रतिपत्तिमुखेन स्वमतं वक्तुं प्रथमतः विप्रतिपत्तिमेव उपस्थापयन्ति-**नन्विति** । श्रीव्रजपतिरतिरूपस्नेहात्मिकायाः भक्तेः 'माहात्म्यज्ञानपूर्वस्तु' इति पद्ये न माहात्म्यज्ञानपूर्वकतयैव लक्षितत्वम् । माहात्म्यज्ञानसिद्धिस्तु ब्रह्मवादेनैव भवति ब्रह्ममाहात्म्यस्वीकारात्; अतः माहात्म्यज्ञानानुकूलहेतुतया वाल्लभैः उक्तः ब्रह्मवादः कः, तत्र किं प्रमाणं, का वा युक्तिः, किं तस्य स्वरूपं? इत्येवं प्रमाणस्वरूपादिविषयकोऽयं प्रश्नः ॥ एवं प्रश्नार्थकतामनुसृत्य व्याख्यातम् ॥ यद्वा ब्रह्मकारणतावादो हि-ब्रह्मवादः, किन्तु कारणता त्रिधा भवति-परिणाम्युपादानरूपा, निमित्तरूपा, विवर्तोपादानरूपा चेति । अत्र कीदृशीं कारणतामभ्युपगम्य ब्रह्मवादशब्दार्थं उच्यते इत्युक्तं-**'कोऽसौ ब्रह्मवाद इति** । कारणतामनुलक्ष्य स्वरूपार्थविषयकोऽयं प्रश्नः ॥ अथवा माहात्म्यज्ञानजननहेतुताया ब्रह्मवादस्योक्ता सा नोपपद्यते । तथा हि-महिमैव माहात्म्यशब्दार्थः, महिमा तु धर्मरूपः इति निर्धर्मके निर्विशेषे ब्रह्मणि महिम[redacted] एवासंभवः । ननु श्रुत्या महिमा निरूप्यते इति चेत्-श्रुत्यैव निर्विशेषतापि उच्यते । तथा सति विरोध इति चेत्-आपाततः विरोधप्रतीतावपि वस्तुतः विरोधाभावात् । तथा हि-विशेषनिषेधकवचनानां परतया प्राबल्येन विशेषरूपमहिमबोधकवचनान्येव अन्यथा नेयानि ॥ अन्यथा नयनं तु मायिकतया अध्यारोपेणैव । तथा च मायिक(औपाधिक)गुणान् आरोप्य श्रुतिः निषेधतीति न विरोधलेशोऽपि । अध्यारोपापवादस्वीकारेण-परत्वमपि अध्यवसीयते । ननु परस्यैव प्राबल्यमित्यत्र किं विनिगमकमिति चेत्- अपच्छेदन्याय एवेति ब्रूमः । तथा हि-पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् इति सूत्रं पूर्वमीमांसाद्वादशलक्षण्यां पञ्चमेऽस्ति । अत्र उद्गातृप्रतिहर्त्रपच्छेदयोः पौर्वापर्ये परनिमित्तकप्रायश्चित्तस्यैवाऽनुष्ठेयत्वमुक्तम् । एवमपच्छेदन्यायेन परप्राबल्यसिद्ध्या निषेधवाक्यानामेव प्राबल्यं इति ब्रह्मणः सर्वथानिर्विशेषत्वमेवेति महिमैव नास्तीति माहात्म्यज्ञानचर्चापि दूरे स्थिता इति माहात्म्यज्ञानहेतुत्वादिकमपि कूर्मरोमायितमेव । अतः माहात्म्यज्ञानहेतुतया ब्रह्मवादसिद्धिरेव न भवति इति आक्षेपार्थकतापि किंशब्दस्येति विप्रतिपत्तिं निरूपयन्ति-**ननु भक्तिमार्गेत्यारभ्य कोऽसौ ब्रह्मवाद** इत्यन्तम् ॥ विप्रतिपत्तिं निरस्यन्ति-**उच्यते इति** । यत्तु निर्विशेषवादी आह 'निषेधवचनानां अपच्छेदन्यायेन परत्वात् प्रबलतया निर्विशेषब्रह्मसिद्धिर्भवति इति महि[redacted]शक्यनिरूपणीयतया माहात्म्यज्ञानहेतुतैव असंभवग्रस्ता' इति-तदविचारितरमणीयम् ॥ अनियतविरोधपौर्वापर्यविषयतया अपच्छेदन्यायस्य अत्र प्रसर एव नास्ति इति न तदनुरोधेन परत्वात् निषेधवचनानां प्राबल्यमङ्गी-

मिदं सर्वं', 'स वै सर्वमिदं जगत्' इत्यादिश्रुतिभिः प्रपञ्चरूपेणापि पूर्वं सन्नेव स्वस्याद्वयत्वेन तदतिरिक्तस्याभावात् स्वस्य क्रीडार्थमाधारत्वेन प्रपंचरूपं संपादयितुं तद्रूपेण आविर्भूतो भगवानेवेति श्रुतितात्पर्यरूपः।

करणीयम् । अत्र तु 'अध्यारोपापवादाङ्गीकारेण नियतपौर्वापर्यमूलकविरोधोऽस्तीति अत्र अपच्छेदन्यायस्य अनुपयोगितैव । एवं निषेधवचनप्राबल्याभावेन विधायकवचन-निषेधवचनयोः तुल्यबलतया वृत्तिसंकोचादिना व्यवस्थैव विधेया' इति निषेधवाक्यानां प्राकृतधर्मपरताभ्युपगमे प्राकृतधर्मानाश्रयत्वेऽप्राकृतनिखिलधर्मरूपता सम्पन्नेति सुखेन महिमसिद्धिः ॥

एवं महिमसिद्धिरिति माहात्म्यज्ञानजननहेतुतापि ब्रह्मवादस्य सुसंपन्नैवेति माहात्म्यज्ञानहेतुतया ब्रह्मवादसिद्धिः निष्प्रत्यूहा । एतत् सर्वं मनसि निधायोत्तरमाहुः–उच्यते इति । उत्तरे निर्दिष्टश्रुतिक्रमेणैव कीदृशी कारणतेति निरणायि ॥ प्रमाणाद्याकांक्षापरिपूर्तिः एकमेवेति क्रियते । तथा हि–'एकमेवाद्वितीयं ब्रह्म' 'पुरुष एवेदँ सर्वम्', 'ऐतदात्म्यमिदं सर्वम्', 'स वै सर्वमिदं जगत्' 'सर्वं खल्विदं ब्रह्म' 'तज्जलानिति शान्त उपासीत' इत्यादिभिः 'सदेव सोम्येदमग्र आसीदि'त्यादिश्रुतिभिश्च ब्रह्मप्रपंचयोरभेद उक्तः । अतः सूक्ष्मकार्यात्मकप्रपंचरूपेण सृष्टेः प्रागपि सन्नेव 'स एकाकी न रमते' 'स द्वितीयमैच्छत्' इत्यादिश्रुतिभिः स्वाभाविकव्यक्तरूपेण स्वस्याद्वितीयतया स्वरूपतो भिन्नस्वाभाविकव्यक्तद्वितीयस्याभावात् स्वरमणार्थं स्वरमणाधारत्वेन प्रपंचरूपं सम्पादयितुं स्वाभिन्नस्वांशरूपप्रपंचरूपेण भगवानेव आविर्भूतः इत्येवंरूपः श्रुतितात्पर्यरूपवैदिकव्यासदर्शनहृदयरूपः ब्रह्मवादसिद्धान्तः इति अवहितमनाः शृणु । अत्र निर्दिष्टश्रुतिक्रमोऽपि विमर्शयोग्यः इति विमृश्यते ।

'एकमेव अद्वितीय'मित्यनेन एकमेवेति शुद्धाद्वैतोपयोगिनीं कारणैकाकितां निरूप्य 'अद्वितीय'मित्यनेन समाभ्यधिकराहित्यं प्रपंचरूपेण परिणामस्य अविकृततासंरक्षकं अभिन्ननिमित्तोपादानोपयोगि चोक्तम् ॥ एतेन ऊर्णनाभौ अभिन्ननिमित्तोपादानत्वं दृश्यते अविकृतत्वं नास्तीति सूचितम् । चिन्तामण्यादीनामपि परिमितोत्पादकत्वमेव, ईदृशानन्तापरिमितब्रह्माण्डकोटिरचनामपि अभिन्ननिमित्तोपादानतया अविकृततया च करोतीति अनवगाह्यमाहात्म्यवत्त्वेन समाभ्यधिकराहित्यं साधितम् ॥ 'तदनन्यत्व'मिति सूत्रेण सूचितकार्यकारणाभेदप्रदर्शनार्थम् एकमेवेत्यस्याग्रे 'पुरुष एवेदँ' इति श्रुतिः स्थापिता । एतेन कार्यमपह्नुत्य एकमेवास्ति ब्रह्म अद्वैतरूपं एतादृशकेवलाद्वैते व्यासासम्मतिरपि सूचिता ॥ 'यद् भूतं यच्च भाव्यम्' इत्यनेन बाधार्थसामानाधिकरण्यनिरासप्रकारोऽपि सूचितः ॥ 'यद्भूतं' इति श्रुतिसूचितबाधार्थसामानाधिकरण्यनिराससमर्थनार्थं 'ऐतदात्म्यं' इति श्रुतिः 'स वै सर्वमिदं जगत्' इत्यादिश्रुतिश्च निर्दिष्टा । आदिपदेन 'सर्वं खल्विदं' इत्यस्याः श्रुतेः सूचनम् । अत्रापि 'तज्जलान्' इत्यंशस्यानुपचरितार्थता तु बाधार्थसामानाधिकरण्यास्वीकारेणैव भवति इति प्रदर्शितम् । वै-खलु-इति निश्चयार्थका-

४

नन्‌ भगवत एवं विलक्षणाभ्यां स्वरूपाभ्यां द्वैतापत्तिरिति चेत्‌-न; 'नेह नानास्ति किंचन' इत्यग्रिमश्रुत्या तद्वैलक्षण्यनिषेधात्‌। तदर्थस्तु इह सर्वरूपतया अद्वये ब्रह्मणि प्रपंचरूपेऽपि सच्चिदानन्दतया एकरूपे वस्तु नाना न, किंत्वब्रह्मदृशामविद्यया भासते एव अतो वैलक्षण्यम्‌। अत एव वाचारम्भणश्रुतिः विकाराणां स्वदोषेण प्रतीतानां मिथ्यात्वं, वस्तुत्वेन सत्वं चाह।

ननु वस्तुतोऽतथात्वे कथं तथाप्रतीतिरिति चेत्‌-नः सितामूर्तािवव

व्ययप्रयोगः कार्यकारणयोः परस्परं निश्चितोऽभेदः एवमभेदमुपोद्बलयति ॥ उपन्यस्त-श्रुतिवचनानां उपक्रमोपसंहारपूर्वकं विस्तृततात्पर्यार्थः प्रतिपदस्वारस्यादिकं च विद्वद्भूषणश्रीगोपालकृष्णभट्टटीकायां द्रष्टव्यम्‌ । एवमेकं प्रपंचात्मकं कार्यरूपं अन्यत्‌ प्रपंचविलक्षणं कारणरूपं इत्येवं विलक्षणरूपद्वयाङ्गीकारे वैलक्षण्यस्य भेदसाधकतया आत्यन्तिकद्वैतापत्तिः भवति इति पूर्वपक्षं निरूपयन्ति-ननु भगवत एवमिति। पूर्वपक्षं निरस्यन्ति-नेह नानाऽस्तीति । कार्यकारणरूपविलक्षणरूपद्वयाङ्गीकारेऽपि इह ब्रह्मणि आत्यन्तिकभेदभिन्नं किमपि नास्तीत्युक्त्या सत्यपि वैलक्षण्ये आत्यन्तिकभेदो नास्तीत्याशयः। ऐच्छिकनानापदार्थेऽपि वैलक्षण्यस्य सत्त्वेन न वैलक्षण्यस्य आत्यन्तिक-भेदसाधकत्वमेव। कारणं कार्यात्‌ कार्यं कारणाद्वा अत्यन्तभिन्नं, वैलक्षण्यात्‌ इत्यनुमाने हेतोरनैकान्तिकता । सौवर्णकटककुण्डलादिषु वैलक्षण्येऽपि अश्वमहिषादिवत्‌ अत्यन्त-भेदाभावात्‌। अत्र आगन्तुकावस्थावैलक्षण्येऽपि स्वरूपवैलक्षण्याभावः इति नात्र मुख्यं वैलक्षण्यमस्तीति हेतोः नानैकान्तिकतेति चेत्‌-कार्यकारणोभयात्मकब्रह्मरूपे तथा घट-पटादिष्वपि विद्वद्दृष्ट्या सच्चिदानन्दात्मकस्वरूपवैलक्षण्यस्यासत्त्वेन हेतोः पक्षवृत्तित्वं नास्ति इति न पक्षावृत्तिहेतुना साध्यसिद्धिरिति अनुमानस्य अजागलस्तनप्रायत्वमेव ॥ तेन सत्यपि वैलक्षण्ये नात्यन्तिकद्वैतसिद्धिः । इह ब्रह्मणि नानातार्किकादिसम्मतं आत्यन्तिकभेदभिन्नं किंचन किमपि नास्तीति श्रुतिशब्दार्थः । एवं तार्किकादिसम्मतः आत्यन्तिकभेद एव अपह्नूयते अनया श्रुत्या नैव ऐच्छिकभेदः श्रौतः ॥

प्रमेयरत्नार्णवे यदन्योन्याभावस्य विषयतात्वेन मिथ्यात्वं प्रतिपादितं तदेवात्र भिन्नप्रक्रिययोपपादितम्‌ ॥ वस्तुत्वेनेत्यत्र वस्तुपदेन 'ऋतेऽर्थ'मिति पद्यसुबोधिन्यन्तर्गत-'यथा भ्राम्यतः पुरुषस्य घटो भ्राम्यतीति प्रत्यक्षे घटगता आकृत्यादिः वस्तुभूता प्रतीयते' इति पंक्तिघटकं वस्तुपदं प्रत्यभिज्ञापितम्‌ ॥ तेन ऐच्छिकभेदभिन्नानां घटपटादीनां नानात्वेनानुभूयमानानाम्‌ स्वरूपतः पारमार्थिकत्वम्‌, तत्र प्रतीतानां अन्योन्या-भावादीनामेव अपारमार्थिकत्वं साधितम्‌ ॥ ननु परमार्थतः आत्यन्तिकभेदाभावेऽपि कथं अश्वमहिषादीनां आत्यन्तिकभिन्नतया प्रतीतिरित्याहुः-नन्विति । शर्करानिर्मितेषु अश्वादिरूपक्रीडनकेषु बालानामेव आत्यन्तिकी भेदबुद्धिः, विदुषां तु शर्करात्वेनाभेद-बुद्धिरेवेति वस्तुनः आत्यन्तिकभेदभिन्नत्वं नास्त्येवेत्युक्तम्‌-सितेति । विनिगमक-

नानात्वप्रतीतावपि एकरूपत्वेन वस्तुनः तथात्वाभावात्। अत एव न ब्रह्मविदां तथाप्रतीतिः, स्वरूपमात्रदृष्टित्वात्। ये पुनर्बहिर्दृष्टयः तेषामेव तथात्वभानात् न वस्तुनि तथात्वम्। तात्पर्यान्तविचाराभावेन तद्दृष्टेर-सम्मतत्वात्। अत एव विचारसिद्ध्यर्थकत्वेन शास्त्रसार्थक्यम्। अत एव 'अखण्डं कृष्णवत् सर्वं' इत्याचार्यवर्याः। तस्मात् सर्वरूपं अद्वयं ब्रह्मेति सिद्धम्॥ नन्वेवं प्रपंचस्य भगवद्रूपत्वे मुमुक्षुसाधनोपदेशेषु तस्य हेयत्वोपदेशः कथं शास्त्रे युज्यते? इति चेत्-सत्यम्; स्वक्रीडार्थमेव तत्सृष्टेः तत्र विचित्रे रूपे जीवानां स्वीयत्वेनासक्तिभ्रमनिवारणाय। अन्यथा मुक्ताधिकभक्तानामन्येषां वा भजनोपयोगितया तत्परिग्रहो न स्यात्। ब्रह्मविदां वा ब्रह्मत्वप्रतीतावहेयत्वबुद्धिर्न स्यात्। अतो भ्रमादासक्तिस्त-

---

माहुः-अत एवेति। ज्ञानिनां तथा अप्रतीतौ हेतुमाहुः-स्वरूपमात्रेति। अविद्वद्दृष्टेः वस्तुस्वरूपयाथार्थ्यज्ञापकत्वं वस्तुस्वरूपनियामकत्वं नेत्याहुः-ये पुनरिति। अविद्व-दृष्ट्या वस्तुस्वरूपनिर्णयाभावे हेतुमाहुः-तात्पर्येति। अज्ञप्रतीतेः वस्तुस्वरूपानिश्चाय-कत्वाभ्युपगमे शास्त्रसार्थक्यमपि विशेषतः फलतीत्याहुः-अत एवेति। मुख्याचार्य-सम्मतिमपि आहुः-अत एवेति। फलितमाहुः-तस्मादिति। यदि तात्त्विकदृष्ट्या प्रपंचस्य ब्रह्मरूपत्वं तर्हि 'त्यागेनैके' इति श्रुतौ 'हित्वात्मपातं गृहमन्धकूपम्' इत्यादि-शास्त्रे च कथं प्रपंचस्य हेयत्वोपदेशः?। न हि ब्रह्म हेयत्वेन कुत्रचिदपि वेदादिशास्त्रे प्रसिद्धम्, प्रत्युत 'हेयत्वावचनाच्च' इति ब्रह्मसूत्रे हेयत्वप्रतिषेध एव भगवता व्यासेन कृतः। अतः ब्रह्मत्वे कथं हेयत्वं, हेयत्वे च कथं ब्रह्मत्वं इत्याशंकामाहुः-ननु प्रपंच-स्येति। स्वक्रीडार्थं भगवन्निर्मिते भगवत्क्रीडोपस्कररूपे भगवदीये प्रपंचे ममताजन्य-स्वीयत्वबुद्धेरेव मुक्तिप्रतिबन्धकतया प्रपंचे स्वीयत्वबुद्धित्याग एव। यद्यत्र प्रपंचस्य स्वरूपतः हेयत्वमुच्येत तर्हि 'वनं गतो' इति वाक्यमुत्तरार्धे न वदेत्, गृहवद् वनस्यापि तुल्यतया प्रपञ्चान्तःपातात्। किन्तु यत्र स्वीयत्वबुद्ध्युद्भूतेः साकल्येनावकाशः तादृशगृहस्यैव हेयत्वोक्तिः अन्ततो गत्वा स्वीयत्वबुद्धित्याग एव पर्यवस्यतीति ममता-रूपसंसारस्य हेयत्वं मिथ्यात्वं अस्मदाचार्योक्तं सर्वथैव निरवद्यम्। अतो न प्रपंचस्य हेयत्वम्, किन्तु संसारस्यैव सिद्धम्॥ संसारस्य ब्रह्मोपादानकत्वं ब्रह्मात्मकत्वं वा नास्माभिः कुत्रचिदपि उक्तम् इति न कस्यचिदपि चोद्यस्यावकाशः। 'त्यागेनैके' इति श्रुतावपि ममतास्पदकर्मधनप्रजाशब्दनिर्देशः अस्मदुक्तमेवोपोद्बलयति॥

स्वीयत्वबुद्धिविशेषणविशिष्टे हेयत्वबुद्धिः 'सविशेषणे हि विधिनिषेधौ' इति न्यायेन बुद्धिरूपविशेषणपर्यवसायिन्येवेति निरवद्यतया प्रपंचस्य ब्रह्मरूपत्वं सिद्धम्॥ विशिष्टे हेयत्वोक्तिस्तु 'शिखी ध्वस्त' इत्युक्तितुल्यैव। एतत् सर्वं मनसि निधायोक्तं-स्वक्रीडार्थमिति। बलवतीमन्यथानुपपत्तिमाहुः-अन्यथा त्विति। एवं प्रापं-चिकपदार्थपरिग्रहान्यथानुपपत्तिं प्रदर्श्य, परिग्रहकारणीभूत-अहेयत्वबुद्ध्यन्यथानुपपत्तिं

न्निवारणार्थमेव शास्त्रे तथोक्तिरिति जानीमः । ननु तदा उपास्यत्वेन वेदान्तेषु प्रपंचरूपमेव उपदिश्येत, मूलरूपत्वात् । न चास्तु तथैवेति वक्तुं शक्यम् । 'सर्वत्र प्रसिद्धोपदेशात्' इत्यधिकरणविरोधात् इति चेत्-नः वेदान्तेषु ज्ञानार्थमुपासनानिरूपणं, न तु सिद्धे ज्ञाने । तथा च अज्ञान् प्रत्येव प्रपंचरूपे सर्वाधिकत्वज्ञानाभावेनोपासनासिद्धेः तद्भिन्नस्य तथात्वमुच्यते ॥ सिद्धे तु ज्ञाने सर्वत्र ब्रह्मस्फूर्तिः वरणे वा भक्तिरिति नोपासनावसर इति भेदेन पूर्वमुपास्य निरूपणमित्यर्थः । अत एव 'वासुदेवः सर्वं'मित्यादिवाक्यानि ।

प्रदर्शयन्ति-ब्रह्मविदां वेति आरभ्य जानीम इत्यन्तम् ॥ एतेन कार्यकारणान्यथानुपपत्तिद्वयप्रदर्शनेन स्वीयत्वरूपासक्तिभ्रमनिवृत्तिपर्यवसायिन्येव शास्त्रे प्रपंचस्य हेयत्वोक्तिः, न तु तत्स्वरूपपर्यवसितेति सिद्धम् । तस्मात् निष्प्रत्यूहं प्रपंचस्य ब्रह्मरूपत्वसिद्धिः ।

यदि ब्रह्मवादिमते प्रपंचस्य सर्वथा ब्रह्माभिन्नत्वं तर्हि उपनिषत्सु उपास्यत्वेन प्रपंच एव कुतो न निर्दिश्यते ? । यदि ग्रहिलतया प्रपंचमेवोपास्यत्वेन मनुषे तदा 'सर्वत्र प्रसिद्धोपदेशात्' इत्यधिकरणविरोधः समुपस्थितो भवति । तथा हि-अस्मिन्नधिकरणे भारूपसत्यकामसत्यसंकल्पसर्वकामसर्वगन्धसर्वरसत्वादिविशिष्टं भारूपः सत्यकामः सत्यसंकल्प इत्यादिवेदान्तवाक्यप्रसिद्धं प्रपंचविलक्षणं ब्रह्म उपासनार्थमुपदिश्यते इत्येतदुक्तम् ॥ अतः प्रपंचस्योपास्यत्वमपि एतदधिकरणविरोधेन वक्तुमशक्यम् ॥ एतत् सर्वं नन्वित्यारभ्य इति चेदित्यन्तम् उक्तम् । उपनिषत्सु उपासनोपदेशः ब्रह्मविद् व्यतिरिक्ताधिकारिणां जिज्ञासूनामेव कृते ज्ञानसंपत्तिकारणीभूतचित्तशुद्ध्यर्थमेव कृतः । चित्तशुद्धिपश्चाद्भाविज्ञानसंपत्त्यनंतरं तु नोपासनाया उपयोगः इति मन्दमध्यमाधिकारिणामेव कृते प्रपंचविलक्षणब्रह्मणोपास्यत्वेन निर्देशः उपदेशो वा न ब्रह्मज्ञानिनां कृते । ब्रह्मविदां तु ब्रह्मसाक्षात्काररूपफलस्य सिद्धत्वेन तेषां सर्वत्र ब्रह्मस्फूर्तौ न किंचिदपि बाधकं पश्यामः । अज्ञानां तु प्रपंचे सर्वाधिकत्वज्ञानाभावेन उपासनाया एव असिद्धेः प्रपंचस्योपास्यत्वकथने तु तेषामहितमेव भवेत् इति प्रपंचविलक्षणस्यैवोपास्यत्वं अब्रह्मविदां कृते सिद्ध्यति । ज्ञानिनां तु 'सकलमिदमहं च वासुदेवः,' 'स सर्वविद्भजति मां,' 'वासुदेवः सर्वं'इत्यादिवचनैः सार्वत्रिकी ब्रह्मस्फूर्तिः सिद्धैवेति तेषां दृष्ट्या उपास्यवैलक्षण्यस्यानुपयोगित्वमेव ॥ एषा तु ज्ञानमार्गीया प्रक्रिया, संपन्ने तु वरणे भक्तेरेव लाभ इति उपासनाया अवसर एव नास्ति इत्युपास्यवैलक्षण्यं तु प्रपंचस्य ब्रह्मरूपत्वे लेशतयापि न बाधकमिति ब्रह्मवादसिद्धिः निरुपप्लवा इति वदन्ति-वेदान्तेषु ज्ञानार्थमित्यारभ्य वासुदेवः सर्वमित्यादिवाक्यानीत्यन्तम् ॥ एवमुपास्यवैलक्षण्यं ब्रह्मवादे न बाधकमिति निरूप्य सद्रूपतया जडब्रह्माभेदं प्रसाध्य चिद्रूपतया चिदंशतया जीवब्रह्माभेदसाधनार्थम्, जीवब्रह्मैक्यबाधकतया प्रतीय-

नन्वेवं शुद्धब्रह्मवादे जीवानामपि तद्रूपत्वेन भजनानुपपत्तिरिति चेत्–न; अंशत्वेनैव तद्रूपता तेषां नांशिनः। ब्रह्मवादे सर्वस्यैव ब्रह्मणः सर्वात्मत्वात्। परं तद्रूपेण–'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः। तथा च सहजांशानां पुनः पूर्वभावसम्पत्त्यर्थम् अविद्यादोषनिवृत्त्यर्थं च भजनोपपत्तिः इति भावः।

ननु तथापि भजनमात्रपर्यवसायिनि पुष्टिमार्गे निवर्त्यदोषाभावात् तदनुपपत्तिरिति चेत्–न; तत्रापि पुरुषोत्तमांशानां तेषां लीलार्थं ततो वियुक्तानां पुनः सम्बन्धेन फलानुभवार्थं भजनस्यावश्यकत्वात्।

मानं भजनं भजनीयवैलक्षण्यं च वस्तुतः न बाधकम् इति निरूपणार्थम्, अंशांशिभावकृतवैलक्षण्यस्य जडब्रह्माभेदे जीवब्रह्माभेदे च सर्वथा न बाधकत्वं अंशिन एव च भजनीयत्वं इति साधनार्थम्। मुख्यं समाधिं वदन्ति–नन्वेवं शुद्धेत्यारभ्य ईयते इति श्रुतेरित्यन्तम्। इन्द्रेत्यादिश्रुतेरर्थः आवरणभङ्गे सृष्टिभेदवादे च द्रष्टव्यः॥

एवं भक्तिमार्गीयप्रक्रिययापि भजनस्य भजनीयवैलक्षण्यस्य च जीवब्रह्माभेदाबाधकतामुपपाद्य अंशत्वेन ब्रह्माभिन्नानाम् आनन्दांशाद्याविर्भावरूपपूर्वभावसंपत्त्यर्थम्, अविद्यादिदोषनिवृत्त्यर्थं च भजनं परमावश्यकं सप्रयोजनं च ज्ञापयन्ति–सहजांशेति। सहजांशानां इत्यनेन विभिन्नांशत्वस्य निरासः। एवं जीवब्रह्माभेदेऽपि मिश्रपुष्टिमार्गीयदृष्ट्या भजनोपपत्तिं उपपाद्य इदानीं शुद्धपुष्टिमार्गदृष्ट्या आरंभदशायां फलदशायां च भजनोपपत्तिं उपपादयन्ति–ननु तथापि भजनमात्रपर्यवसायिनीति। 'भगवद्रूपसेवार्थं तत्सृष्टिः' इत्यनेन वचनेन शुद्धपुष्टिमार्गस्य भजनपर्यवसायित्वं तु आचार्यचरणैरेव प्रतिपादितम्। किन्तु भजनपर्यवसायित्वं तत्र अविद्यादिनिवर्त्यदोषाभावात् कथं वक्तुं शक्यं? दोषनिवृत्तिरूपप्रयोजनाभावेन भजनस्यैवानावश्यकत्वात्। शुद्धपुष्टिमार्गे दोषलेशस्याप्रसक्तिस्तु श्रीमदाचार्यचरणैरेव 'न ते पाषण्डतां यान्ति' इति वचनेन प्रत्यपादि। ततः प्रयोजनाभावे का आवश्यकता भजनस्य?। दोषनिवृत्त्यनन्तरं पूर्वभावसंपत्त्यनन्तरं च भजनावश्यकता पण्डितमूर्धन्यश्रीगोपालकृष्णभट्टटीकायां द्रष्टव्या। अतः भजनानुपपत्तिस्तदवस्थैवेति चेत्,–न; दोषनिवृत्त्यर्थम् भजनावश्यकताया अभावेऽपि व्युच्चरणसमयादारभ्य ब्रह्मवियुक्तानां पुनः ब्रह्मसम्बन्धेन फलानुभवार्थम् लीलार्थं च भजनावश्यकता अस्त्येव। प्रारम्भदशायां पुनः सम्बन्धेन फलार्थम्, फलदशायां तु साक्षात् फलार्थं लीलार्थं चेति विवेकः। शुद्धपुष्टिमार्गे फलसामयिकभजनस्यैव परमफलत्वात्॥ एतत्तु 'नेच्छन्ति सेवया पूर्णा,' 'मधुद्विट्सेवानुरक्तमनसां अभवोऽपि फल्गुः' 'नैकात्मतां मे स्पृहयन्ति केचित्' 'मत्पादसेवे'त्यादिभागवतवचनैरपि सिद्धम्॥ एतेन

नन्वेवं भजनस्य साधनत्वे पुष्टिमार्गत्वानुपपत्तिरिति चेत्-न; भजनस्य भावरूपत्वेन फलरूपत्वात् तस्य साधनत्वेऽपि न क्षतिः। पुष्टिमार्गः स एव,-यत्र फलं स्वयमेव साधनं इत्यसकृदुक्तं आचार्यैः । अत एव पूर्वं प्रादुर्भूय संयोगानुभवं कारयित्वा विरहेणान्तरभजनं संपादयितुं भगवत एव मथुरागमनरूपत्याग उच्यते।

नन्वंशत्वेऽपि जीवानां तदात्मकत्वेनान्यूनत्वाद् भजनानुपपत्तिस्तदवस्थैवेति चेत्-न; 'बहु स्याम्' इति श्रुतेः। क्रीडार्थं तथाविर्भावान्नानुप-

---

शुद्धपुष्टिमार्गेऽपि भजनं न निष्प्रयोजनं सम्बन्धसिद्धिफलानुभवरूपप्रयोजनवदिति साधितम्। किन्त्वेवं भजनावश्यकतोपपादने भजनस्य साधनत्वं सिद्ध्यतीति निस्साधनतापगमे पुष्टिमार्गत्वस्यैवानुपपत्तिरित्याहुः-नन्वेवं भजनस्य साधनत्वेति॥

फलानुभवात् प्राक् भजनावश्यकतामुपपादयन्तोऽपि वयं न साधनत्वेन आवश्यकतां ब्रूमः, अपि तु अवान्तरव्यापारत्वेन समर्थयामः इति साधनत्वं तु अनुग्रहे वा इच्छायां वा स्वरूप एव पर्यवस्यतीति न कथंचिदपि पुष्टिमार्गत्वानुपपत्तिरिति भावः। एवमेकं समाधानं निरूपितम्। द्वितीयं समाधानं श्रीमद्धरिरायचरणा एव निरूपयन्ति-भजनस्येति। इदं त्विह वक्तव्यम्-पुष्टिमार्गे भाव एव साधनं, भाव एव च फलं, भावो भावनया सिद्धः, चेतस्तत्प्रवणं सेवा, 'वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः' इत्यादिवचनपर्यायलोचनेन सिद्ध्यति। यत्र फलसाधनैक्यं स एव पुष्टिमार्ग इति मुख्योऽर्थः पुष्टिमार्गस्य। आचार्यैस्तु असकृदुक्तम्-यत्र फलं स्वयमेव साधनं स एव पुष्टिमार्गः। अतः भाव एव साधनं भाव एव च फलं इति फलसाधनैक्यं अक्षुण्णतया तिष्ठतीति पुष्टिमार्गत्वानुपपत्तिरेवेत्युक्तिरेवानुपपत्तिशालिनीति विजयडिण्डिमघोषोऽयं पुष्टिमार्गस्येत्युक्तम्-भजनस्येत्यारभ्य-आचार्यैरित्यन्तम्। एतदेव लीलाप्रकारेण समर्थयन्ति-अत एव पूर्वं प्रादुर्भूयेति॥

ऐक्यप्रयुक्ता, सामान्यतः अन्यूनत्वेन साम्यप्रयुक्ता, व्यापकत्वेन साम्यप्रयुक्ता, अविद्यादिनिवर्त्यदोषाभावप्रयुक्ता चेति चतुर्विधा भजनानुपपत्तयः। व्यापकत्वप्रयुक्ता तु अत्र चर्चापरिधिमप्रविष्टेति निरसनस्यानवसरः। तत्रैक्यप्रयुक्ता भजनानुपपत्तिस्तु-नन्वेवं शुद्धब्रह्मवादे जीवानामपि तद्रूपत्वेनेति पूर्वपक्षे अंशत्वेनैव ब्रह्मरूपता जीवानां नांशित्वेनेति सिद्धान्तपक्षीयोत्तरेण निरस्ता। निरसनीयैषाऽनुपपत्तिस्तु सामान्यतः अन्यूनत्वेन साम्यप्रयुक्ता इति उभयोः पूर्वोत्तरपक्षयोः वैलक्षण्येन व्यक्तः पौनरुक्त्यपरिहारः। जीवानां ब्रह्मरूपत्वेन अन्यूनतया साम्यं संपद्यते इति समाने सेव्यसेवकभावानुपपत्त्या भजनानुपपत्तिः पुनस्तदवस्थेति पूर्वपक्षे-'बहु' स्यां प्रजायेय' इति श्रुतौ प्रोपसर्गस्वारस्येण न्यूनत्वविशिष्टस्यैवाविर्भाव इति न्यूनत्वेन सुखेन सेव्यसेवकभावोपपत्त्या न भजनानुपपत्तिलेशोऽपि सिद्ध्यतीत्याहुः-नन्वंशत्वेऽपि जीवानां तदात्मकत्वेनेत्यारभ्य-नानुपपत्तिः काचित् इत्यन्तम्॥ एवं जीवानामाविर्भावतः न्यूनता स्वाभाविकी नौपाधिकीति उक्तम्॥ 'ब्रह्मैव सन् ब्रह्माप्येति' 'परमं साम्यमुपैति' इत्यादिश्रुतिवचनैः सायुज्यमुक्तौ लये न्यूनत्वं अपगच्छतीति न्यूनत्वस्य न स्वाभाविकत्वसिद्धिरिति मुक्तौ

पत्तिः काचित् । नन्वेवं तथाप्यनुपपत्तिरिति चेत्-न; न्यूनत्वविशिष्टस्यैव तस्याविर्भावात् ॥

ननु तदा इच्छायाः करणत्वानुपपत्तिरिति चेत्-न; इच्छाया आविर्भावे कारणत्वं, न स्वरूपान्यथाकृतौ । तस्मात् मुक्तावपि कौस्तुभरूपेण स्थितिरिति भूषणरूपत्वेन न्यूनतायां अन्यस्य तथात्वे किं वाच्यं इति कैमुतिकन्यायेन तदात्मकत्वेऽपि तदंशत्वेन न्यूनत्वं वास्तवमेवेति भावः । अत एव अंशानामपरिमितानां सृष्टौ वह्निविस्फुलिङ्गवन्निर्गमेऽपि न न्यूनता । हस्तात् हस्तान्तरस्थिताविव सद्रूपे प्रपंचे स्थितत्वात् न

लयानन्तरं साम्ये सति सेव्यसेवकभावानुपपत्त्या भजनानुपपत्तिः पुनस्तदवस्थेति फलसाधनैक्यस्यापि असिद्धिरिति आयाता पुनः पुष्टिमार्गत्वानुपपत्तिरपीति अनुपपत्तिद्वयनिरासो पुष्टिमार्गीयैः विधेय इति उक्तम्-नन्वेवं तथाप्यनुपपत्तिरिति । उक्तानुपपत्तिद्वयनिरासमाहुः-न्यूनत्वविशिष्टस्येति । अत्रायं भावः-पुष्टिसृष्टिरेव भगवता स्वदास्यार्थमेव प्रकटिता इति व्युच्चरणदिनादारभ्य (आविर्भावदिनादारभ्य) मुक्तावपि सहजदासत्वं अक्षुण्णतया तिष्ठतीति सहजदासत्वरूपन्यूनत्वविशिष्ट एवायं सर्वदा तिष्ठतीति न्यूनत्वं सार्वदिकतया स्वाभाविकम् ॥ एवमनुपपत्तिद्वयं निरस्य न्यूनत्वस्य स्वाभाविकत्वोक्त्या न्यूनत्वे स्वभावस्यैव करणता इति 'बहु स्याम्' इति श्रुतिसिद्धेच्छायाः करणत्वानुपपत्तिः पुनरप्यागतेत्युक्तम्-ननु तदेच्छायाः करणत्वेति । वस्तुस्वभावस्यापि भगवदिच्छाधीनत्वेन इच्छायाः करणतया कारणत्वस्य हानिः कदाचिदपि न भवति । पुष्टिजीवस्य न्यूनत्वरूपस्वभावाविर्भावेऽपि भगवदिच्छैव कारणं इति भगवदिच्छाकृतस्वाभाविकन्यूनत्वनिवृत्तिः मुक्तावपि न भवति, तादृशस्वभावस्य भगवदिच्छया संपादितत्वात् । स्वभावान्यथाकरणे प्रयोजनस्याप्यभावेन स्वभावान्यथाकृतेः भगवदिच्छाकृतत्वं नैव संभवति इति न कथंचिदपि इच्छायाः स्वरूपान्यथाकृतौ कारणत्वं, न्यूनत्वरूपजीवस्वभावाविर्भाव एव भगवदिच्छायाः कारणत्वं निरूपयन्ति-इच्छाया आविर्भावे इति । एतदेव मुक्तिदशायामपि कौस्तुभे सायुज्ये भूषणतया भगवदर्थत्वेन न्यूनत्वं तिष्ठतीति मुक्तेः-प्राङ् न्यूनत्वे किमु वाच्यम्, इति कैमुतिकन्यायेन द्रढयन्ति-तस्मान्मुक्तावपीत्यारभ्य वास्तवमेवेति भाव इत्यन्तम् । एवं जीवस्य न्यूनत्वमुपपाद्य सर्वाप्यनुपपत्तीः निरस्य ब्रह्मणः सर्वाधिकत्वप्रतिपादनार्थं अग्रिमग्रन्थारम्भः-अत एव अंशानामिति । अनन्तजीवव्युच्चरणेऽपि ब्रह्मणि न न्यूनतालेशोऽपि अचिन्त्यमहिमतया सर्वदा पूर्णत्वमेव इति तु 'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते' इति श्रुत्या सिद्धम् ॥ श्रीव्यासचरणैरपि 'श्रुतेस्तु शब्दमूलत्वात्' इति सूत्रेण सर्वदा पूर्णत्वमेव समर्थितम् ॥ अत एव 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' इत्येव मुख्यः समाधिरत्र । तथापि तर्करसिकानां कृते दृष्टान्तेनापि समर्थयन्ति-हस्तान्तरस्थिताविवेति । अत्रेदमा-

न्यूनताशंकापीत्यर्थः। नन्वेवं जीवानां सहजहर्यंशत्वे दैवासुरविभागः तेषु कथमिति चेत्-क्रीडार्थं तदिच्छयेति गृहाण। अत एव फलदशायामपि न्यूनत्वसत्त्वेन भजनस्य फलता। अन्यथा स्वतन्त्रभक्तिमार्गोच्छेद एव स्यात्। अतो जीवेषु सहजन्यूनत्ववत् ब्रह्मणि सर्वाधिकत्वम्॥

ननु तथापि न्यूनाधिकभावः कथम्? अंशत्वेन सत्त्वादि चेत्-अत्र वदामि। भगवान् भेदेन क्रीडार्थं प्रपंचरूपमात्मानमाविर्भावयति। अत्रायं

कृतम्-ब्रह्मवादिमते व्युच्चरणप्रदेशस्यापि ब्रह्माभिन्नतया धर्मिभूतसच्चिदानन्दस्वरूपब्रह्मणः सकाशात् व्युच्चरणमपि धर्मात्मकसदंशरूपे स्वाभिन्ने प्रदेश एव भवति इति हस्तात् हस्तान्तरस्थिताविव न्यूनतालेशशंकापि नास्ति। एतत्तु सर्वतन्त्रस्वतन्त्रैः श्रीलालूभट्टेत्युपनामश्रीबालकृष्णभट्टैः प्रमेयरत्नार्णवे-'एवं सति व्युच्चरणोपादानभूतात् ब्रह्मणः व्युच्चरतो ब्रह्मभूतस्य ब्रह्मभूते प्रदेशे ब्रह्मभूतं व्युच्चरणमित्युक्ते न कश्चिद्दोषः' इति पंक्त्या समर्थितम्॥ अतः जीवस्य न्यूनत्वं ब्रह्मणः सर्वाधिकत्वं च सिद्धम्॥ ननु सर्वेषां अपि जीवानां सहजस्वाभिन्नभगवदंशत्वे तेषु दैवासुरविभागस्यानुपपत्तिः इत्याहुः-नन्वेवं जीवानां सहजहर्यंशत्वेनेति। समाधीयते-क्रीडार्थं तदिति। वैचित्र्याभावे क्रीडाया असंभव इति वैचित्र्यार्थं न्यूनाधिकभावं करोति भगवान्, अतो दैवासुरविभागे न कापि अनुपपत्तिरित्यर्थः। क्रीडार्थं वैचित्र्यमावश्यकं, वैचित्र्यार्थं च न्यूनत्वं आवश्यकं इति क्रीडार्थम् न्यूनतायाः परमावश्यकतेति फलानुभवसमयेऽपि क्रीडार्थं न्यूनत्वं तिष्ठतीति भजनस्यापि फलत्वं नानुपपन्नं इत्याहुः-अत एवेति। यतः क्रीडार्थं स्वांशेष्वपि दैवासुरविभागः क्रियते, ततः फलदशायां क्रीडार्थं न्यूनत्वसत्त्वे का क्षतिः? प्रत्युत भजनस्य फलत्वसिद्धिः स्वतन्त्रभक्तिमार्गानुच्छेदश्चेति प्रयोजनद्वयलाभः॥ एवमस्वीकारे तु स्वतन्त्रभक्तिमार्गोच्छेदरूपमहादोषोपस्थितिरित्याहुः-अन्यथेति। तस्मात् जीवस्य न्यूनत्वे ब्रह्मणः सर्वाधिकत्वे न काचिदपि अनुपपत्तिरित्याहुः-अतो जीवेषु सहजन्यूनत्ववत् इति।

एवं भगवदपेक्षया जीवस्य न्यूनतां प्रसाध्य दैवासुरविभागाङ्गीकारे अंशेष्वपि परस्परं न्यूनाधिकभाव आयाति किन्त्वेतत् कथमुपपद्यते? सर्वेषां जीवानां समानतया अंशत्वं चिद्रूपत्वेन अणुत्वेनेति समानरूपेणैवांशत्वमुचितं इति दैवासुरविभागेन न्यूनाधिकभावोऽनुचित इति पूर्वपक्षं निरूपयन्ति-ननु न्यूनाधिकभाव इति आरभ्य अंशत्वेन सत्त्वादित्यन्तम्। समाधानं वदन्ति-अत्र वदामीत्यारभ्य इति दैवासुरविभाग इत्यन्तम्। भगवान् ऐच्छिकभेदाविरोधि अभेदपूर्वकं क्रीडाकरणार्थं स्वाभिन्नस्वात्मकमंशं प्रपंचरूपेणाविर्भावयति इति कथयन्ति-भगवान् भेदेन क्रीडार्थं इति। एतदेव विवृण्वन्ति-अत्रायं प्रकार इति। जीवानां का कथा? अक्षरस्यापि न्यूनत्वं इति दर्शयन्ति-तस्य धर्मरूपं तदिति।

प्रकारः-'सच्चिदानन्दं ब्रह्म' तस्य च धर्मरूपतत्त्रितयात्मकमक्षरम् ॥ तस्य च चिदंशा जीवाः क्रीडार्थमिच्छया कृताः । अन्यथा क्रीडावैचित्र्याभावेन न स्यात् । अत एव जडजीवान्तर्यामिषु एकैकांशतिरोभावः तथेच्छा च । अतः समुदितपृथक्करणं क्रीडार्थम् ॥ तत्र मूलरूपेण क्रीडाबन्धमोक्षाभ्यामेव । ततो लीलानित्यत्वसिद्धये बन्धमोक्षावपि नित्यौ वाच्या इति दैवासुरविभागः ॥

ननु तथापि किं देवत्वं असुरत्वं चेति चेत्,-उच्यते-सृष्टौ पृथक्करणेन तत्परिगृहीतत्वं असुरत्वं, स्वपरिगृहीतत्वं दैवत्वमिति विवेकः । भगवदंशत्वेऽपि मोहार्थं सृष्टौ पृथग्भूतया परिगृहीतत्वादासुराणां संपुटनिस्सारितस्य चोरहस्तपतितस्योपायसहस्रैरप्राप्यस्य द्रव्यस्य संपुटप्रवेशाभाव इव पुनर्भगवति प्रवेशाभावः । दैवानां तु करकलितस्य रत्नस्य समाकृतस्य पुनः संपुटप्रवेश इव भगवति प्रवेशः । अत एव सृष्टिमात्रमसुराणां

धर्म्यपेक्षया धर्मस्य न्यूनत्वं आधेयतया व्यक्तम् । इति अक्षरस्यापि न्यूनत्वं इति तदंशरूपजीवानां न्यूनत्वं अनुक्तसिद्धम् । इति वदन्ति-**तस्य च धर्मरूपमि**त्यारभ्य **क्रीडार्थमिच्छया कृते**ति पंक्तिद्वयेन । एवमनभ्युपगमे क्रीडान्यथानुपपत्तिमाहुः-**अन्यथा त्विति** । न्यूनाधिकभावरूपवैचित्र्यप्रयोजनमनुपलक्ष्यैव पृथक्करणे 'प्रयोजनमनुद्दिश्य' इति न्यायात् क्रीडाया असंभवो भवति । वैचित्र्यार्थं न्यूनतासंरक्षणं परमावश्यकमिति सकारणजडजीवान्तर्यामिवैलक्षण्यनिरूपणेन द्रढयन्ति-**अत एव जडजीवान्तर्यामिष्विति** ॥ एतेन व्यष्टिअन्तर्याम्यपेक्षया जीवस्य जीवापेक्षया च जडस्य न्यूनत्वं साधितम् । एवं वैचित्र्यपूर्वकं त्रयाणामपि पृथक्करणं क्रीडार्थमित्याहुः-**अतः समुदितेति** । जडजीवान्तर्यामिसमुदायरूपतया समुदितस्येत्यर्थः । समुदितस्य पृथक्करणमिति विग्रहः ॥

एवं क्रीडार्थं जडजीवादिसृष्टिं न्यूनाधिकभावेन वैचित्र्यं जडजीवादीनां न्यूनत्वं ब्रह्मणः सर्वाधिकत्वं चोपपाद्य बन्धमोक्षप्रदानरूपा क्रीडा मूलरूपस्येति कथनार्थं च बन्धमोक्षयोरपि लीलामध्यपातितया लीलारूपत्वेन नित्यत्वं बन्धलीलोपयोगितया आसुराणां, मुक्तिलीलार्थं दैवानां सर्ग इति ज्ञापनार्थं च वदन्ति-**तत्र मूलरूपेण क्रीडे**त्यारभ्य **दैवासुरविभाग** इत्यन्तेन पंक्तिद्वयेन ॥ दैवासुरविभागं सम्यक् बोद्धुकामः दैवासुरशब्दयोः व्याख्यां पृच्छति-**ननु तथापि किं दैवत्वमिति** । समाधीयते-**उच्यते इति** । यद्यपि न्यूनाधिकभावेऽपि ब्रह्मांशत्वमुभयोस्तुल्यम् । तथापि मोहार्थपृथक्कृतव्यामोहिकामायापरिगृहीतत्वमासुरत्वं, साक्षात् भगवत्परिगृहीतत्वं दैवत्वमिति विवेकः । ब्रह्मांशत्वेऽपि मोहार्थपृथग्भूतशक्तिपरिगृहीतत्वात् पुनर्भगवति प्रवेशो न भवति इति सोदाहरणमुपपादयन्ति-**भगवदंशत्वेऽपि मोहार्थमि**त्यारभ्य **प्रवेशाभाव** इत्यन्तम् । दैवानां भगवत्प्रवेशमपि दृष्टान्तेनोपपादयन्ति-**दैवानां तु करकलितस्येति** । एतावता यत् सिद्धं तदाहुः-**अत एवेति** । यत आसुराणां भगवति अप्रवेशः अत एव

भगवतोऽन्यन्मायैव । तत्कृतमोहेन ज्ञानभक्तिरूपशक्तिद्वयकार्याभावेन सायुज्यासंभवात् । अत एव भगवतामामप्राप्यैवेत्युक्तम् तत्प्राप्तिहेतुत्वेन तेषु तदभावात् । तथा च पुरुषांशबीजस्य स्त्रियां प्रवेशे तद्गृहीतस्य पुनः पुरुषप्रवेश इव तेषां भगवति अप्रवेशः । तथापि पुत्र इव तत्रापि व्यवहारो लोके वेदे च भगवदंशत्वमादायैव ॥ एतेन प्रकृतिसंबन्धादंशत्वमपि व्यावहारिकमिवाभूदिति निरूपितम् ॥

ननु तथापि प्रकृतेस्तच्छक्तित्वेन तदभिन्नाया आनन्दरूपत्वेन तत्र प्रविष्टानामानन्द एवेति न कथं तत्प्राप्तिरिति चेत्-न; भगवत एव आसुरेषु स्वानन्दरूपस्य तस्यामप्रकटनात् । अत आनन्दरूपप्राकट्याभावान्न तेषां आनन्दगन्धोऽपीति बुद्ध्यस्व । अन्यथा भक्तानामिवानन्दरूपदर्शने देवेतराणामपि आनन्दानुभवः स्यात् । अतस्तद्रूपाप्राकट्यमेव तत्रेति मन्तव्यम् । अत एव 'मम माये'ति, 'राक्षसीमासुरीं चैवे'ति वाक्यद्वयबोधितसम्बन्धतदभावाभ्यां एव भगवता दैवासुरमाययोर्भेद उक्तः । मोहोऽप्यु-

---

आसुरसृष्ट्युत्पादनमेव भगवान् करोति । अन्यत्तु सर्वं मायया भवतीति मायाकृतमोहेन ज्ञानभक्तिरूपशक्तिद्वयकार्याभावेन सायुज्यासंभव इत्येतदुक्तम्-अत एवेत्यारभ्य तेषु तदभावात् इत्यन्तम् ॥ एतत् पुनरपि अन्यदृष्टान्तेन साधयन्ति-तथा च पुरुषांशबीजस्येति । अप्रवेशेऽपि व्यवहारः पुत्रत्वेनैव भवतीति वदन्ति-तथापीति ॥ पुत्रत्वव्यवहारोपयोगि अंशत्वनिरूपणेन प्रकृतिसम्बन्धेन अंशत्वमपि पुत्रव्यवहारोपपत्त्यर्थमेव न सायुज्यार्थं इति उक्तं-एतेन प्रकृतिसम्बन्धादिति ।

प्रकृतेः भगवच्छक्तित्वेन आनन्दमयभगवदभिन्नतया आनन्दरूपत्वं सिद्ध्यतीति प्रकृतिप्रविष्टानां अपि आनन्दप्राप्तिरभ्युपगमनीयेति आसुराणां आनन्दप्राप्तिः कथं न भवति? तेषामपि आनन्दप्राप्तिर्भविष्यत्येवेति चेत्-न; धर्मभूतानन्दस्वामी तु भगवान् इति भगवत्स्वामिकत्वमेवानन्दस्येति यदि भगवानेव तेभ्यः आनन्ददानं नेच्छति चेत् कथमपि आनन्दप्राप्तिः तेषां नास्त्येवेति मन्तव्यम् इत्युक्तम्-ननु तथापि प्रकृतेः तच्छक्तित्वेनेत्यारभ्य इति बुद्ध्यस्वेत्यन्तम् ॥ एवमनभ्युपगमे आनन्दरूपभगवद्दर्शनेन आनन्दोऽनुभूयेत, तत्तु नानुभूयते इति असदुक्त एव निष्कण्टकः पन्था इत्येवं आनन्दाननुभवान्यथानुपपत्तिं वदन्ति-अन्यथा भक्तानामिवेति । सिद्धमाहुः-अतस्तद्रूपेति । असदुक्तान्यथानुपपत्तेः प्राबल्यादेव भगवद्गीतायां भगवतैवोक्तम्-'मम माया दुरत्यया', 'राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः', 'मामप्राप्यैवे'ति, एतदुक्तम्-अत एवेत्यारभ्य माययोर्भेद उक्त इत्यन्तम् । एतेन 'मम माया,' 'राक्षसीमासुरीं चैवे'ति वाक्य-बोधितमायासम्बन्धो येषां ते असुराः ॥ 'दैवीं प्रकृतिमाश्रिताः' इति वाक्यबोधितप्रकृतिसम्बन्धो येषां ते दैवा इत्यपि फलितम् ॥ उभयप्रकृतिभेदं कार्यभेदेनापि समर्थयन्ति-मोहोऽप्युभयत्रेत्यारभ्य बोध्यमित्यन्तेन पंक्तिद्वयेन । बन्धार्थत्वेन असद्रूपतादार्ढ्यार्थ-

भयत्र कार्यभेदेन भिन्न एव ॥ एकत्र मोक्षार्थं अपरत्र बन्धार्थमिति बोद्धव्यम् , अत एव असद्रूपत्वं तस्या इति बोधनाय क्रूरत्वार्थं राक्षसीत्वमप्युक्तम् । 'तेषां सहजक्रूरत्वादि'त्युपाख्याने तेषु च लक्षणत्वेन दयाभावप्रतिपादनात् । अत एव 'विना पशुघ्नात्' इति श्रीभागवतेऽपि लक्षणं तेषां तदेवोक्तम् ॥ कार्यान्तराभावाय मोहिनीत्वमप्युक्तम् ॥

ननु प्रकृतेः प्रलये भगवति लये तद्द्वारा तेषामपि लयात् परंपरया भगवत्सम्बन्धे कथं न तदानन्दानुभव इति चेन्न-प्रलये तत्सम्बन्धेऽपि व्यवधानेन तदानन्दाननुभवात् । अन्यथा प्रलयमुक्त्योर्भेद एव न स्यात् । प्रलयस्यैव मुक्तित्वे मुक्त्यर्थसाधनानुष्ठानप्रयत्नवैय्यर्थ्यापत्तेः । नहि कोऽप्यबालिशः क्लेशेन स्वलयाय यतेत । अतो मुक्तिर्भिन्नैव स्वरूपानन्दानु-

---

मेव भगवता 'राक्षसीमासुरीं चे'ति विशेषणद्वयं दत्तमित्युक्तम्-अत एव असद्रूपत्वं तस्येति ॥

उपाख्याने दयाभावप्रतिपादनेन श्रीभागवतेऽपि 'पशुघ्नात्' इति कथनेन असद्रूपताक्रूरत्वभावसंपादिकायास्तस्या दृढीकृता । बन्धनार्थं मोहातिरिक्तकार्यान्तराभावः तस्या इति मोहिनीति विशेषणेन दृढीकुर्वन्ति-कार्यान्तरेति । एवं 'प्रकृतेः शक्तिशक्तिमतोरभेद' इति न्यायेन भगवदभेदाभ्युपगमे भगवत आनन्दरूपतया प्रकृतेरपि आनन्दरूपतासिद्धेति प्रकृतिप्रविष्टानां आनन्दप्राप्तिरवश्यं भाविनीति एवं प्रकारेण पूर्वपक्षमुपस्थाप्यसोपपत्तिं निरस्य ब्रह्मणि प्रकृतिलये प्रकृतिप्रविष्टजीवानामपि भगवति लय इति परंपरया आनन्दप्राप्तिः असुराणामवश्यमुररीकार्येति पूर्वपक्षं निरूपयन्ति-ननु प्रकृतेः प्रलये भगवति लये इति ॥ प्रलये परंपरया भगवत्सम्बन्धेऽपि व्यामोहिकामायाव्यवधानेन भगवदानन्दानुभवो न भवतीति प्रतिपादयन्ति-प्रलये तत्सम्बन्धेति । प्रलये भगवदानन्दानुभवस्वीकारे तु प्रलयमुक्त्योरभेदापत्तिः । इष्टापत्तौ तु मुक्त्यर्थसाधनानुष्ठानवैय्यर्थ्यम् ॥ स्वप्रलयार्थं ऋते मूर्खं न कोपि अतिक्लेशेन यतेतेति स्वरूपानन्दानुभवरूपा मुक्तिः भिन्नैवाभ्युपेयेति आहुः-अन्यथा प्रलयमुक्त्योरित्यारभ्य स्वरूपानन्दानुभवरूपा इत्यन्तम् ॥ प्रलये तु कृमीणामिव उदरवर्तित्वमात्रम् । आनन्दानुभवस्तु भक्तिमन्तरेण न भवति-आनन्दानुभवस्य भक्तिमात्रैकसाध्यत्वात् । भक्तेः स्नेहरूपतया 'ये भजन्ति तु मां भक्त्या मयि ते' इत्युक्त्या 'साधवो हृदयं मह्यं' इत्यादिवचनैश्च भक्तानां हृदयस्थितिरिति स्निग्धतयैव श्रीलक्ष्मीदेव्यापि हृदयस्थितिरेवेति 'वक्षोनिवासमकरोत् परमं विभूतेः' इति वचनैः स्पष्टम् । स्निग्धतया हृदयस्थितावेवानन्दानुभवः (स्वरूपानन्दानुभवः) भवति नान्यथा । अत एव महाभागवतैः श्रीजयदेवमहानुभावैरप्युक्तम्-

भवरूपा । प्रलयस्तु कृमीणामिव उदरवर्तित्वमात्रम् ॥ स्वविषयानुभवश्च न तावता आनन्दानुभवः । तस्य भक्तिसाध्यत्वात् ॥ सा च भक्तिः स्नेहरूपेति तदानीं भगवद्धृदयस्थितिरेव । अत एव लक्ष्म्यादीनां तत्रैव स्थितिः । अत एव 'साधवो हृदयं मह्य'मित्यादिवाक्यानि । जयदेवोऽपि 'राधामाधाय हृदये' इत्युक्तवान् । अतः प्रलये निद्रायामिव अनेकजन्मक्लेशापाय एवेति सर्वं सुस्थम् ॥

निजाचार्यानुकंपातः संशयोऽयं निराकृतः ।
हरिदासेन तुष्यन्तु तेन ते स्वामिनो मम ॥

इति श्रीवल्लभाचार्यान्वयगोस्वामि-श्रीमत्हरिरायजीविरचितो ब्रह्मवादः समाप्तिमसेधत् ॥

'श्रीराधामाधाय हृदये' इति 'पीत्वा मुकुन्दमुखसारघ'मिति पद्ये 'तत्सत्कृति'मित्यनेन परिरम्भणादिना परस्परं हृदयसम्बन्धादेव तापत्यागेन आनन्दानुभव उक्तः । प्रलये तु निद्रायामिव अनेकजन्मक्लेशापाय एव भवति नानन्दानुभवः । आनन्दानुभवस्तु भक्ततया हृदयस्थितावेवेति सर्वमनवद्यम्, इत्येतत् सर्वं प्रलयस्तु कृमीणामित्यारभ्य सर्वं सुस्थमित्यन्तेन सन्दर्भेण । श्रीमदाचार्यकृपयैव ग्रन्थपरिसमाप्तिरिति स्वसर्वस्वरूपान् स्वामिरूपान् श्रीमदाचार्यान् प्रार्थयन्ति निजाचार्यानुकम्पात इति पद्यस्य विस्तृतोऽर्थः विद्वद्वरश्रीगोपालकृष्णभट्टटीकायां अवलोकनीयः ॥

इति श्रीप्रतिक्षणनिकुंजस्थरासलीलासुपूरितभक्तिमार्गाब्जमार्तण्डमायावादाख्य-तूलाग्निरूपजगद्गुरुश्रीमद्वल्लभाधीशपदकमलदासदासानुदासेन श्रीमत्प्रभुचरणचरण-नलिननिसृतमकरन्दमिलिन्दायमानेन रसिकमूर्धन्यश्रीहरिरायादिमहानुभावकृपाकटाक्षै-कजीवितेन श्रीनन्ददासश्रीगोपालदासादिपूर्णभगवदीयपदरजोभिषेकसमासादितसकल-पुरुषार्थेन जगद्गुरुश्रीवल्लभाचार्यवंशजनैकनृपतिकिरीटघृष्टपादपीठश्रीगोकुलनाथाचार्या-त्मजेन करुणामूर्तिश्रीकुसुमप्रभागर्भसंभवेन गोस्वामिदीक्षितेन विरचितेयं कृतिः श्रीमद्-हरिरायविरचितब्रह्मवादग्रन्थस्य कुसुमप्रभाव्याख्या परिपूर्णा ॥

श्रीगोपीजनवल्लभश्रीवल्लभाधीशश्रीप्रभुचरणकृपाप्रसादसिद्धिरस्तु ।

एषा टीका मूर्तिमत् परोपकाररूप-औदार्यदयासौशील्य-आर्जवमार्दवादिसकल-सद्गुणविशिष्ट – यदुवंशोद्भव – श्रीश्रेष्ठिमूलजीपौत्रसज्जनाग्रगण्यश्रीश्रेष्ठिरतनसिंहसूनुविनय-विवेकादिसर्वसद्गुणविशिष्ट-चि. श्रीभूपेन्द्रकृते तथा च परमगीताभक्तगुरुभक्तिनिष्ठ-यदु-वंशोद्भव – श्रीश्रेष्ठिजीवनदासपौत्र – परमपूर्णसज्जनश्रीश्रेष्ठिकर्सनदासपुत्रविनयविवेकादि-सर्वसद्गुणविशिष्ट चि. श्रीकिशोरकृते च अनयोः पाठसमय एव निरतिशयकृपया हार्दिक-प्रेम्णा च व्यलेखि ।

सकलान्तरात्मा श्रीहरिः श्रीकृष्णः प्रसन्नोऽस्तु ॥ इति शम् ॥

प्रश्नोत्तरसाहस्रीपर्यालोचनम्

प्रणम्य श्रीमदाचार्यान् कुमतध्वान्तनाशकान् ।
अत्यसम्बद्धवादित्वं वादिनो वै प्रसाध्यते ॥ १ ॥

"मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा" इत्यादिपुराणवाक्यैः बौद्धमतकल्पस्य मायावादस्य व्याहतार्थप्रतिपादकत्वमार्षवचनसिद्धमेवेति कृत्वा नात्र विशेषतः साधनप्रयासावश्यकता श्रद्धावतामास्तिकानां पुरतो भाति । तथापि प्रत्यक्षपरिकलितमप्यर्थं अनुमानेनैव तर्करसिकाः प्रतिबुध्यन्त" इत्यभियुक्तोक्तिमनुसृत्य वादरसिकानां कृते वादविधया मायावादिनोऽसंबद्धवादित्वं प्रसाध्यते । नन्वनेन पुराणवाक्येन बौद्धप्रायत्वमेव मायावादिनोऽवगम्यते । बौद्धप्रायतामात्रप्रतिपादनेन व्याहतार्थभाषित्वं मायावादिनः कथं सेत्स्यतीति चेत्, बौद्धस्यैव व्याहतार्थभाषित्वादिति ब्रूमः । ननु बौद्धस्य व्याहतार्थभाषित्वे मायावादिनो व्याहतार्थभाषित्वं कथं सिध्यतीति चेत्, पुराणवाक्यद्वारा सादृश्यप्रतिपादनेनैवेति निभालय । यस्य येन सह सादृश्यादिकमुच्यते, तन्न सर्वांशे, अपि तु विवक्षितांश एवेति सर्वप्रेक्षावदनुभवगम्यम् । यथा 'चन्द्रवन्मुखम्' इत्यत्रापि आह्लादकत्वाद्यंश एव सादृश्यादिकं गृहीत्वा चन्द्रवदिति प्रयोगः क्रियते, तद्वदत्रापि व्याहतार्थभाषित्वाद्यंश एव सादृश्यं गृहीत्वा प्रच्छन्नबौद्धपदप्रयोगः श्रीव्यासाचार्यैः कृतः । नन्वत्र व्याहतार्थभाषित्वादिधर्माणामेव सादृश्यनियामकतया ग्रहणे किं विनिगमकम्? इति चेत्, असच्छास्त्रमित्युक्तिरेव । यद्धि सम्बद्धवचनैः सम्बद्धरूपेण च पदार्थप्रतिपादकं, तदेव प्रेक्षावद्भिः सच्छास्त्रमुच्यते । यत्र तु असम्बद्धवाचाऽसंबद्धतया च पदार्थानां निरूपणं भवति, तदेवासच्छास्त्रमित्येतत्तु अनुक्तसिद्धमेव । अत्रासच्छास्त्रमित्युक्त्या बौद्धस्य मायावादिनश्चोभयोरप्यसंबद्धवाचाऽसंबद्धरूपेण च पदार्थप्रतिपादकत्वमस्तीति ध्वन्यते ।

"नहि प्रतिज्ञामात्रेण कार्यं सिध्यती"ति न्यायात्, यावता बौद्धमतस्य व्याहतार्थभाषित्वं तत्तुल्यरूपेण मायावादिनोऽपि व्याहतार्थभाषित्वं हेत्वाद्युपन्यासमुखेन न प्रसाध्यते, तावता पूर्वलिखितस्य सर्वस्यापि भागस्य नैरर्थक्यमेव भवतीत्यतः पूर्वं बौद्धस्य तदनुमायावादिनश्चासंबद्धवादित्वं प्रसाधयिष्यते । तत्र पूर्वं बौद्धीयासंबद्धवादिताया दिङ्मात्रप्रदर्शनं क्रियते । "उपेयभूतं परमार्थसत्यं, उपायभूतं व्यवहारसत्य"मिति काचन कारिका बोधिचर्यावतारपञ्जिकायां प्रज्ञाकरभिक्षुणा विलिखिता, तत्र "उपेयभूतं परमार्थसत्यं" इत्युक्तिस्तु तन्मतसमालोचने कृतेऽसंबद्धैव भाति । सर्वशून्यवादिमते सत्यस्योपेयस्य कस्याप्यभावात् । यदि नाम शून्यतैवोपेयभूता सत्याऽस्तीत्युच्यते चेत्, नहि शून्यताया उपेयत्वं केनापि बुद्धिमता वक्तुं पार्यते । भावरूपमेव वस्तु उपेयमिति प्राप्यमिति च संगिरन्ते पृथक् जना विद्वांसश्च । यथा घटगेहादीनां प्राप्यत्वं न तथा तदभावस्य । यथा प्राप्तो घट इति व्यपदेशो न तथा घटाभावः प्राप्त इति व्यपदेशोऽनुभूयते । यदि नाम अनुभूतत्वमेवात्र प्राप्यत्वमुच्यते; उच्यतां नाम निरंकुशत्वात् तुण्डस्य, न तु युक्त्युपेतमुच्यते । अनुभवप्राप्योरुभयोरपि विविक्ततयैव

प्रतिपन्नत्वात् । यत् यत् प्राप्यते तद् तदनुभूयत एवेति कथं तयोर्न संभिन्नत्वम् ? वचनव्यक्तिविपर्यासेनैव तयोर्भिन्नत्वं प्रत्यक्षसिद्धमित्यवलोकय । यथा यत् यत् प्राप्यते तत्तदनुभूयत इति नियमः, न तथा यत् यत् अनुभूयते तत्प्राप्यत इति नियमोऽतो येन सर्वशून्यमित्युच्यते तन्मते प्राप्तव्यस्य कस्याप्यभावात् उपेयभूतमित्युक्तिस्तु सागरघोषतुल्यैव ।

किञ्च माध्यमिकवृत्तौ बन्धमोक्षयोः कल्पितत्वप्रकाशनार्थं यत् "मुक्तो न मुच्यते तावदमुक्तो नैव मुच्यते । स्यातां मुक्ते मुच्यमाने युगपद्बन्धमोक्षणे ॥ बद्धो न मुच्यते तावदबद्धो नैव मुच्यते ॥" इत्यादिपद्यैरिह युक्तिनिकुरंबोपन्यासो नागार्जुनेन कृतः, सोऽपि तत्समयविमर्शकानामग्रे "मम माता वन्ध्या" इति वाक्यतुल्य एव प्रतिभाति । तथा हि बौद्धमतेऽपि निर्वाणमस्तीत्येतत्तु पण्डितमारभ्य आऽजाविपालपर्यन्तं प्रसिद्धमस्ति । यदि मोक्षतया स्वीकृतः कश्चन निर्वाणाभिधेयः पदार्थविशेषः अभ्युपगतः तर्हि तन्निर्वाणमालयविज्ञानरूपस्य चित्तसंततिप्रवाहस्य वा भवत्वथवा वैदिकाभिमताऽऽत्मनो भवतु, तत्रोभयत्रापि "मुक्तो न मुच्यत" इत्याद्युक्तीनां बाधकत्वं तु व्यक्तमेवानुभूयते । स्वीकृतेऽपि निर्वाणे तद्बाधकयुक्त्युपन्यसनमेवासंबद्धवाद इति व्यक्तमेव । यथा बौद्धा असंबद्धवादिनस्तथैव मायावादिनोऽपि । एतत्तु "क्षणिकत्वाच्च" इति सूत्राणुभाष्ये मायावादतूलाग्निरूपैरस्मदाचार्यैः "माध्यमिकस्तु मायावादिवदत्यसंबद्धवादित्वादुपेक्ष्य" इति पङ्क्त्या प्रसाधितम् । तस्यैव भाष्यं प्रश्नोत्तरसाहस्रीगत-अद्वैतिभाष्यनिष्ठ-असम्बद्धवादपरिहारपरभागसमालोचनव्याजेनास्माभिरेतस्मिन् ग्रन्थे क्रियते । यथा मायावादिनोऽसंबद्धवादित्वं, तदपि ग्रन्थविचारावसर एवोपरिष्टाद्व्यक्तीभविष्यति ।

अत्यन्ताभावाव्यतिरिक्तत्वात् शून्यताया अन्यथा शून्यतायापि निषेधे निरस्तशून्यवादांशोऽपि । यदपि बोधिचर्यावतारे यदि नाम किंचित् नास्तीति मनसिकाराभ्यासाद्भवति शून्यता वासनाया प्रहरणं तथापि तदभ्यासात्पुनरभावकल्पनाप्रवर्तमानानिवर्तयितुमशक्या ततश्च गण्डप्रवेशे अक्षितारानिर्गमो जात इति तदवस्थम् । तत्र दौष्ट्यम्, इति आशंक्य यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यतेति उत्तरितम्, व्यक्ततया तत्र व्याहतार्थभाषित्वं दृश्यते यदा निराश्रयो अभावः तिष्ठति कथं तर्हि निराश्रयाशून्यता तिष्ठति ? नच यो भावो नास्तीति प्रकल्प्यते यस्य भावस्य प्रतिषेधः क्रियते स यदि विचार्यमाणो निःस्वभावतया न लभ्यते तैमिरिकोपलब्धकेशस्तबकवत् तदा निराश्रय इति पंक्त्या यस्य भावस्य प्रतिषेधः तस्यैव निःस्वभावत्वप्रदर्शनेन निरालम्बनस्य निषेधस्य असम्भवग्रस्तत्वं प्रदर्शितमिति वाच्यम् । एवमपि ध्वंसस्यैव निषेधः स्यात्, न तु अत्यन्ताभावस्य ? । ननु 'न सन्नासत् न सदसत् न चाप्यनुभयात्मकम् ।' इति पद्येन शून्यताया असद्विलक्षणत्वप्रदर्शनेन अत्यन्ताभावस्य च असत्कोटिनिविष्टत्वप्रदर्शनेन च नोक्तदोषाणां प्रसर इति चेत्, एतत्कथनस्यापि अभ्युपगममात्रैकशरणत्वात् विद्वदपेक्ष्यत्वमेव । तथा हि चतुष्कोटिविनिर्मुक्तस्य तत्त्वस्य कोटिद्वयविनिर्मुक्तस्य तत्त्वस्य बौद्धगृहे अद्वैतिगृहे एव प्रसिद्धत्वम्, इत्येतत्तु अनुक्तसिद्धम् ।

शुद्धिपत्रमवलोकनीयम् ।

लोके तु सदसद्रूपपदार्थद्वयस्यैव प्रसिद्धत्वात् । असत् शून्यं तुच्छम् मिथ्या असत्यम् मृषेत्यादिशब्दानां पर्यायत्वमेव कोषादिषु प्रसिद्धम् इति पूर्वोक्तदोषाणां स्थिरत्वमेव । असत एव प्रकारद्वयाभ्युपगमेन खपुष्पवन्ध्यापुत्रादीनां अप्रतीतिमरुमरीचिकादीनां प्रतीतिरिति सर्वमनवद्यम् । तस्मात् 'यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते । तदा निराश्रयो भावः कथं तिष्ठेन्मतेः पुरः । यदा न भावो नाभावो मतेः सन्तिष्ठते पुरः । तदान्यगत्यभावेन निरालम्बा प्रशाम्यति ॥' इत्यादीनि वचनानि असम्बद्धवादबहुलानीति सिद्धम् । ननु सर्वमेतदसाधीयः, न च शून्यताभावात् व्यतिरिक्ताभावस्यैव तत् स्वभावत्वात् अन्यथा शून्यताया भावात् व्यतिरेके धर्माणां निःस्वभावता न स्यात् इति ग्रन्थभागेन शून्यताया भावस्वरूपत्वस्यैवाभ्युपगमात् कथं वा अत्यन्ताभावाव्यतिरिक्तशून्यताया इति चेत्,—त्वन्मते तु पदार्थानाम् संवृतिसत्त्वाङ्गीकारेण संवृत्या भावरूपत्वस्य अभाव एव पर्यवसितत्वेन त्वन्मतेऽपि परमार्थत अभावस्यैवाङ्गीकारेण व्यावहारिकपदार्थे भाव इति शब्दप्रयोगोऽपि असम्बद्धपोषकः किं वा निरालम्बनत्वस्य उभयत्रापि तुल्यत्वात् । किं च अभावस्य निरालम्बनस्थितिकत्वस्वभावेन एतत् दूषणस्य अनवसरपरहितत्वमेव । न हि अभावसत्ताकाले प्रतियोगिसत्ताकेनापि बुद्धिमता वक्तुं पार्यते प्रतियोगिसत्त्वे तु अभावस्यैव अशक्यत्वात् । किं च तस्य सम्बन्धिनो अभावात् इति पंक्त्या स्वयमेव अभावस्य निरालम्बनस्थितिकत्वाभ्युपगमात् । वञ्चनार्थं उपन्यासो लालावक्रासवादिवतश्रीकुमारिलोक्त्यनुसारेण वञ्चनार्थ एव ।

शुद्धे यद्यध्यस्तधर्मस्वीकारस्तर्हि शबले किं सत्यधर्मस्वीकारः ? यदि शुद्धे शबले चाध्यस्तधर्मस्वीकारस्तर्हि को वा विशेषः शुद्धस्य शबलस्य च ? यदि शबलेऽध्यस्तधर्मसत्तयाशुद्धत्वहानिस्तर्हि कथं शुद्धेऽध्यस्तधर्मसत्तया शुद्धत्वहानिर्न भवति ? अध्यस्तधर्मसत्त्वेऽपि यदि शुद्धत्वं सुरक्षितमवतिष्ठते तर्हि शबलेनैव किमपराद्धम् ? । न ह्यद्वैतिमते धर्मस्य सत्यत्वं कुत्रापि प्रसिद्धम् , येनेकत्र सत्यधर्मसत्ता अपरत्र मिथ्याधर्मसत्तेति विवेकप्रतिपादनसाङ्गत्यं स्यात् । यद्युच्येत उपाध्यवच्छिन्नत्वमेव शबलत्वप्रयोजकं न त्वध्यस्तधर्मवत्त्वं, तेनाध्यस्तधर्मसत्त्वेऽपि उपाध्यवच्छिन्नत्वाभावात् शुद्धस्य न शबलत्वप्रसक्तिः । एतन्न क्षोदक्षमम् । उपाध्यवच्छिन्नत्वस्याप्यध्यस्तधर्मवत्त्वरूपत्वेन सामान्यतः—अध्यस्तधर्मकूटे विशेषरूपेणैतस्याप्यन्तर्भावात्—अस्यैव शबलत्वप्रयोजकत्वं नाध्यस्तधर्मवत्त्वस्येति कथने विशेषविनिगमकाभावात् । किंच परस्परं व्याप्यव्यापकभावसत्त्वेन यत्रोपाध्यवच्छिन्नत्वं तत्राध्यस्तधर्मवत्त्वं यत्राध्यस्तधर्मवत्त्वं तत्रोपाध्यवच्छिन्नत्वनियमेन साधनव्यापकतया उपाधिलक्षणालक्षितत्वादस्योपाधित्वाभावात् । वस्तुगत्या शास्त्रदृष्ट्या वा शुद्धत्वव्यपदेशो यावत्सर्वमुक्तिपर्यन्तम्—शुद्धत्वस्यैवासम्भव इति पक्षे तु मुक्तेरेवोच्छेदप्रसङ्गः । मुक्तिप्राक्काले शुद्धज्ञानस्याशक्यत्वेन—शुद्धस्यैव सत्यत्वेन शुद्धज्ञानेनैव भ्रमनिवृत्तिः न—भ्रमात्मक—शबलज्ञानेनेत्यसकृदावेदितम् ॥

अद्वैतमते प्रधानस्थानीयप्रकृतेरपि कारणत्वस्वीकारात् तत्कारणत्वेनैव ब्रह्मणोऽपि कारणत्वव्यवहारमात्रं इति सिद्धान्तस्यापि कौमुदीकारादिसम्मतत्वाच्च किमर्थं प्रधानकारणवादनिरासः सूत्रकाराणां भाष्यकाराणां वा ? किमनेन-प्रश्नेन यथा सांख्यमते जडायाः प्रकृतेरेव कर्तृत्वं, सच्छब्दार्थमपि प्रधानमेव, 'तदैक्षत' इत्यादि ईक्षत्यादिकं तु कूलं पिपतिषति इत्यादिवद् गौणमेव, ममात्मा भद्रसेनः इतिवत् आत्मशब्दोऽपि भाक्त एव, तथैवाद्वैतमतेऽपि कारणत्वकर्तृत्वादिधर्माणां शुद्धे स्थित्यसम्भवः, अन्यथा शुद्धत्वभङ्गप्रसङ्गः। मायाप्रतिबिम्बितचैतन्यस्य तदवच्छिन्नचैतन्यस्य वा शबलत्वस्वीकारेऽपि चैतन्यांशे तु कर्तृत्वस्य बाधितत्वात् 'सविशेषणे हि विधिनिषेधौ' इति न्यायेन कर्तृत्वेक्षितृत्वादिधर्माणां मायायामेव पर्यवसानं वाच्यम्, प्रकृतेर्जडत्वस्योभयत्रापि तुल्यत्वात् मुख्येक्षितृत्वस्य प्रकृतौ बाधितत्वात् ईक्षत्यादेरपि गौणत्वं तुल्यम्। अत एतस्मिन्नंशे अद्वैतमतस्य सांख्यमतस्यापि यदि तौल्यं तर्हि किमर्थं सूत्रकारैः भाष्यकारैश्चेक्षत्यधिकरणे सांख्यमतनिरासः क्रियते इत्येषा शंका प्रदर्शिता ? यद्वा अस्य प्रश्नस्य ब्रह्माधिष्ठिता प्रकृतिः जगत्कारणं उतानधिष्ठिता ? कारणत्वमपि निमित्तरूपम् उपादानरूपं वा ? उपादानत्वमपि विवर्तरूपम् परिणामरूपम् इत्याद्यंशेऽपि किं सांख्यमतेन सह साम्यमस्ति ? प्रकृतिकारणत्वांशे तु कैश्चित् कौमुदीकारादिभिः साम्यं स्वीकृतमेव। ब्रह्मणस्तु कारणत्वं व्यवहारमात्रं भवतीति अद्वैतस्य सांख्यमतसमानयोगक्षेमत्वात् किमर्थं सूत्रकारैः भाष्यकारैश्च सांख्यमतनिरासः क्रियते इति वा शंकाशयः।

यदि द्वितीयं प्रश्नाशयमङ्गीकृत्यैतदुत्तरं दत्तमित्युच्यते चेत्-कथंचिदस्य साधुत्वं भाति। यावताऽद्वैतिमते ब्रह्माश्रिताऽज्ञानकार्यस्याङ्गीकारात् ब्रह्माश्रितैव प्रकृतिः जगत्कारणं न स्वतन्त्रा प्रकृतिः तत्कारणत्वमपि विवर्तोपादानरूपमेवाऽतः सांख्यमतात् वैलक्षण्यस्य विद्यमानत्वेन न सांख्यमततुल्यत्वम् ॥

किञ्च भामतीकारविवरणकारसंक्षेपशारीरककारैर्विवर्तोपादानरूपकारणत्वस्य ब्रह्मण्यप्यभ्युपगतत्वान्न सर्वेऽप्यद्वैतिनो "ब्रह्मणस्तु कारणत्वं व्यवहारमात्र"मिति सिद्धान्तमंगीकुर्वन्तीति। किंतु द्वितीयाशयस्वीकारेऽस्य प्रश्नस्यैतदुत्तरस्य चेक्षत्यधिकरणेन सह सम्बन्धोऽस्ति न वा ? एतावदेवालोचनीयम्। नहीक्षत्यधिकरणं ब्रह्माधिष्ठितप्रकृतेः जगत्कारणत्वं न स्वतंत्रायास्तत्कारणत्वमपि प्रस्थानान्तरभेदेन निमित्तोपादानान्यतररूपमित्यादिनिरूपणार्थं प्रवृत्तं। अपि तु "तत्तु समन्वयादि"त्यादिना कारणवस्तुनिरूपकोपनिषद् वाक्यानां ब्रह्मणि समन्वितत्वप्रदर्शनेन समन्वये प्रतिज्ञाते, तादृशसमन्वयविघटनाय सद्विद्यायाः प्रधानपरत्वप्रतिवादनार्थं सद्विद्यायाश्च प्रधानपरत्वप्रदर्शनेनोपलक्षणविधया सर्वेषां वेदवाक्यानां प्रधान एव पर्यवसानं न्यायमिति प्रधान एव कारण वस्तुनिरूपकाणि वाक्यानि समन्वितानि न तु ब्रह्मणीत्येवंरीत्या कपिलानुयायिवर्गे पुरत उपस्थिते, स्वाभिमतसमन्वयसाधनाय "ईक्षतेः, आत्मशब्दात्, तन्निष्ठस्य मोक्षोपदेशात्, स्वाप्ययात्," इत्यादिहेतुकदम्बैः सच्चिदानंदरूपस्यैव ब्रह्मणो जगत्कारणत्वं,

वेदे प्रतिपाद्यत इति निरूपणार्थं ईक्षत्यधिकरणं भगवता वेदव्यासेन प्रारब्धम्। न तु जडायाः प्रकृतेः जगत्कारणत्वं वेदेन सिद्ध्यति। तत्रेक्षणात्मादिप्रयोगस्य मुख्यस्य बाधितत्वेन गौणस्यैव कल्पनीयतया शब्दप्रमाणकेऽर्थे गौणीकल्पनाया अन्याय्यतया सर्वत्र उपचारकरणे शब्दप्रामाण्यस्यैवोच्छेदप्रसंगान्नात्र गौणी कल्पना न्याय्या, अपि तु मुख्यार्थपरिग्रह एव युक्तोऽयमेव राद्धान्त ईक्षत्यधिकरणस्य शांकराद्यनेकवेदान्तिसंमतः। नन्वयमेवाशय ईक्षत्यधिकरणस्य न पूर्वप्रतिपादित इत्यत्र किं विनिगमकं? इति चेत्, 'ईक्षतेर्नाशब्द'मित्यादिसूत्रस्वारस्यमेव। तथा हि—यदि प्रकृतेः परतंत्रत्वप्रतिपादनं सूत्रकारसंमतं स्यात्, तर्हि 'ईक्षतेर्नाशब्द'मित्यादिसूत्रस्थाने "अजा परतंत्रा 'अव्यक्तात् पुरुषः पर'-" इति श्रुतेः, "संयुक्तमेतत्" इत्यादिश्रुतेश्च, 'स्मृतेश्च,' इत्यादिसूत्राणामुपन्यासः स्यात्। अपि तु जडकारणत्वप्रतिक्षेपार्थमेव चैतन्य एव मुख्येक्षितृत्वादिधर्माणां स्थितिरित्यादिसूचनार्थं चेक्षत्यादिहेतुकदम्बोपन्यासो भगवता ज्ञानशक्त्यवतारेण कृतः। अतः प्रश्नद्वितीयाशयपरिग्रहे कृते त्वस्योत्तरस्यास्य प्रश्नस्य च साधुत्वमापाततोऽवलोकने कृते भाति। तथाप्येवमाशयेनास्य प्रश्नस्यास्योत्तरस्य च सूत्राक्षरासंबद्धत्वात् सूत्रस्वारस्यसूत्रघटकहेतूक्तिस्वारस्यादीनां विघातकत्वाच्च सर्वथा हेयत्वमेव प्रतिभाति। किंच प्रश्ने 'कौमुदीकारादिसंमतत्वाच्चे'ति यदुक्तं,—तस्यायमाशयः प्रतिभाति—यत् केचनैवाद्वैतिनः प्रकृतिकारणवादिनो नतु सर्वे इति नैतदुचितमिव भाति। सर्वेऽप्यद्वैतिनः प्रकृतिकारणवादिन एव, औपाधिकधर्मवादिनां मते धर्माणामुपाधावेव पर्यवसानात्। एतत्तु प्रथमप्रश्नाशयविचारावसर एव विवेचितम्। यदि प्रथमप्रश्नाशयः अभ्युपेयते चेत्, तदा नानुगुणमेतदुत्तरं। किन्तु 'आम्रान् पृष्टः कोविदारान् व्याचष्टे' इति न्यायानुसरणमेतत्। नहि भामतीकारेण विवरणकारेण विवर्तोपादानत्वं स्वीकृतमित्युक्त्या जडकारणत्वनिरसनं सम्भवदुक्तिकं। अद्वैतिभिर्भेरीघोषेणोद्घोषितस्य चैतन्यस्य सकलधर्मविधुरत्वमिति सिद्धान्तस्य 'सविशेषणे ही'ति न्यायस्य च जागरूकत्वेनास्मिन्नंशे सांख्यमततौल्यस्य वज्रलेपायितत्वात् अद्वैतिमते ईक्षत्यधिकरणवैयर्थ्यरूपदोषप्रसक्तिर्दुर्वारैव। शुद्धे अवच्छिन्नेऽपि चैतन्ये यथा ईक्षितृत्वादिधर्मस्थित्यसम्भवः तथा अस्माभिः अन्योन्यधर्मांश्चेति बाधितमेवेति प्रश्नोत्तरसमालोचनावसरे प्रकृतप्रश्नप्रथमाशयविमर्शकाले च निवेदितमिति विशेषजिज्ञासायां ततोऽवधेयम्। अतः ईक्षणादिधर्माणां प्रकृतिपर्यवसायित्वस्य उभयत्रापि तुल्यत्वात् साध्वेवाभिहितं श्रीनिगमान्तमहादेशिकैः 'सांख्यसौगतचार्वाकसंकरा[illegible]करोदय' इति। यत्तु "ब्रह्माज्ञानाज्जगत् सर्वं ब्रह्मणोऽकारणत्वत" इति वार्त्तिकानुसारिमते मायामात्रकारणत्वेऽपि प्रपञ्चस्य ब्रह्माश्रिताज्ञानकार्यत्वस्यैवाङ्गीकारात् स्वतंत्रस्य तत्कारणत्वस्यास्वीकारात् न सांख्यमतेन सामान्यमित्युक्तं,—तन्न विचारक्षमम्। नहि अत्रानाश्रितप्रकृते जगत्कारणत्वं ब्रह्माश्रितप्रकृते जगत्कारणत्वं वा, इत्यस्य विचारस्यापि प्रसक्तिः। अपि तु न जडकारणकं जगत्, चेतनकार्यमेव कारण ईक्षणादिधर्माणां कथनात् इत्यस्यैव विचारस्यास्मिन्नधिकरणे उद्भव इत्यधस्तादेवावे-

दितम्। अन्यथा सूत्रस्वारस्यादिभङ्गदोषो दुरुद्धर एव । अत ईक्षत्यधिकरणस्य न कथमप्यद्वैतिमते निर्वाहः ।

यदि ब्रह्मण्यपि श्रुत्यादय एव न प्रमाणं, तर्हि कथं तस्यौपनिषदत्वाज्ज्ञानम्? । उत्तरम्-ब्रह्मण औपनिषदत्वं हि प्राथमिकं ज्ञानं तस्योपनिषन्मूलकमित्यभिप्रायम्, तथा चानुमानादिप्रमाणस्यापि श्रुतिमूलस्य तत्र प्रामाण्येऽपि नौपनिषदस्य व्याघातः ॥

अनेन प्रश्नोत्तरेण "न धर्मजिज्ञासायामिव ब्रह्मणि श्रुत्यादय एव प्रमाणं, किन्तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणं" इत्यस्याः पङ्क्तेः संबद्धार्थप्रतिपादकत्वं निर्दुष्टत्वं च प्रतिपाद्यते। किन्तु अस्याः पंक्तेरसंबद्धार्थप्रतिपादकत्वाद्यनेकविधदोषदुष्टत्वात् नैकेनासंबद्धवादपरिहारेण संबद्धार्थप्रतिपादकत्वं निर्दुष्टत्वं वा समीहितं भवेत् । तथा हि-द्वितीयाध्यायप्रथमपादस्य "दृश्यते तु" इति सूत्रभाष्ये "आगममात्रसमधिगम्य एव त्वयमर्थः, धर्मवत्" इति पङ्क्त्या ब्रह्मण आगममात्रसमधिगम्यत्वं, धर्मस्यापि आगममात्रसमधिगम्यत्वं समानरूपेणास्तीति सिद्धान्तितं श्रीशङ्कराचार्यैः। 'न धर्मजिज्ञासाया'मित्यत्र तु धर्मस्यागममात्रसमधिगम्यत्वं, ब्रह्मणस्त्वितरप्रमाणगम्यत्वमपि स्थाप्यते इत्ययं विरोधस्तु दुष्परिहर एव । ब्रह्मण औपनिषदत्वाज्ज्ञानं उपनिषद्जन्यज्ञानस्य प्राथमिकत्वाभिप्रायेण, तदनुश्रुत्यनुकूलानुमानादीनामपि प्रवृत्तिः ब्रह्मणि सुखेन भवितुमर्हति, न तेन कथमप्यौपनिषदत्वव्याघातः इत्यादिसमाधानमपि तदैव संगतं स्याद्यदि न "धर्मजिज्ञासायामिव धर्मवत्" इति च सुस्पष्टविरुद्धपदद्वयास्तित्वमद्वैतिभाष्ये न स्यात्। यथैतत्पदद्वयं विरुद्धं, तथैव "आगममात्रसमधिगम्य एव" इति भागस्य "श्रुत्यादय एव न प्रमाणं" इति भागस्यापि विरोधः स्पष्ट एवावगम्यते । यदि त्वेवमुच्यते-श्रुत्यादयोऽनुभवादयश्चेत्यत्रानुभवादयश्चेति पदेनोपनिषदनुकूलानुमानादीनामपि प्रवृत्तिर्विवक्षितेति, कथं 'आगममात्रसमधिगम्य' इति भागस्य 'श्रुत्यादय एव न प्रमाण'मिति भागस्य च विरोधः? । श्रुत्यनुकूलानुमानादीनां प्रवृत्तिस्तु धर्मेऽप्यस्तीति "न धर्मजिज्ञासायामिव" इत्यनेन प्रतिपादितधर्मब्रह्मगतज्ञेयत्वांशवैलक्षण्यस्य नैरर्थक्यमेव स्यात्। धर्मेऽपि वेदानुकूलतर्कादिप्रवृत्त्यस्वीकारे तु पूर्वमीमांसाया नैरर्थक्यमेवायाति। मीमांसायास्तर्कस्य च भेदोऽनुभूयते? इति चेत्,-न; "मीमांसासंज्ञकस्तर्कः सर्वो वेदसमुद्भवः" इत्यभियुक्तोक्त्या भेदस्य बाधितत्वादभेद एव वरीवर्त्ति । उभयमीमांसायां पादविशेषयोस्तर्कपादेत्यभिधानमपि श्रुत्यनुकूलतर्कस्य मीमांसायाश्च तादात्म्यं प्रमाणयति । किञ्चोपक्रमन्यायापच्छेदन्यायादिष्वपि स्पष्टतया श्रुत्यनुकूलतर्कस्योपजीवनं दृश्यते। तथा हि-अनुपसंजातविरोधित्वादुपक्रमस्यैव प्राबल्यम्, "पूर्वं परमजातत्वादबाधेनैव जायते। परस्यानन्यथोत्पादान्न त्वबाधेन संभवः"। अपच्छेदस्थले तु परस्यैव प्राबल्यं, अन्योन्यनिरपेक्षद्वये परस्यैव प्राबल्यमिति नियमात्, भट्टपादवचनान्यपि दृश्यन्ते यथा "पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत् ॥ पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यती"ति

विभिन्नस्थलेषु विलक्षणरूपेण नियामकाणामनुपसञ्जातविरोधित्वान्योन्यनिरपेक्षद्वये पूर्वाबाधेन परस्यानुत्पत्तिमत्त्वादीनां किं श्रुत्यनुकूलतर्करूपत्वं मीमांसकैः न स्वीक्रियते ?। तर्करूपत्वं तु एतेषां प्रत्यक्षतयाऽवलोकनपथमायाति । नहि स्वानुभवापलापः सुधीभिः कर्तुं शक्यः। यत्तु मयूखमालिकायां सोमनाथेनोक्तम्–"ऊह वितर्के इति धातुनिष्पन्नोहशब्दस्य तर्कज्ञानार्थकत्वेन तस्य चाचोदनालक्षणत्वेन धर्मत्वाभावात् शास्त्रे व्युत्पाद्यत्वमयुक्तमि"ति,–तदपि श्रुतिप्रतिकूलतर्काद्यप्रामाण्याभिप्रायकमेव । कृत्स्नशास्त्रस्याप्यूह्यमानत्वेन नवमासाधारणत्वानुपपत्तेरिति अग्रिमपंक्त्यास्मदुक्ताभिप्रायस्यैव दृढीकरणात् ।

यदपि ईक्षत्यधिकरणे 'नहि कारणनिष्ठस्याद्वैतमतेऽपि मोक्षोपदेश' इत्यनेन प्रश्नेन, 'तन्निष्ठत्वं नाम तद्भाव' इत्युत्तरेण चालोचितं,–तदप्यनालोचितप्रायमेव। तथा हि–अद्वैतिमते शबलस्यैव कारणरूपत्वात् तत्रैवेक्षितृत्वादीनां पर्यवसितत्वात् तस्यैवेक्षत्यधिकरणप्रतिपाद्यत्वमद्वैतिनोऽप्यङ्गीकुर्वन्ति। किन्त्वीक्षत्यधिकरणे 'तन्निष्ठस्ये'ति सूत्रे तत्पदेन तस्य ग्रहणं न संभवति तस्यातात्त्विकत्वात् । तादृशवस्तुज्ञानस्य मुक्त्यसाधकतया तत्त्वज्ञानं मुक्त्यर्थमावश्यकम्। तत्त्वज्ञानं त्वद्वैतिमतेऽखण्डज्ञानमेव न शबलज्ञानम् । यद्युच्येताखण्डं ब्रह्मैव तत्पदार्थतयाऽस्माभिः स्वीक्रियते,–नैतद् युक्तम्; उपक्रान्तत्यागानुपक्रान्तग्रहणाद्यनेकदोषदुष्टत्वात् । अतः'तन्निष्ठस्ये'ति सूत्रं शाङ्करमते न कथमपि निर्वहतीति प्रश्नाशयः। यद्वा शबलज्ञानस्य तात्त्विकाद्यंशे औदासीन्यमवलम्ब्य तन्निष्ठस्यापि तद्भावापत्तिः (अर्थात् सगुणेश्वरभावापत्तिः) इत्यर्थमभ्युपगम्य यदि मुक्तस्य परममुक्तिदशायामपि सगुणभावप्राप्तिस्तर्हि सगुणस्यैव प्राधान्यसिद्ध्याऽद्वैतराद्धान्तविरोधित्वं स्पष्टमेवास्य सूत्रस्य । न ह्यद्वैतिमतेऽखण्डचैतन्यरूपेणावस्थानमिव सगुणेश्वररूपेण स्थितिर्मुक्तितयाऽभ्युपेयते, अतः शाङ्करमते 'तन्निष्ठस्ये'ति सूत्रस्य न कथमपि निर्वाह इत्याशयः। यदि द्वितीयाशयेनास्य प्रश्नोत्तरस्योत्थितिरित्युच्यते, तदा कथञ्चिदस्योत्तरस्य साधुत्वभ्रान्तिर्भवति । किन्तु 'मोक्षोपदेशादि'ति सूत्रार्धभागानुपपत्त्या न कथंचिदप्यस्य सदुत्तरत्वं सिद्ध्यति । तथा हि–अद्वैतिमते सगुणस्य मिथ्यात्वांगीकारेण मिथ्यात्वस्य च बन्धनान्तरीयकत्वेन बद्धावस्थायां मुक्तिपदप्रयोगस्य शास्त्रे लोके चादृष्टचरत्वेन केवलस्वगोष्ठीसमयमात्रेण श्रद्धाजडशिष्यपरितोषेऽपि वादिहृदयसंतोषानाधायकत्वात् । ननु सिद्धान्तलेशे ईश्वरस्यापि निरञ्जनत्वोक्त्या सगुणस्य पारमार्थिकत्वमेवेति न पूर्वोक्तस्य साधुत्वमिति चेत्–न; अद्वैतसिद्धिगतदृश्यत्वानुमानविचारे उपहितमिथ्यात्वस्य स्पष्टतया प्रतिपादितत्वेनोपहितसत्यत्वाशाया अपि दूरापेतत्वेनास्मदुक्तार्थस्य सर्वथा सुस्थिरत्वमेव । अन्यथा दृश्यत्वानुमानस्यानैकान्तिकत्वं भामतीप्रस्थाने दुष्परिहरमेव स्यात् । यदि तन्निष्ठस्येति पदस्य वार्त्तिकमतानुसार्यर्थमवलम्ब्य प्रश्नप्रथमाशयं परिगृह्योत्तरितमित्युच्यते, तदा त्वस्योत्तरस्यानुत्तरत्वमेव दृष्टिपथमायाति । तथा हि–समूलभ्रमनिवृत्तिं विना मुक्तेरप्राप्यतया मुक्तिदशायां भ्रमनिवृत्तेः परमावश्यकत्वमेव, भ्रमनिवृत्तिस्तु तत्त्वज्ञानेनैवेति त्वद्वैतिनामप्यनुमतपन्थाः । अभियुक्तोक्तिनिकुरम्बोऽपि यथा "तत्त्वावधारणाभ्यासस्य हि स्वभाव

एव एतादृशो यदनादिमपि निरूढनिविडवासनमपि मिथ्याप्रत्ययमपनयति । आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते । मिथ्याज्ञानप्रसञ्जितं स्वरूपं शक्यं तत्त्वज्ञानेनापवदितुम् । तत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्यासमुन्मूलयेत् न संशयाभ्यासः सामान्यमात्र-दर्शनाभ्यासो वा । नहि स्थाणुर्वा पुरुषो वेति आरोहपरिणामवद् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्तं, ऋते विशेषदर्शनात् । समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्ति । ननु "तरति शोकमात्मवित्" इत्यादौ शोकरूपा-ज्ञानस्य तरणरूपनिवृत्तिं प्रति साधनत्वेनोक्ताया आत्मविद्याया न तावदात्मविषयक-भ्रमत्वं युक्तम् । भ्रमस्याज्ञानानिवर्तकत्वात् किन्तु सा प्रमैव । प्रमात्वं च तस्याः शुद्ध-विषयकत्वेनैवेति वेदान्तानां शुद्धब्रह्मज्ञानजनकत्वमावश्यकमेवेत्यस्वरसादाह—**वस्तुत-स्त्विति** । लोकेऽपि तथैवानुभवो रज्जुज्ञानेनैव सर्पज्ञाननिवृत्तिर्दृश्यते नान्येन ज्ञानेन । अत एव भामतीमतं दूषितमिति मत्वा विवरणानुयायिनां शब्दाजन्यवृत्तिविषयत्वं दृश्य-त्वमिति दृश्यत्वहेतोः परिष्कारः ।

तस्मात् सगुणज्ञानस्यापवर्गासाधकतया तत्पदेनाखण्डब्रह्मण एव ग्रहणमिति वक्तव्यं, किन्तु एतत्कथनस्योपक्रान्तत्यागाद्यनेकदोषस्पृष्टत्वेन प्रेक्षावदनुपादेयत्वमेव । ननु सगुणस्यैवोपक्रान्तत्वमिति कथं निर्णय इति चेत्, भामत्याद्यनेकव्याख्यातृमत-विमर्शेनैवेति ब्रूमः । तथा हीक्षत्यधिकरणे भामतीकारः—"ब्रह्मैवेक्षित्रनाद्यनिर्वाच्याविद्या-सचिवं जगदुपादानं, शुक्तिरिव समारोपितस्य रजतस्य, मरीचय इव जलस्य, एकश्चन्द्रमा इव द्वितीयस्य चन्द्रमसः इति । अस्मिन्नेवाधिकरणे 'श्रुतत्वाच्चे'ति सूत्रे उपसंहारमुखेनापी-ममेवार्थं द्रढयन्ति भामतीकाराः, "तदैक्षत" इत्यत्र ईक्षणमात्रं जगत्कारणस्य श्रुतं न सर्वविषयम् । जगत्कारणसंबन्धितया तु तदर्थात्सर्वविषयमवगतं, श्वेताश्वतराणां तूपनिषदि सर्वज्ञ ईश्वरो जगत्कारणमिति साक्षादुक्तमिति विशेषः । आनन्दमया-धिकरणटीकायामपि "ब्रह्म जिज्ञासितव्य"मिति हि प्रतिज्ञातं, तच्च शास्त्रैकसमधिगम्यं, शास्त्रं च सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिप्रलयकारणे ब्रह्मण्येव प्रमाणं न प्रधानादा-विति न्यायतो व्युत्पादितम् । न चास्ति कश्चिद्वेदान्तभागो यस्तद्विपरीतमपि बोधयेदिति च 'गतिसामान्यात्' इत्यत्रोक्तम् "एतत् भामतीभागावलोकने सगुणस्यैवास्मिन्नधिकरण उपक्रान्तत्वमित्यध्यवसीयते । व्यक्ततयानाद्यविद्यासचिवस्यैवेक्षितृत्वोक्तेरानन्दमयाधि-करणटीकाग्रन्थेनापि पूर्वोक्त एवार्थोपोद्बलितः । रत्नप्रभायामपि "ननु मायोपाधिक-बिम्बचिन्मात्रस्येश्वरस्य कथमीक्षणं प्रति मुख्यं कर्तृत्वं? कृत्यभावादिति चेत्-न; कार्यानुकूलज्ञानवत एव कर्तृत्वादीश्वरस्यापि ईक्षणानुकूलज्ञानवत्त्वात्" इति पूर्वोत्तर-पक्षग्रन्थेन मायोपाधिकबिम्बचिन्मात्रस्यैवेक्षितृत्वस्थापनात् सगुणस्यैवेक्षत्यधिकरणोप-क्रान्तत्वमित्यस्मिन्नंशे रत्नप्रभानुकूल्यमपि विद्यते । यदि तु वार्तिकमतेनास्मिन्नधि-करणे निर्गुणस्यैवोपक्रान्तत्वमिति पक्षोऽभ्युपेयते । किंच प्रबलतरप्रामाण्योपेतश्रुति-वाक्योपन्यासेन शुद्ध एवेक्षितृत्वादिस्थापनं क्रियते तर्हि अनेकश्रुतिस्वरूपरक्षणार्थं

प्राकृतधर्मानाश्रयमप्राकृतधर्मरूपाद्भुताचिन्त्यदिव्यविरुद्धधर्माश्रयनिगमप्रतिपाद्यसाकृतिब्रह्मस्वीकारेण शुद्धाद्वैतिगोष्ठीप्रवेश एव किमर्थं न क्रियत इति विस्मयावहमेतत्। यदि तु सगुणस्यैवोपक्रान्तत्वमिति पक्षाङ्गीकारस्तर्हि पूर्वोक्तदूषणरूपत्रणापाकरणं वार्त्तिकमतानुसारिणामावश्यकम् । श्रीयुतशास्त्रिचरणा अपि प्रदीपग्रन्थे श्रीभाष्योक्तदूषणपरिहारपरभागे सगुणस्यैव कारणत्वमीक्षितृत्वादिकं च स्वीकुर्वन्तीति न शास्त्रिचरणमतविरोधोऽप्यस्मन्मतेन साकम् । यदपि 'निर्विशेषकारणतायामपि पूर्वोक्तविधया सर्वतादात्म्यापन्नचैतन्यरूपत्वस्येक्षितृत्वस्याविरोधाच्च न कोऽपि विरोध' इत्यनया पंक्त्या शुद्धईक्षितृत्वादिव्यवस्थापनं,-तदपि चिन्त्यमेव, यतः शुद्धस्येक्षितृत्वमिति पक्षस्य नैर्बल्यं व्यक्तमेवानुभूयते । अस्याः पंक्तेरपिशब्दघटितत्वात् । सगुणईक्षितृत्वादिप्रतिपादकवाक्यस्य चान्ययोगव्यवच्छेदार्थक-एवकारघटितत्वात् । शुद्धईक्षितृत्वादिस्वीकारे तु शुद्धस्य निर्धर्मकत्वमिति सिद्धान्तस्य दत्ततिलाञ्जलित्वमेव स्यात्। नहि सर्वतादात्म्यापन्नत्वेन साक्षित्वेन वा चैतन्यस्येक्षितृत्वं सिध्येत्। बाधार्थसामानाधिकरण्यस्यैव स्वीकारेण तादृशसामानाधिकरण्येन तादात्म्यभावमापन्नस्येक्षितृत्वं विद्यत एवेति व्याप्तेरभावात्। प्रत्युत एतादृशानेकस्थले वैपरीत्यस्यैव दृष्टत्वात् । प्रकृतस्थले तु चैतन्यस्य सकलधर्मविधुरत्वेनाकिञ्चित्करकल्पेन तेनेक्षणं क्रियत इति वचनं तु वन्ध्याभर्तुः पुत्रोत्पत्त्यवसरे नान्दीसमाराधनपुत्रप्राप्तिसूचकहर्षसंयुतवाक्यतुल्यमेव । साक्षित्वस्यापि आरोपितवस्तुप्रकाशकत्वमात्ररूपत्वेन आरोपितवस्तुप्रकाशकशुक्त्यादेरनीक्षितृत्वस्यैव प्रत्यक्षीकरणात् । एतादृशसाक्षित्वस्यानीक्षितृत्व एव पर्यवसानात् दृष्टान्ते तु साक्षिणश्चैतन्यरूपत्वेऽपि सर्वधर्मशून्यत्वेनाकिञ्चित्करत्वमेवेत्यधस्तादेवावेदितम्। नहि स्वरूपतो चिद्रूपत्वमीक्षितृत्वमुपकरोति । ईक्षणस्य धर्मभूतज्ञानकोटिनिविष्टत्वेन धर्मशून्यईक्षितृत्वस्यानुपपद्यमानत्वात्। अद्वैतिनोऽपि लोकव्यवस्थायां वृत्तिरूपज्ञानकोटिनिविष्टमेवेक्षणं मन्यन्ते । वृत्तिरूपज्ञानस्य मिथ्यात्वेन स्वरूपचिदतिरिक्तत्वेन धर्मभूतज्ञानसाम्य एव पर्यवसानात्, साम्यं च स्वरूपातिरिक्तत्वेनैव न तु मिथ्यात्वेन ।

यदपि नवत्युत्तरद्विशततमे प्रश्ने "कारणविज्ञानात् कार्यविज्ञानमद्वैतवाद एवोपद्यत" इति कथनं,-तच्चिन्त्यमेव । विज्ञानपदस्य तदतिरेकेणाभावार्थकतायाः शास्त्रलोकातीतत्वात् "नाभाव उपलब्धेः" इत्यादिसूत्रविरुद्धत्वाच्च । एतत्तु "नाभाव" इति सूत्रसमालोचनावसर एव विशदीकरिष्यते । शुक्तिरजतादिभ्रमस्थले तु बाध एव दृश्यते नैव विज्ञानम्, रजतं विज्ञातं इति व्यपदेशस्य व्यवहारस्य वा लोकेऽननुभूतत्वात्। विज्ञानपदस्वारस्यमपि जगत्सत्यत्ववाद एव, प्रपञ्चसत्यत्वस्वीकारानन्तरमेव सामान्यज्ञानं विशेषरूपेण ज्ञानमिति विवेकप्रतिपादनमुपपद्येत । अन्यथा बाधज्ञानं भ्रमज्ञानमित्येव स्यात्। ननु भ्रमभातपदार्थानां बाधज्ञानमेव विज्ञानमित्यभ्युपगमे किं बाधकम्? विषयाभाव एव बाधकमिति कथयामः । तथा हि-सविषयमेव विज्ञानं स्वीकर्तव्यं विषयबाधस्वीकारे तु किंचिद्विषयकं विज्ञानमित्युक्तेर्बाधितत्वेन विज्ञानस्याभावविषयकत्वमेव पर्य-

वसीयते "अभावज्ञाने सामान्यविशेषादिकथनस्यानुपयोगित्वात् । एतेन कारण (अधिष्ठान) विज्ञानमेव कार्यविज्ञानमिति पक्षोऽप्यपास्तः । अद्वैतिमते कारण (अधिष्ठान)- स्यापि निर्विशेषत्वेन तत्रापि सामान्यविशेषचिन्ताया अभाव एव । किंच तद्व्यतिरेकेणाभाव इत्यर्थस्तु विज्ञानपदस्य लाक्षणिक एव भाति, किन्तु लक्षणाया मूलं तु न पश्यामः । यौक्तिकबाधः श्रुतिबाधो वा प्रत्यक्षबाधो वा मूलम् । प्राच्यपक्षस्वीकारे तु दृश्यत्वानुमानादियुक्तेरेव बाधकत्वमद्वैतिभिर्वक्तुं शक्येत । किन्तु दृश्यत्वानुमानादेरनेकदोषदुष्टत्वं तु शतदूषणी-सहस्रकिरणी–दृश्यत्वानुमाननिरासादिषु ग्रन्थेषु पूर्णतया प्रतिपादितमिति ततोऽवधेयम् । अस्माभिरपि दृश्यत्वानुमानस्याद्वैतालोचनाख्यग्रन्थेऽस्मिन्नपि ग्रन्थेऽग्रे निरसनीयत्वेन नात्र निरासः क्रियते । यदि प्रत्यक्षबाधस्य मूलत्वमित्युच्येत तदापि प्रत्यक्षस्याद्वैतिमते सर्वथा प्रातिकूल्येन गले पादुकान्यायस्यैव प्रसरः स्यात् । एतद्विशेषजिज्ञासायां तु श्रीभाष्य–श्रुतप्रकाशिका–तत्त्वटीका–तत्त्वमुक्ताकलापादयो ग्रन्था अनुसन्धेयाः । श्रुतिबाधस्तु नास्त्येवेति तु घण्टाघोषेण कथयामः । इयं श्रुतिर्बाधिकेति विशेषतो दृष्टिपथं यदैवायास्यति तदैव परिहारोऽपि भविष्यत्येव । 'अतोऽन्यदार्त'मित्यादिश्रुतिविचारोऽपि दशदिगन्तविजयिश्रीपुरुषोत्तमचरणैः प्रकाशे सृष्टिभेदवादे आवरणभङ्गे च कृत इति ततोऽवधेयः ।

व्याससिद्धान्तमार्तण्डे तदनन्यत्वाधिकरणालोचनेऽस्मद्गुरुचरणाः श्रीदेशिकाचार्या अपि पूर्वोक्तमेवार्थं भिन्नरीत्योपपादयन्ति-"अपि च 'यथा सौम्य'इत्यारभ्य श्रुतौ तत्त्वपदाध्याहारप्रसङ्गाच्चे"त्यन्तम् । यत्त्वद्वैतमार्तण्डे तदनन्यत्वाधिकरणालोचने उक्तम् तत्रापि निर्बलतैव व्यक्ततया दृश्यते । दृष्टान्तास्वारस्यादिकं यत् दूषणतयोक्तं तस्याद्वैतिमत एव विशेषरूपेण प्रसरः । विवर्तवादापेक्षया श्रीरामानुजमते विशेषतो दृष्टान्तस्वारस्यं सुरक्षितम् तिष्ठतीत्यसकृद् वक्तुं पारयामः। नहि कारणव्यतिरेकेण कार्यस्याभावो यथाऽद्वैतिभिरभ्युपगम्यते तथा मृद्दृष्टान्तेन सिद्ध्यति । किन्तु सूक्ष्मचिद्विशिष्टज्ञानेन स्थूलचिदचिद्विशिष्टवस्तुज्ञानं भविष्यत्येव, एवं शरीरशरीरिभावपोषकत्वमेवास्य व्यक्तमनुभूयते । परिणामवाद एव मृत्पिण्डदृष्टान्तेन सिद्ध्यति स परम्परया भवतु साक्षाद्वा भवतु अविकृतपरिणामस्वीकारेण, विवर्तपरिणामस्य तु मृत्पिण्डदृष्टान्तेन सिद्धिरशक्यप्रायैव । यद्यनुवर्तमानत्वादिसूचनद्वारा उपादानमात्रसत्यत्वसूचनार्थमयं दृष्टान्त इति चेत्,–नहि उपादानस्य अनुवर्तमानतामात्रेण कार्यमिथ्यात्वमुपपन्नं भवति, मृदोऽनुवर्तमानत्वेऽपि घटमिथ्यात्वस्यादर्शनात् । यद्युच्येत उपादानस्यानुवर्तमानतासूचनेन कार्यस्य व्यावर्तमानत्वमर्थादेव सिद्ध्यतीति कृत्वा न विशेषतो कार्यमिथ्यात्वप्रदर्शनावश्यकतेति चेत्,–वार्तमेतत् । श्रीनिगमान्तमहादेशिकैरस्यानुमानस्य तत्त्वमुक्ताकलापे "व्यावृत्तं शुक्तिरूप्यं विदितमिह मृषा विश्वमेवं न किं स्यात् । मैवं हेतोरयुक्तेः स खलु भिदुरता बाध्यता नाशिता वा । आद्येऽनैकान्त्यमन्त्ये स्वसमयविहतिर्मध्यमे स्यादसिद्धिः, धीविच्छेदादिकल्पान्तरमपि कथितैश्चूर्णितं दोषवृन्दैः" इत्यनेन पद्येन सर्वथा निरस्तत्वात् शतदूषण्यामपि बहुधा

खण्डितत्वाच्च को वा विशेषलाभः शवोरसि छुरिकाप्रवेशनेन ?। अतो वाचारम्भण-वाक्येनानुमानद्वयं विवक्ष्यत इति कथनं तु विलीनमेव। 'मृत्तिकेत्येव सत्यं' इति वाक्य-शेषस्तु यथा शरीरद्वारकपरिणामवादेऽविकृतपरिणामवाद एव कथं संगच्छते इति तु तदनन्यत्वाधिकरणालोचने प्रकाशयिष्यामः। यत्त्विदमेवात्रालोचनीयं—"यत् मृद्घटयो-रिव ब्रह्मप्रपञ्चयोरेकद्रव्यत्वं किं तन्मतमुत नेति। आद्ये ब्रह्मविकार्यत्वापत्तिः, द्वितीये तच्छरीरसूक्ष्मचिदचितोः स्थूलचिदचितोश्चैकद्रव्यत्वसाधनेन यदि तद्द्वारैकविज्ञानेन सर्वविज्ञानं साध्यते, तर्हि न केवलं क्लिष्टकल्पनाऽपि तु दृष्टान्तास्वारस्यमपीत्युक्तम्॥" तत्रैतावदेवालोचनीयं यत्—ब्रह्मप्रपञ्चयोरेकद्रव्यत्वं किं तन्मतमुत नेति कथनं किं विशि-ष्टाद्वैतप्रक्रियामवगत्योक्तमुत न ?, यद्यवगत्योक्तमित्युच्यते तदा तु कथं वा विशिष्टा-द्वैतप्रक्रियामनुसरत्ययं विकल्प इति साधनीयमेव। नहि विशिष्टाद्वैतिनो ब्रह्मप्रपंचयोरेक-द्रव्यत्वमभ्युपगच्छन्ति, अपि तु सूक्ष्मचिदचिद्विशिष्टस्थूलचिदचिद्विशिष्टयोरिति तु निखिलवेदान्त्यनुभवगम्यमेव। नन्वेवं प्रतिज्ञोपपादने तु क्लिष्टकल्पनादृष्टान्तास्वारस्यरूप-दोषद्वयमायातीति चेत्—एतद् दोषयुग्मं तु विशेषतोऽद्वैतमत एव। तथा हि—सद्विद्याया-मेकविज्ञानेन सर्वस्य विज्ञानमिति मुख्यः प्रतिज्ञातोंऽशः, प्रतिज्ञांशदृष्टान्तांशयोः प्रतिज्ञा-तांशस्यैव प्राधान्यम्, एष सिद्धान्तस्तु सर्वतन्त्रानुमोदितः। 'प्रकृतिश्चे'ति सूत्रे श्रीव्यासा-चार्यैरपि "प्रतिज्ञादृष्टान्तानुपरोधात्" इत्यत्र प्रतिज्ञातांशप्राधान्यद्योतनाय प्रतिज्ञापदस्यैव पूर्वं प्रयोगः कृतः, नतु दृष्टान्तपदस्य। प्रतिज्ञातांशे विज्ञानपदस्य क्लिष्टकल्पना त्वद्वैतिमत एव, एतत्तु अधस्तादेवोदितम्। श्रीरामानुजमते तु केवलदृष्टान्तांशस्यैव क्लिष्टकल्पना-भाक्त्वम्। प्रधानांशे क्लिष्टकल्पनापेक्षयाऽप्रधानांश एव तत्करणं ज्याय इत्यत्र तु नास्त्येव विशेषोपपादनावश्यकता, एतत्त्वन्वारुह्योक्तम्। वस्तुतस्तु श्रीरामानुजमते तथा न दृष्टान्तास्वारस्यं यथा अद्वैतिमते। नहि मृत्पिण्डे विवर्तोपादानत्वं मृत्पिण्डा-भिव्यक्तकार्यकलापस्य केनापि दृष्टम्। अद्वैताभिमतकार्यस्वरूपसाधने तु शुक्तिरजतादि-दृष्टान्तानामेवोपयोगित्वमिति तु पाराशर्यविजये सुष्ठूपपादितम्।

यत्त्वन्तर्याम्यधिकरणे "एतेन 'अन्तर्याम्यपि निर्गुण एव' इति व्याख्यातम्" इति वचनं तदालोचनीयमेव, 'नियमनादिकार्यं कुर्वन्नपि निर्गुण' इति वचनस्य बाधितत्वात्। विश्वनियमनाद्यकर्तुरपि अन्तर्यामित्वस्वीकारे यस्यकस्यचिदपि अन्तर्यामित्वप्रसङ्गः। यापि 'नह्यन्यथा तद्विज्ञानेन सर्वविज्ञानमुपपद्यते' इत्युक्तिः,-सापि चिन्त्यैव। अन-योक्त्या साधनीयेऽर्थे हेतुरुपस्थाप्यते। एवं चात्रायमनुमानप्रयोगोऽपि सूचितो भवति "अन्तर्यामी निर्गुणस्तद्विज्ञानेन सर्वविज्ञानस्य श्रुत्युक्तत्वात्।" किन्त्वत्रैतावदेव चिन्त्यं यदयं सद्धेतुरुत हेत्वाभासः ?। अस्माभिस्त्वस्य हेतोः प्रतिवाद्यसिद्धत्वमुच्यत इति कृत्वा नानेन हेत्वाभासेन साध्यसिद्धिर्भविता। उभयवाद्यभ्युपगतस्यैव हेतोरनुमाने प्रयोगः कर्तव्य इति तु सर्वसंप्रतिपन्नम्। किञ्च तत्रैव यत् सद्विद्याक्षरविद्ययोर्निर्विशेषविषयत्व-मुक्तं,-तदप्यनुपपन्नमेव। कल्पितधर्मपुरस्कारेण ब्रह्मनिरूपणस्य सगुणविषयविद्यायां

निर्विशेषविषयविद्यायामुभयत्रापि सत्त्वे तु तयोर्विवेकस्य विलुप्तत्वेनेयं सगुणविद्येयं निर्गुणविद्येति विवेकप्रतिपादनस्याशक्यत्वात् । विवेकसाधकेतरविनिगमकस्यानुपलब्धेश्च । न च क्रममुक्तिफलकत्वं सद्योमुक्तिफलकत्वमित्यादिविवेकविनिगमकमुपलभ्यत इति कृत्वा इतरविनिगमकस्यानुपलब्धेश्चेति वचनमसाधीय इति चेत्–तदपि न; अद्वैतिदृष्ट्या क्रममुक्तिफलकत्वादीनामपि सगुणनिर्गुणविषयत्वाधीन्यस्य प्रसिद्धत्वेनान्योन्याश्रयादीनां अनिवार्यतया विनिगमकानुपलब्धिस्तु स्थिरीभूतैव । यदपि एतदव्यवहितप्रश्नोत्तरे "तद्धर्मोपदेशात्" इति तु निर्विशेषोपदेशस्य सद्विद्याक्षरविद्ययोरध्यारोपापवादविधया तटस्थलक्षणविधया कल्पितधर्मपुरस्कारेण प्रवृत्तत्वात् निर्विशेषपरत्वेऽपि नानुपपन्नम् । इयान् विशेषः–एनयोः कार्यकारणभावविधया धर्मद्वारा निर्विशेषोपदेशः, अत्र तु शरीरद्वारेति । शरीरद्वाराऽपि निर्विशेषोपदेशस्तु आनन्दमयविद्यायां दृष्टचर एव । तथा चानन्दमयाधिकरणसिद्धान्तन्यायेनापि निर्विशेषपरत्वं तद्धर्मोपदेशेऽपि न दोषायेत्युक्तम्,–तदपि चिन्त्यमेव । तथा हि–विद्याया निर्विशेषपरत्वमित्यस्य कोऽर्थः ? किं सकलधर्मशून्यप्रतिपादकत्वमुत कल्पितधर्मपुरस्कारेण ब्रह्मप्रतिपादकत्वं ? यद्वा यस्यां विद्यायां कतिपयवाक्यैरध्यारोपन्यायेन धर्मयुक्तब्रह्मप्रतिपादकत्वं तस्यामेवापरवाक्यैः अपवादन्यायेन धर्मरहितब्रह्मप्रतिपादकत्वं साक्षात् सधर्मकब्रह्मप्रतिपादकत्वेऽपि परम्परया निर्विशेषब्रह्मप्रतिपादकत्वं वा ? । न तृतीयः । एतादृशनिर्विशेषपरविद्याया एवानुपलब्धेः । नन्वानन्दमयविद्याया एवैतादृशनिर्विशेषपरत्वमस्तीति चेत्–न; आनन्दमयविद्यायां कुत्रापि निर्विशेषपरत्वसाधकश्रुतिलिङ्गाद्यनुपलब्धेः निर्विशेषपरताया एवाशक्यवचनत्वात् । यद्युच्यते–"यतो वाचो निवर्तन्ते" इति श्रुतिरेवानन्दमयविद्याया निर्विशेषपरत्वसाधने प्रबलप्रमाणमिति चेत्–न; अस्याः श्रुतेः निर्विशेषसाधकत्वकल्पनाया अपि दूरनिरस्तत्वात् । श्रीपुरुषोत्तमचरणैर्भाष्यप्रकाशतृतीयाध्यायद्वितीयपादेऽस्याः श्रुतेः सविशेषपरत्वस्य बहुधा प्रपञ्चितत्वात् । कवितार्किककेसरिनिगमान्तमहादेशिकैरपि तत्त्वमुक्ताकलापे "वाच्यत्वं वेद्यताञ्च स्वयमभिदधति ब्रह्मणोऽनुश्रवान्ता वाक्चित्तागोचरत्वश्रुतिरपि हि परिच्छित्त्यभावप्रयुक्ता । नो चेत् पूर्वापरोक्तिस्ववचनकलहस्सर्ववेदान्तबाधस्तत्सिद्धिर्हेतुभिश्चेत् प्रसजति विहतिर्धर्मिसाध्यादिशब्दैः" । इति श्लोकेनास्याः सविशेषपरत्वस्यैव स्थापितत्वात् । न्यायसिद्धाञ्जनेऽपि अवेद्यत्वनिराकरणेन वेद्यत्वप्रदर्शनेन च 'यतो वाच' इति वाक्यस्य निर्विशेषपरताया अनेकधा खण्डितत्वात् । तत्र निर्दिष्टे पद्ये यथा–'अवाच्यं वाच्यमिति वा वस्तुनि प्रतिपादिते । वाच्यमेव भवेद् वस्तु वाच्यावाच्यवचोन्वयात् । अनुभूतिरवेद्येति वचनं बोधकं न वा । आद्ये तेनैव वेद्यत्वं नो चेत् किं क विधीयते ।' चण्डमारुतनिर्दिष्टानि पद्यान्यपि अत्रोपयुक्तानि इति कृत्वा उदाह्रियन्ते–"ब्रह्मण्यशब्दवाच्ये स्याद्वचसां वाच्यमुत्तमम् । इत्यादिमानविद्वेषो वाच्यतोपहितस्य चेत् ॥ स्वरूपस्यापि वाच्यत्वं तदन्तर्भावतो भवेत् । उपधानेन शून्यस्यावाच्यत्वे व्याहतिर्भवेत् ॥ वाच्यत्वं ब्रह्मणो वाच्येऽनुपधाने न लक्षणा । समानसत्त्ववाच्यत्वाभावे तौल्यं घटादिना । निमित्तो-

पहिते शब्दस्वरूपं चेन्न गोचरः । यतो वाचो निवर्तन्ते श्रुतिस्तु गुणगोचरा । स्वरूपगोचरत्वेऽपि कथं शक्तिर्निवार्यते । अप्राप्येति निषेधे तु कथं मृष्येत लक्षणाम् । निर्दिश्य-वृत्तिमात्रस्य निषेधव्याहतिस्ततः । शक्तेर्निषेधश्चेत्तर्हि लक्षणा वा निषिध्यताम् ॥ लक्षणाया निषेधे हि वाच्यत्वश्रुत्यनुग्रहः । तात्पर्यमपरिच्छेदे श्रुतेः प्रकरणात्ततः ॥ मनसा सममाम्नानान्निवृत्तिर्दुर्वचा गिरः । इष्यते हि मनोवृत्तिः परैरपि परात्मनि" इति । अयमर्थः-ब्रह्मणः शब्दवाच्यत्वाभावे "वचसां वाच्यमुत्तमम्"इत्यादिविरोधः । उपहितस्य वाच्यत्वे न विरोध इति चेत् ? किं तर्ह्यवाच्यम् ? अनुपहितमिति चेत् ? किं तदनुपहितम् किं स्वरूपमेव ? उतोपाधिशून्यं स्वरूपम् ? किं वा उपधानाभावः ? आद्ये-उपहितस्य वाच्यत्वे स्वरूपस्यापि तत्प्रवेशेन वाच्यत्वमनिवार्यमेव । द्वितीयेऽपि किमुपहितस्वरूपमेवोपधानशून्यं विवक्षितम् ? किं वा ततोऽन्यत् ? आद्ये व्याघातः । यदि चोपहितस्याप्युपधानस्यापारमार्थिकतया पारमार्थिकोपधानशून्यत्वान्न व्याघातः । एवमपि तादृशं ब्रह्मवाच्यमेवेति कथमवाच्यता ? । द्वितीयमसिद्धमनङ्गीकृतं च । एतेन तृतीयमपि निरस्तम्; ब्रह्मणो वाच्यत्वाविरोधाच्च । यदि चोपहितान्तर्भावेन स्वरूपस्य वाच्यत्वेऽपि घटादिवद्धर्मिसमानसत्ताकवाच्यत्वाभावमात्रेणा-वाच्यत्वसिद्धिं मन्यसे, तर्हि अवाच्यमिव ब्रह्मालक्ष्यमपि स्यात्, लक्षणावैयर्थ्यं च । यदि च प्रवृत्तिनिमित्तोपहितप्रतीतेः शक्त्यधीनत्वेऽपि स्वरूपमात्रप्रतीतेः शक्त्यधीनत्वाभावात् स्वरूपमवाच्यम्, प्रवृत्तिनिमित्तस्य मिथ्यात्वेन तद्विषयकप्रतीतेरविद्यानिवर्तकत्वाभावात्, शब्दजन्यस्वरूपमात्रविषयकापरोक्षवृत्तये स्वरूपलक्षणेति ब्रूषे; तर्हि घटाद्यविशेषः । नहि घटत्वाद्युपहिता शक्तिस्तदनुपहितं बोधयति । न च वाच्यत्वे ब्रह्मणो 'यतो वाचो निवर्तन्ते' इति श्रुतिविरोधः, तस्याः गुणापरिच्छेदतात्पर्यकत्वात् । स्वरूपानन्दविषयत्वेऽपि वाङ्मात्रनिवृत्तिप्रतीत्या कथं शक्तिनिवृत्तिः ? । ननु "अप्राप्य निवर्तन्त" इति शक्तिरूपसम्बन्धाभावाद् वाङ्निवृत्तिः प्रतीयत इति चेत्-न; वृत्तिमात्रस्य शब्दार्थसम्बन्धतया लक्षणाया अपि निषेधप्रसङ्गात् । यत इति निर्दिश्य वृत्तिमात्रनिषेधे व्याघाताच्छक्तिर्निषिद्ध्यत इति चेत्-न; विपरीतस्य सुवचत्वात् । तथा सति हि "वचसां वाच्यमुत्तम"मित्याद्यनुग्रहश्च । किञ्चैवं संकोचे प्रकरणानुसारात् मानुषादीनां प्राजापत्यपर्यन्तानामिवानन्दानां ब्रह्मानन्दस्य परिच्छेदाभावात् शब्दो न मानुषाद्यानन्दानिव प्राप्नोति-प्रकर्षेण सम्बध्यते, न तथा बोधनसमर्थः, अतो निवर्तत इत्येव श्रुत्यर्थ एष्टव्यः । किञ्च मनोवृत्तिनिषेधासम्भवेन तन्निषेधस्य उक्तार्थपरत्वे वाच्ये वाङ्निषेधस्यापि तत्परत्वमेव युक्तमिति । न तुरीयः, ईदृशनिर्विशेषपरत्वस्य सगुणप्रतिपादकवाक्येऽपि सत्त्वेन सगुणपरत्वनिर्गुणपरत्वयोर्विवेकविलयप्रसङ्गस्तदवस्थ एव । सर्वेषामपि वाक्यानामध्यारोपापवादपरम्परया निर्विशेषपर्यवसायित्वस्याद्वैतिसम्मतत्वात् । एतेन द्वितीयपक्षोऽप्यपास्तः । कल्पितधर्मपुरस्कारेण ब्रह्मप्रतिपादकत्वस्योभयत्रापि समानत्वात् । नाद्यः, सद्विद्याया अक्षरविद्याया अन्तर्यामिब्राह्मणस्य च सकलधर्मशून्य-

प्रतिपादकत्वमित्युक्तेः सर्वथा वक्तुमशक्यत्वेन 'अत्रापि निर्विशेषपरत्वम्' इत्यस्य वचनस्यानिर्वचनीयतैव पर्यवसिता। तस्मात् "तद्धर्मव्यपदेशादि"ति सूत्रांशविरोधस्तु अद्वैतिभाष्ये स्थेमानमाप्त एव। यदि विवरणादिमतेन वृत्तिव्याप्यत्वरूपवाच्यत्वस्य स्वीकारेण किं वा ब्रह्मणि लक्षणावृत्तेः प्रसराङ्गीकारेण श्रीदेशिकोक्तदूषणानां परिहारप्रयासः क्रियते, तथापि तस्य प्रबलशृङ्खलितांघ्रेरुत्प्लवनप्रागल्भ्याभ्यसनतुल्यत्वमेव सिद्ध्येत्। तथा हि—शुद्धस्यैवावाच्यत्वसमर्थनं तावत् अद्वैतिनामावश्यकम्। किन्तु वृत्त्यवच्छिन्नत्वे तस्य शुद्धत्वं कथं सुरक्षितं तिष्ठतीत्येतत्तु मायावादिभिरेव निरूपणीयम्। यद्यज्ञानस्य तत्परिणामस्यान्तःकरणादेरपि उपाधित्वमङ्गीक्रियते, तर्हि अज्ञानपरिणामस्य वृत्तेः कथं नोपाधित्वमिति तु विवरणाद्यनुयायिभिरेव वाच्यम्। नहि स्वपक्षसाधनानुकूल्यं प्रतिवादिनो भयावहम्, किन्तु सर्वमान्यतर्काद्यानुकूल्यमेवेति व्यक्तमेतत्। भामतीकारैस्तु "न चान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, तस्यैव तदुपाधेः विनश्यवदस्थस्य विद्यमानत्वात्" इत्यनया पंक्त्या सुस्पष्टं वृत्तेरुपाधित्वस्वीकारात्। किञ्च लक्ष्यत्वमपि सविशेषस्यैव निर्विशेषे लक्ष्यत्वस्याप्यभावात्। अतो लक्षणया निर्विशेषस्य वाच्यत्वमिति पक्षोऽपि निरस्त एव।

यदपि भूमाधिकरणे भूमपदार्थश्च निर्विशेषं ब्रह्म, तर्हि कथं धर्मोपपत्तेश्चेति सधर्मत्वोपपादनम्? यदि धर्मवत्त्वं कल्पितमिति मन्यते, तर्हि कथं तात्पर्यग्राहकोपपत्तिपदमत्र उपपद्यते? इति प्रश्नद्वये 'धर्मोपपत्ते'रिति तु सत्यत्वामृतत्वादि ब्रह्मस्वरूपाभिप्रायमेव। स्वरूपस्यापि लक्षणत्वमङ्गीकुर्वतामद्वैतिनां मते धर्मशब्दोऽपि स्वरूपे भाक्तो वर्तते इति स्वरूपात्मकधर्मवत्त्वमत्र बोध्यमानं न निर्विशेषवादविरोधि व्यावर्तकमात्रपरत्वात् धर्मशब्दस्य। स च धर्मोऽसत्यत्वाभावादिब्रह्मस्वरूपत्वान्मुख्यतात्पर्यविषय एवेति नोपपत्तिपदायोग इत्युत्तरितं—तदप्यविचारितरमणीयमेव। श्रीनारायणसरस्वतीकृतवार्तिकस्थेन 'लिङ्गं तु धर्मोपपत्तेरित्यनेन वक्ष्यमाणम्' इति वाक्येनोक्तधर्माणां धर्मरूपताया एव स्थिरीकरणात्। उत्तरमीमांसायां तु विशेषणपदबोध्यस्यासाधारणधर्मस्यैव लिङ्गत्वाभ्युपगमात्। शास्त्रिचरणैरपि आकाशाधिकरणालोचने प्रश्नोत्तरसाहस्र्यां पूर्वोक्तस्यैव लिङ्गपदनिर्वचनस्य स्वीकारात्। स्वरूपस्यैव व्यावर्तकत्वस्वीकारे तु सविशेषत्वप्रसक्तिः दुर्वारैव। किं च स्वरूपस्यैव व्यावर्तकसामर्थ्ये तु को वा विशेषलाभो विशेषणस्वीकारेण, प्रत्युत गौरवमेव। अत्र विचारस्तु श्रीभाष्ये—"न च ते वस्तुमात्रमिति शक्योपपादना वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात्। स्वाभिमतविधाभेदैः स्वमतोपपादनात्" इत्यत्र तु सुचारुरूपेण कृत इति न विशेषतो विस्तरः क्रियते। अत्रत्या श्रुतप्रकाशिकाऽपि अवलोकनयोग्यैव। तत्रत्यो आवश्यकभागस्तु उदाह्रियते—"तथा हि—क्षणिकत्ववादिनं प्रति वस्तुनित्यत्वं साधयता त्वया स्वरूपमात्रातिरेकेण किंचित् साधितमस्ति न वा?। अस्ति चेत् सधर्मत्वं, नो चेत् सिद्धसाधनता स्वरूपमात्रस्याभिमतत्वात्। संवित् नित्या इति" प्रतिज्ञावाक्यगतौ

धर्मधर्मिशब्दौ पर्यायौ न वा ?। आद्ये तत्साधनायासो निष्फलः, द्वितीये स्वरूपातिरिक्त-धर्माङ्गीकार इति भावः। धर्मशब्दस्य स्वरूपाभिप्राये तु एकवचनेनैव धर्मजातमुप-देष्टव्यं, एकवचनस्यैवाद्वैतबोधकत्वात् । एतेन अक्षराधिकरणान्तर्गतप्रशासनादिति सूत्रस्था सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्मेति तेषां पंक्तिरपि आलोचितप्रायैव। नहि अम्बरान्तधृतेः प्रशासनात्मककर्मणोऽपि स्वरूपात्मकत्वं सम्भवति। प्रशासनादी-नामपि स्वरूपात्मकत्वस्वीकारे तु पूर्वसूत्रेणैव चारितार्थ्यात्, 'प्रशासना'दिति उत्तरसूत्र-प्रणयनवैयर्थ्यमेव । तथा हि–अम्बरान्तधृतेः प्रशासनस्याप्यभिन्नस्वरूपत्वे तु पूर्वहेतुनैव साध्यसिद्धिसम्भवेन 'प्रशासनात्' इत्युत्तरहेतोरुन्मत्तकृतजलताडनकल्पत्वमेव स्यात्। नहि धूमात् धूमादिति वारद्वयं हेतोः प्रयोगः कुत्रापि साध्यसाधकवाक्ये दृष्टः। अत्र प्रशासनादिकर्मणः स्वरूपात्मकत्वकथनं तु सर्वथाऽशक्यमेव। तथा साधारणेऽपि जगदा-धारलिङ्गे सा च 'प्रशासनादि'ति विशेषलिङ्गेन ब्रह्मपरत्वमुन्नीतम्, इति शारीरिकन्याय-संग्रहपंक्त्या उभयोरपि हेत्वोः सामान्यविशेषरूपत्वस्थापनेन निःसामान्यविशेषरूप-स्वरूपात्मकतायाः सुव्यक्तमपाकृतत्वात् । अद्वैत्यभिमतब्रह्मस्वरूपे सामान्यविशेषादि-कथनस्यासम्भवदुक्तिकत्वमित्येतत्तु अभियुक्तैः बहुधा प्रपञ्चितम्। विशेषजिज्ञासायां न्यायसिद्धाञ्जनस्थेश्वरपरिच्छेदः शतदूषणीगततिरोधानानुपपत्तिवादो निवर्तकानुपपत्ति-वादोऽप्यवलोकनीयः। यदि तु आग्रहिलतया भूमाधिकरणेऽक्षराधिकरणे च सगुणस्यैव प्रतिपादनमित्यङ्गीक्रियते, तर्हि न निर्विशेषे विशेषस्वीकाररूपो दोष आयातीति चेत्–न; तृतीयपादस्य तु ज्ञेयब्रह्मनिरूपकतयाऽस्मिन् पादे सगुणनिरूपणस्याप्रकृतत्वात्। तत्परिग्रहे तु प्रकृतहानाप्रकृतनिरूपकत्वादिदोषप्रसङ्गात्।

वाचस्पतिमिश्रा अपि 'इह ज्ञेयत्वेन ब्रह्मोपक्षिप्यते'ति वचनेन निर्धर्मकस्यैव प्रकृतत्वं मन्यन्ते। न च न्यायनिर्णये संप्रति निर्विशेषप्रचुराणां तेषां तत्परतां वक्तुं पदान्तरमार-भन्त इति पंक्त्या प्रचुरशब्दस्य सत्वेन सगुणस्यापि ग्रहणं न दोषावहमिति चेत्; प्रकृता-धिकरणद्वये तु न प्रचुरपदेनापि निर्वाहः इति तु कथायां वक्तुं पारयामः। तथा हि– अक्षराधिकरणस्य तु निर्विशेषपरत्वं अकामेनापि अद्वैतिना उररीकार्यमेव। अद्वैतिमते अक्षरपदस्य अक्षरपरताया "ये त्वक्षरमनिर्देश्यम्" इत्यादिस्थले दृष्टत्वात् अविद्यापरस्य तु "अक्षरादपि चोत्तमः" "द्वाविमौ पुरुषौ लोके" इत्यादिषु प्रसिद्धत्वा अविद्यापरत्वं निर्विशेषपरत्वं वक्तुं शक्यते न तु शबलपरत्वं तदर्थकतया अक्षरशब्दस्याद्वैतिनां मते सर्वथाऽप्रसिद्धत्वात्।

यत्तु प्रकृत्यधिकरणालोचने षट्सप्तत्युत्तरसप्तशततमे प्रश्ने नहि कार्यकारणयो-रभेदमात्रेण प्रतिज्ञादृष्टान्तानुपरोधः, किन्तु कारणस्वरूपव्यतिरिक्तकार्याभावेनैवेति वचनम्,–तदपि नवत्युत्तरद्विशततमप्रश्नसमालोचनेनैवालोचितप्रायमिति न पुन-र्निरासः क्रियते।

यदपि अविद्यैव कारणम्, ब्रह्म तु न कारणमेवेति सिद्धान्तस्यापि सिद्धान्तलेशसंग्रहे दर्शनात् किमिति ब्रह्मणोऽप्युपादानत्वं समर्थ्यत इति प्रश्नः—अविद्यैव कारणं ब्रह्म तु न कारणमेवेति मतस्यायमेवाशय इत्यादि यदुत्तरं,—तदप्युपलब्ध्यतिरेकविभ्रममेवाविष्करोति। किं वरुणादिसदृशापरोक्षज्ञान्युक्तब्रह्मज्ञापकमुख्यधर्मस्य कन्दुकप्रायत्वं भवताऽभ्युपगतम्, येनेश्वरनिष्ठमिवाविद्यानिष्ठमपि लक्षणं निर्वोढुं शक्यत इति। अत्राविद्यानिष्ठं कारणत्वमेव तदधिष्ठाने ब्रह्मण्यपि शुद्धे कल्पयित्वा ब्रह्मोपादानत्वव्यपदेश इत्येव मन्यत इति पंक्तिद्वयेन कदाचित्कारणत्वस्याविद्यायां कदाचिद्ब्रह्मण्यपि कल्पने स्वाच्छन्द्यं प्रदर्श्यते। न वयं कल्पयामः। श्रुतिरेव कल्पने साहाय्यमावहतीति चेत्, एतत्कथनस्य परस्पराश्रयदोषग्रस्तत्वात्। धर्मनिषेधकवचनानां सर्वथा निर्विशेषपरत्वे सिद्धे सगुणप्रतिपादकवाक्यानां कल्पितधर्मप्रतिपादकत्वसिद्धिः, गुणाभिधायकवचनानां कल्पितगुणप्रतिपादकत्वे सिद्धे विशेषनिषेधकवाक्यानां निर्गुणपरत्वसिद्धिरिति।

तथा हि—'यतो वा इमानि भूतानि जायन्ते', 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्', 'सविश्वकृद्विश्वविदात्मयोनिः', 'अन्तः प्रविष्टं कर्तारमेतम्,' 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा' इत्यादि वेदान्तेषु ब्रह्मासाधारणधर्मतया श्रुतस्य जगत्कारणत्वस्य व्यभिचरितत्वप्रदर्शनेन साधूपकृतं वेदान्तदर्शनस्य। किञ्चास्य प्रश्नोत्तरस्याद्वैतमते प्रधानस्थानीयप्रकृतेरपि कारणत्वस्वीकारात् तत्कारणत्वेनैव ब्रह्मणोऽपि कारणत्वव्यवहारमात्रमिति सिद्धान्तस्यापि कौमुदीकारादिसम्मतत्वाच्चेति प्रश्नोत्तरसमालोचनेनैवालोचितत्वमिति विशेषविस्तारेण न पुनर्निरासः क्रियते।

यत्तु प्रकृत्यधिकरणे विवर्तोपादानतापरत्वं तु विवर्तोपादानस्यैवाप्रसिद्धत्वात्, अत्रैवाधिकरणे परिणामादिति परिणामपदस्यैव प्रयोगाच्च नोपपद्यत इति पर्यनुयोज्यविवर्तोपादानत्वं तु 'शुक्तिका रजतवदवभासत' इति भाष्ये शुक्त्यादौ प्रसिद्धमिति निरूपितम्। अप्रसिद्धावपि लोके श्रुतिप्रामाण्यसंरक्षणार्थं 'श्रुतेस्तु शब्दमूलत्वात्' इति न्यायेन प्रसाधयितुं शक्यते इति समाहितम्,—तन्न विचारपदवीमधिरोढुमर्हति; 'श्रुतेस्तु शब्दमूलत्वादि'ति न्यायस्य अद्वैतिमते सर्वथाऽनवकाशात्। व्यक्ततया विवर्तोपादानताबोधकश्रौतवचनस्यानुपलभ्यमानत्वेन कथं वा विवर्तोपादानताबोधनेऽस्य न्यायस्य प्रसरः स्यात्?। 'सैषा विद्या जगत् सर्वं'मित्यादिवचनानामन्यथा योजनस्य नृसिंहोत्तरतापनीयटीकायां सृष्टिभेदवादे च श्रीपुरुषोत्तमचरणैः प्रदर्शितत्वेन तादृशवचनैरपि भवन्मनोभिलषितसिद्ध्यभावात्। 'सदेव सोम्येदमग्र आसीत्,' 'एकमेवाद्वितीय'मित्यादिवाक्यानामपि प्रपञ्चसत्यत्वानुकूल्यस्याभियुक्तैर्बहुधा प्रपञ्चितत्वेन विवर्तोपादानत्वबोधकश्रुतिलेशस्याप्यनुपलब्धत्वात्। प्रायः सर्वत्र येन लोकसिद्धदृश्यत्वादितर्कोपजीवनं कृत्वा—'यदिदं तत्सत्यमित्याचक्षते तदेतत्सत्य'मित्यादिश्रुतिवाक्यानां मुख्यार्थात्प्रच्यावनं क्रियते, को वाधिकारस्तस्यैतन्न्यायोपजीवनस्यापि?।

भवन्मते तु प्रायः बौद्धोच्छिष्टयुक्तेरेव प्राबल्यदर्शनेन, 'श्रुतेस्तु'–इति न्यायस्थाने प्रच्छन्नबौद्धस्य बौद्धोच्छिष्टतर्कमूलत्वादित्यस्य न्यायस्यैव प्रसरो भवितुमर्हति। किञ्च 'श्रुतेस्तु' इति सूत्रभाष्यप्रकाशे श्रीपुरुषोत्तमचरणैरस्य न्यायस्य सर्वथाऽद्वैतिमतविरोधित्वमुपपादितमिति नेह प्रतन्यते। किञ्चास्मिन्नधिकरणे यत्परिणामपदं प्रयुक्तं तेन विवर्तपरिणामस्यैव ग्रहणमित्यत्र विनिगमनाविरह एव, परिणामपदस्वारस्यमपि मृद्घटादिपरिणामस्थल एव। विवर्तपरिणामस्याद्वैतिगृह एव प्रसिद्धत्वात्। अपि च 'परिणामात्' इत्यस्य विवर्तपरिणामादित्यर्थाभ्युपगमे तु आत्मकृतेरित्यंशस्य वैयर्थ्यात्। नहि विवर्तवादे आत्मकृतेः कश्चनोपयोगः। संक्षेपशारीरकविवरणमते तु त्वधिष्ठानस्य निर्विशेषत्वेन तत्र कृतिलेशस्यापि वक्तुमशक्यत्वात्। अतो विवर्तवादाभ्युपगमे तु दोषकृतेः परिणामादेवमेव सूत्ररचना स्यात्, किन्त्वेवमनुपन्यस्य, आत्मकृतेरिति सूत्रोपन्यास एव विवर्तपक्षं समूलघातमुपहन्ति। विवर्तपदाध्याहारप्रसङ्गाच्चायं पक्षो दुष्टः, परिणामवादे नैतेषां दोषाणामवकाशः, निर्विशेषणपरिणामपदस्य तात्त्विकपरिणामबोधकत्वमेव बहुलमुपलभ्यते। शाङ्करग्रन्थेष्वपि परिणाम्युपादानं विवर्तोपादानमिति प्रयोगद्वयमुभयोपादानबोधकमुपलभ्यते, तत्र तात्त्विकादिविशेषणं विनैव परिणामपदस्य तात्त्विकपरिणामबोधकता प्रतीयत इत्यस्मदुक्तमेव साधीयः।

यदपि सर्वधर्मोपपत्त्यधिकरणपरीक्षायाम्–'अथातो ब्रह्मजिज्ञासे'ति प्रक्रम्य सर्वधर्मोपपत्त्योपसंहारः कथं न निर्विशेषब्रह्मवादविरोधी? इति प्रश्नस्योत्तरे प्रक्रान्तं ज्ञेयं ब्रह्मैव जगत्कारणत्वादितटस्थलक्षणविधया लक्ष्यते इत्यङ्गीकारान्निर्विशेषत्वसविशेषत्वादि सर्वधर्मोपपत्तिरद्वैतमत एवेति यदुक्तम्,–तत्रापि व्याहतार्थवादितैव व्यक्ततया दृश्यते। तथा हि–निर्विशेषत्वमपि यदि धर्मकोटिनिविष्टम्, तर्हि ब्रह्मणो निर्विशेषत्वं नष्टप्रायमेव। स्वरूपकोटिनिविष्टत्वस्वीकारे तु 'धर्मोपपत्ते'रित्यत्र धर्मपदेन निर्विशेषत्वरूपधर्मबोधनस्याशक्यत्वेन निर्विशेषत्वसविशेषत्वरूपसर्वधर्मोपपत्तिरद्वैतमत एवेति कथनस्य भग्नत्वमेव स्यात्। किं च निर्विशेषत्वमपि यदि धर्मविशेषस्तर्हि तु 'ब्रह्मणो निर्विशेषत्वमिति धर्मोऽस्ति वा न वा। द्विधाऽपि सविशेषत्वमतद्योगतदयोगजम्।' इति न्यायसिद्धाञ्जनोक्तिरेव जयश्रीशालिनी स्यात्। यद्युच्येत स्वरूपस्यापि लक्षणत्वमङ्गीकुर्वतामद्वैतिनां मते धर्मशब्दः स्वरूपेऽपि भाक्तः प्रवर्तते व्यावर्तकमात्रपरत्वाद्धर्मशब्दस्येति कृत्वा कथं वा न्यायसिद्धाञ्जनोक्तदूषणस्याद्वैतमते प्रसरः?। किंचैतादृशधर्मस्वीकारेणाद्वैतमते सर्वधर्मोपपत्तिरिति कथनमपि सुरक्षितं तिष्ठतीति चेत्–किं व्यावर्तकत्वं स्वरूपेऽपि भवताऽङ्गीकृतं येन व्यावर्तकत्वगुणयोगाभ्युपगमः स्यात्, तथासति कया विधया निर्गुणत्वनिर्वाहः इति तु मायावादिभिरेव निरूपणीयम्। किंच धर्मरहितकेवलस्वरूपमात्रेणेतरव्यावृत्तिः कुत्राप्यप्रसिद्धा, कथमद्वैतिमत एव भवतीत्याश्चर्यावहमेतत्। अत्र विशेषविस्तरस्तु भूमाधिकरणालोचने कृत इति विशेषज्ञानेच्छायां सोऽपि भागोऽवलोकनीयः। यदपि सगुणब्रह्मवादे तु सर्वपदं वितथमिति कथनं,–तदपि बालविभीषिकामात्रमेव; सर्वपदेन निर्विशेषत्वसविशेषत्वरूपधर्माणा-

मेव ग्रहणमित्येतादृशवैदिकवचनस्य वा राजाज्ञाया अभावात् । सर्वधर्मपदेन प्रकृतित्वाभिन्ननिमित्तोपादानत्वसर्वकामत्वसर्वज्ञत्वाचिन्त्याद्भुतानन्तशक्तिमत्त्वादिधर्माणामेव ग्रहणमिति युक्तमुत्पश्यामः । तेषामेवोपपत्तिरस्मिन् सूत्रे प्रतिपाद्यत इति कथनमेवोपपद्यतेऽनुपपत्तिलेशस्याप्यभावात् । निर्विशेषत्वसविशेषत्वरूपधर्मोपपत्तिपक्षस्तु सर्वथाऽनुपपत्तिग्रस्त एवेति त्वधस्तात्सुव्यक्तमुपपादितम् । यद्युपहित एव सर्वधर्मोपपत्तिरनेन सूत्रेण पर्यवस्थाप्यते, तर्हि तु घट्टकुटीप्रभातन्यायेन प्रकृतिकारणत्वाङ्गीकार एव भिन्नमुखेन सिद्ध्येत् । एवं च प्रकृतावेव सर्वधर्मोपत्तिरनेन सूत्रेण प्रदर्शिता भवेत्, न ब्रह्मणि ।

यत्तु अस्यैव प्रश्नस्य अथवा जीवधर्माणामित्यारभ्यौपाधिकरूपेणानौपाधिकरूपेण सर्वधर्मोपपत्तेरित्यन्तं द्वितीयं समाधानं,—तदपि स्वमनीषिकामात्रसमुत्प्रेक्षितमेव । औपाधिकरूपेण धर्मोपपत्तिस्तु अनुपपत्तिप्रायैव । औपाधिकधर्माणामुपाधावेव पर्यवसानस्य प्राक् प्रदर्शितत्वेन ब्रह्मणि सर्वधर्मोपपत्तेरसंभवदुक्तिकत्वात् ।

किञ्च जीवधर्माणां मुख्यप्राणधर्माणां सत्त्वासत्त्वात्मत्वादिविरुद्धधर्माणामुपपत्तिरद्वैतवाद एवेत्युक्तिस्तु स्वभाष्यविरुद्धैव । 'सर्वधर्मोपपत्तेश्चे'ति सूत्रे कारणधर्माणामेवोपपत्तिनिरूपणमिति त्वेतत्सूत्रस्थया यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते, सर्वज्ञं, सर्वशक्तिमहामायं च ब्रह्मेति पंक्त्या सुस्पष्टं दृश्यते । 'सर्वज्ञं,' 'सर्वशक्ति,' इति विशेषणद्वयेन 'सर्वधर्माणामुपपत्तिरुक्ता' इत्यनया वार्तिकोक्त्यापि सर्वज्ञत्वसर्वशक्तिमत्वरूपकारणत्वौपयिकधर्मद्वारा धर्मोपपत्तिप्रदर्शनेनोपलक्षणविधया कारणधर्माणामुपपत्तेरेवैतत्सूत्रप्रतिपाद्यत्वस्य सिद्धान्तितत्वात् । किं च मायिकधर्मवादिमते उपपत्तिपदप्रयोगोऽपि नोत्थानमर्हत्यनुपपद्यमानार्थत्वान्मायायाः । तदुक्तं भवत्कूटस्थैर्दुर्घटत्वमविद्याया भूषणं नतु दूषणम् । भामतीवचनान्यपि यथा "अस्तु वाऽनुपपत्तिरेव कार्यकारणयोर्मायात्मकत्वात् । अनुपपत्तिर्हि मायामुपोद्बलयति, अनुपपद्यमानार्थत्वान्मायायाः परमार्थतस्तु न विभ्रमो नाम कश्चिन्न संसारो नामापि तु सर्वमेतत्सर्वानुपपत्तिभाजनत्वेनानिर्वचनीयमिति युक्तमुत्पश्यामः । अनिर्वाच्याच्चानिर्वाच्योत्पत्तौ नानुपपत्तिः, 'यादृशो यक्षस्तादृशो बलि'रिति सर्वमवदातम् ।" उदाहृतैरेतैर्वचनैर्मायिकपदार्थेऽनुपपत्तेरेव भूषणत्वात् सूत्रगतोपपत्तिपदनैरर्थक्यमेव मायावादिमते प्रसज्यते । यदपि 'मतान्तरेष्वपी'त्यादिकथनं तदपि मन्दम् । निर्विशेषवाक्यानां सविशेषपरतया योजन एव सर्वधर्मोपपत्तिर्नान्यथेति तूपरि निवेदितम् । निर्विशेषब्रह्मस्वीकारे तु 'सर्वधर्मोपपत्तेश्चे'ति सूत्रस्य जरद्गववाक्यतुल्यत्वमेव स्यात् । तस्मान्निर्विशेषवाद एव सर्वधर्मोपपत्त्युपसंहारो विरोधीति सिद्धम् ।

श्रीकृष्णाय नमः ।

सिद्धान्तमुक्तावली

दीक्षितश्रीलालूभट्टकृतव्याख्यालङ्कृता ।

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयम् ।
कृष्णसेवा सदा कार्या मानसी सा परा मता ॥ १ ॥

दीक्षितश्रीलालूभट्टप्रणीता योजना ।

श्रुत्येकसिद्धश्रृङ्गारमूर्तिमानन्दविग्रहम् ।
गोवर्द्धनधरं वन्दे श्रीराधाप्राणवल्लभम् ॥
नमामि श्रीमदाचार्यान् प्रभूञ्छ्रीविट्ठलेश्वरान् ।
यत्कृपातो व्रजाधीशसेवनं प्राप्नुयान्नरः ॥

अथ सकलसच्छास्त्रसारज्ञाः श्रीवल्लभाचार्यचरणा दैवजीवानामज्ञानान्यथाज्ञाननिष्ठानां भगवत्सेवनाप्रवृत्तिं तया च तदकृतार्थतामवलोक्य परमकृपालवस्तज्जनुस्साफल्याय श्रुतिगीताव्याससूत्रसमाधिभाषासिद्धं स्वसिद्धान्तं निरूपयन्ति—**नत्वा हरिमित्यादिना**। **कृष्णसेवेति**। "दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" "नेच्छन्ति सेवया पूर्णाः" "मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुरि"त्यादिवचस्सहस्रैः सेवाया मोक्षादप्युत्कृष्टत्वेन परमपुरुषार्थत्वम् । अतः सैव कार्या ।

तत्र कीदृशी सेवा विवक्षितेति तामाहुः—

चेतस्तत्प्रवणं सेवा तत्सिद्ध्यै तनुवित्तजा ।
ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम् ॥ २ ॥

मानसी सेति। यथा मर्यादाभक्तिमार्गे मुक्तिः फलं तथाऽत्र सेवा स्वतन्त्रपुरुषार्थरूपा मानसी फलमित्याशयः ॥ १ ॥ सेवां लक्षयन्ति—**चेतस्तत्प्रवणमिति**। तच्छब्देन पूर्वोक्तः कृष्णः परामृश्यते । "पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहे"त्यादाविवैकदेशान्वयस्वीकारात् । तथाच कृष्णप्रवणं चेतः सेवा । "देवानां गुणलिङ्गानामानुश्रविककर्मणाम् । सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या । अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी"ति लक्षणवाक्ये मनोवृत्तेरेव भक्तित्वेन कथनाद्वृत्तेश्च कारणानतिरेकात् । अतस्तादृशी चित्तवृत्तिर्मानसी सेवेति फलितम् । अत एव चेतस्तत्प्रवणमित्यस्याऽऽभासे श्रीमत्प्रभुचरणैरुक्तं यथेत्यारभ्यैतदेव सेवास्वरूपमित्याहुरित्यादि । अत एवाऽऽथर्वणे—"भक्तिरस्य भजनं तदिहाऽमुत्रोपाधिनैराश्येन मनः कल्पनमि"ति श्रूयते । अत्राऽपि 'मनसः कल्पनं भक्ति'रित्युक्त्या तादृक्चित्तस्यैव भक्तित्वमायाति । भक्तिमीमांसासूत्रेऽपि "सा पराऽनुरक्तिरीश्वर" इति लक्षणेन चित्तधर्मस्याऽनुरागस्यैव

भक्तित्वमुक्तम्, धर्मधर्मिणोरभेदात्। भक्तिशब्देन च सेवैव विवक्षिता। "भज सेवायामि" ति धात्वर्थात्। "विना मत्सेवनं जना" इत्युक्त्वा "स एव भक्तियोगाख्य आत्यन्तिक उदाहृत" इत्युदीरितत्वाच्च। पूर्वमपि "अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तम" इत्युक्तम्। अतो भक्तिशब्देन मुख्यतया मानसी सेवैवाऽऽयाति। सा केन साधनेन सम्पद्यत इत्याकाङ्क्षायामाहुः—तत्सिद्ध्या इति। "गृहशुश्रूषणं मह्यं दासवद्यदमायया" "तव परि ये चरन्ति" "आदरः परिचर्यायाम्" "श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्" "करौ हरेर्मन्दिरमार्जनादिषु" "शावौ करौ नो कुरुतः सपर्याम्" "करौ च तत्कर्मकरौ मनश्चे"त्यादिवाक्यैस्तनुजसेवायाः "सर्वलाभोपहरणमि"त्यादिवचोभिर्वित्तजायाश्च 'तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः। नृणां येन हि विश्वात्मा सेव्यते हरिरीश्वरः" "मुकुन्दसेवौपयिकं स्पृहा हि न" इत्यादिवाक्यैरुभयोश्च तथात्वावगतेः। इह ग्रन्थे विधेयांशः सेवा। ग्रन्थशेषस्तदुपपादनार्थः। ननु "ब्रह्मविदाप्नोति परमि"ति श्रुत्या पुरुषोत्तमप्राप्तौ ब्रह्मवित्त्वस्य कारणत्वोक्तेर्ज्ञानमवश्यं सम्पादनीयम्। तच्च वेदान्तश्रवणमननादिसाध्यम्। तानि च बहुकालसाध्यानि। इह तु सदा कृष्णसेवा कार्येत्युपदेशादवकाशाभावान्मननादिसाधनासिद्धेर्ज्ञानासिद्धिरित्याशङ्कयोत्तरं ब्रुवन्ति—ततः संसारदुःखस्येत्यादि।

ततस्तनुवित्तजसेवात एव संसारदुःखस्याऽज्ञानकार्यस्य नाशो ब्रह्मज्ञानं चाऽवान्तरफलं भवति। "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पत" इति वाक्यात्। "इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोध" इत्यादिवचनाच्च। अत एवोक्तं तत इत्यस्याऽऽभासे टीकायां श्रीमत्प्रभुचरणैरेतादृशस्याऽवान्तरफलं भवतीत्याहुरित्यनेन ॥ २ ॥ ज्ञानविषयस्य ब्रह्मणो रूपभेदानभिदधतः कृष्णे मूलरूपत्वं वदन्ति—

परब्रह्म तु कृष्णो हि, सच्चिदानन्दकं बृहत्।
द्विरूपं तद्धि सर्वं स्यादेकं तस्माद्विलक्षणम् ॥ ३ ॥

परब्रह्म त्विति। "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत" इति निर्वचनात्। इयं हि श्रुतिरेव। नारायणकृतौ गोपालपूर्वतापिन्युपनिषद्दीपिकायाम्—तत्राऽऽदौ कृष्णशब्दार्थनिर्णयमाह—कृषिर्भूवाचकः शब्द इति। कृष् विलेखने। कृष्यते विलिख्यत इति कृष् भूमिः। सत्। णश्च निर्वृतिवाचक इति। निर्वृतिरानन्दः सुखम्। शुद्धं ब्रह्मेति यावत्—एवमियं श्रुतिर्व्याख्याता। ततः "सच्चिदानन्दाये"ति श्रुतिर्व्याख्याता। अतः "कृषिर्भूवाचकः शब्द" इति गोपालतापिन्यारम्भेऽस्तीति बोध्यम्। "परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवती"त्यादिश्रुतेश्च। "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" "मत्तः परतरं नाऽन्यत्किञ्चिदस्ति धनञ्जये"ति भगवद्वाक्याच्च। तुशब्देनाऽक्षरस्य ब्रह्मत्वेऽपि परत्वाभावात् परस्य पुरुषोत्तम-

1 स्यादिति क.

अपरं तत्र पूर्वस्मिन्वादिनो बहुधा जगुः ।
मायिकं सगुणं कार्यं स्वतन्त्रं चेति नैकधा ॥ ४ ॥
तदेवैतत्प्रकारेण भवतीति श्रुतेर्मतम् ।
द्विरूपं चापि गङ्गावज्ज्ञेयं सा जलरूपिणी ॥ ५ ॥
माहात्म्यसंयुता नृणां सेवतां भुक्तिमुक्तिदा ।
मर्यादामार्गविधिना तथा ब्रह्माऽपि बुद्ध्यताम् ॥ ६ ॥

स्यैव सेव्यत्वम् । अनेन पूर्वोदितः कृष्णसेवाविधिः समर्थितः । सच्चिदानन्दकमिति । बृहत् अक्षरं ब्रह्म सच्चिदानन्दम् । अल्पार्थे कन् । "ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द" इति तैत्तिरीये गणितानन्दत्वात् । तदक्षरं द्विरूपमित्याहुः—द्विरूपं तद्धीत्यादि । एकं सर्वं निखिलप्रपञ्चात्मकं कार्यरूपम् । अपरं तस्मात्पूर्वस्माद्विलक्षणं प्रापञ्चिकधर्मरहितं "अस्थूलमनण्वि"त्यादि श्रुतिविषयः "सत्यं ज्ञानमनन्तं ब्रह्म" "यो वेद निहितं गुहायाम्" "सत्यं ज्ञानमनन्तं यद्ब्रह्मज्योतिः सनातनम्" "तदाहुरक्षरं ब्रह्म" "तद्धाम परमं मम"त्यादिश्रुतिस्मृतिविषयश्च । इदं तु ब्रह्मणो भौतिकं प्रपञ्चात्मकं रूपं नाशोत्पत्तिमत्त्वेन भासमानत्वान्मायिकं सगुणमित्याद्यज्ञानविलासैर्विकल्प्यते । वस्तुतस्तु "स हैतावानास" "स आत्मानं स्वयमकुरुत" "ऐतदात्म्यमिदं सर्वम्" "यदयमात्मा तत्सत्यम्" "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" "कथमसतः सज्जायेत" "सत्त्वाच्चाऽवरस्य" "असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" "पटवच्च" "नाऽभाव उपलब्धेः" "आत्मकृतेः परिणामादि"त्यादिश्रुतिन्यायशतैरक्षरात्मकमुररीकार्यम् । तत्र नाशोत्पत्तिप्रतीतिर्भ्रान्त्या । आविर्भावतिरोभाववत्त्वेन नित्यत्वात् । ननु "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति श्रुत्या विकारभूतस्य प्रपञ्चस्य कुतो न मिथ्यात्वमिति चेत्—न; "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण वाचारम्भणमित्यादिशब्दानां प्रपञ्चे ब्रह्मानन्यत्वप्रतिपादनार्थताया निर्णीतत्वात् । अपि च, घटे मृद्विकारत्वमिव प्रपञ्चे ब्रह्मविकारत्वं नास्ति । अविकृतपरिणामवादस्वीकारात् । यत्र हि कार्यस्य पुनः पूर्वभावापत्तिः सोऽविकृतपरिणामः । यथा कनककुण्डलस्य पूर्वभावापत्तिः कर्तुश्चिकीर्षया तथा प्रपञ्चस्याऽपि चिदानन्दप्राकट्ये पूर्वभावापत्तिः । अतो विकारत्वाभावाद्वाचारम्भण श्रुतेर्न प्रपञ्चे प्रवृत्तिः । किञ्च, मायिकं जगदिति वदन् वादी प्रष्टव्यः—कथमसत्प्रतीयत इति । शुक्तौ रजतमिवेति चेत्—न;

सिद्धान्तमुक्तावलीटीकाया विषमस्थलटिप्पणी ।

नन्वत्र श्रीलालूभट्टमहानुभावैः पूर्वपक्षनिरूपकवचने 'असत् प्रतीयते' इति कथमुक्तम्? अद्वैतिनस्तु सदसद्विलक्षणमनिर्वचनीयं प्रतीयते इति अभ्युपगच्छन्ति । असत्तु न प्रतीयते इति सहस्रशस्तेषां वचनम्, अतोऽस्याक्षेपस्याद्वैतिसिद्धान्ताऽसम्बद्धतयाऽऽक्षेपत्वमेवानुपपन्नम् ॥ किंचैवमाक्षेपकरणेऽनुक्तोपालम्भनमपीति चेत्—न; सदसद्विलक्षणमनिर्वचनीयं तदिति कथनं तु स्वगोष्ठीप्रसिद्धमेवेति सदसद्विलक्षणेति कथने-

चक्षुषोपलभ्यमानायां हि शुक्तिकायां रजतभ्रान्तिः। ब्रह्मणस्तु "पराञ्चि खानी" ति श्रुत्या सकलेन्द्रियागोचरत्वेन न तदधिष्ठानकभ्रमसम्भावनाऽपि। भ्रमोत्पत्तेः सादृश्य-सापेक्षत्वेन ब्रह्मप्रपञ्चयोः सादृश्याभावाद्भ्रमाभावः। न हि रज्जौ भुजङ्गभ्रम इव रजतभ्रमोऽपि सूपपादः, सादृश्याभावात्। ननु नीरूपत्वेन चक्षुरगोचरेऽपि व्योम्नि सादृश्यानपेक्षो नीलमिदं गगनमिति भ्रमो भवत्येवाऽज्ञानकलुषितबुद्धीनामिति चेत्-न; शृणु, तत्र हि नभसो मनोगोचरत्वेन व्यवहारविषयत्वाद्भ्रमोद्भूतिः सम्पद्यते। ब्रह्मणि तु निर्विशेषे भ्रमो नाऽस्त्येव। "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा

ऽपि अन्ततो गत्वा असत्वमेवाऽपद्यते। किंच सर्वकोशेष्वपि असत्-असत्य-मिथ्या-मृषा-अनृत-वितथादिशब्दानां पर्यायरूपतैव दृश्यते इति सदसद्विलक्षणेति कथनं व्याहतमेव। अपरं च माध्यमिकोक्तं चतुष्कोटिविनिर्मुक्तं निरुपाख्यं तत्त्वमेव सदसद्रूपकोटिद्वयविनिर्मुक्त्याऽनिर्वचनीयमित्येवमुच्यतेऽद्वैतिभिः। एवं बौद्धोच्छिष्टभक्षणेऽपि न व्याध्युपशमोऽत्र भवतीत्यन्ततो गत्वाऽसत्त्वमेवात्र पर्यवसितं भवति, तस्मादनिर्वचनीयपदार्थस्वीकारेण धर्मिकल्पनायां गौरवदोषापत्तिरित्यसत एव प्रकारद्वयाभ्युपगमे-न धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायानुसारेणाऽत्र धर्मकल्पनैव लाघवयुक्तेत्यसत एव प्रकारद्वयाभ्युपगमो निरवद्यतयात्र सिद्ध्यति। अतः सदसद्विलक्षणेति कथनस्य श्रद्धाजडशिष्यमात्रपरितोषकारणतया न वादिहृदयसन्तोषाधायकत्वं, तेन साध्वाक्षिप्तं कथमसत् प्रतीयत इति। आक्षेपविवरणं क्रियते-**चक्षुषेति**।

यदिन्द्रियग्राह्यमधिष्ठानं तदिन्द्रियग्राह्य एव भ्रमस्तत्र भवतीति सामान्यनियमस्तु सर्वजनविदित एव। 'पराञ्चि खानि' इति श्रुत्या ब्रह्मणस्तु सर्वथेन्द्रियाग्राह्यतया तदधिष्ठानकभ्रमस्य कथंचिदपि इन्द्रियग्राह्यत्वं नैवोपपद्यत इति भ्रमस्य इन्द्रियग्राह्यत्वान्यथानुपपत्तिरेव प्रपंचस्य ब्रह्माधिष्ठानकभ्रमरूपत्वनिरसने पर्याप्ता। एवमत्र ज्ञानविषय एवाऽधिष्ठाने भ्रमसम्भव इति साधितम्। 'तमःप्रकाशवद्विरुद्धस्वभावयो'रिति भाष्योक्तिमनुसंधाय द्वितीयं दूषणं वदन्ति-**भ्रमोत्पत्तेः सादृश्यसापेक्षत्वेनेत्यारभ्य सादृश्याभावादित्यन्तम्**। 'अप्रत्यक्षेऽप्याकाशे बालास्तलमलिनतामध्यस्यन्ति' इति शांकरभाष्योक्तं समाधिमत्र पूर्वपक्षमुखेनाहुः-**ननु नीरूपत्वेनेति**॥ चक्षुरगोचरतासाधने हेतूपन्यासः-**नीरूपत्वेनेति**। एवमत्र प्रथमं दूषणं निरस्य द्वितीयं दूषयन्ति-**सादृश्यानपेक्ष इति**। मानसग्राह्याधिष्ठाने चाक्षुषादिभ्रमो भवतीति यदिन्द्रियग्राह्येति नियमस्यासङ्गतत्वमेवेति चेत् मनसः सर्वेन्द्रियनियामकतया मनोग्राह्याधिष्ठाने इन्द्रियग्राह्यभ्रमानुभूतिर्भवत्येव, अत एव मानसज्ञानविषयेऽधिष्ठाने 'सा सा सा सा जगति सकले कोऽयमद्वैतवादः'-इति अमरुशतकपद्ये चाक्षुषो भ्रमो निरूप्यते। किंच निबिडान्धकारे कान्दिशीकस्य पिशाचादिभ्रमो भवतीति मानसज्ञानविषयेऽधिष्ठाने चाक्षुषभ्रमानुभूतिः नयदिन्द्रियेति नियमप्रतिक्षेपिका भवतीत्याहुः-**तत्र हि नभस इति**। निर्विशेषब्रह्मात्मकाऽधिष्ठानस्य मानसज्ञानाविषयतां श्रुत्या साधयन्ति-**यतो वाच इति**।

सहे" ति श्रुतेर्मनोवागगोचरत्वेन सर्वथा ज्ञानाविषये भ्रमस्योपपादयितुमशक्यत्वात् । भवन्मते निरुपाधिके ब्रह्मणि सर्वथा ज्ञानाविषयत्वमभिमतम् । विषयत्वेन जडत्वेन व्याप्तेः स्वीकारात् । नन्वारोपे ह्यधिष्ठानसामान्यज्ञानं कारणं न तु विशेषतो ज्ञानम् । अहंवित्तौ भासमानस्याऽऽत्मनो भवत्येव सामान्यज्ञानमिति चेत्—न; उपाध्यवच्छिन्नस्यैवाऽहम्प्रत्यये भासमानत्वात् । एवं सत्यात्मनो निरुपाधिकस्य ज्ञानाभावान्न तत्र जगदारोपः सम्भवतीति विद्वद्भिर्ज्ञेयम् । केचित्तु निषेधमुखेन ज्ञानं *सामान्यज्ञानमित्याहुः,—

आग्रहिलतया कथंचित् मानसज्ञानविषयत्वोपपादनेऽपि सर्वथाऽनिष्टप्रसक्तिर्भवतीत्याहुः—**विषयत्वेन जडत्वेनेति** । यो यो विषयः स स जड इति व्याप्त्यङ्गीकारेण ज्ञानविषयत्वे तु ब्रह्मणोऽपि जडत्वमापद्येतेति सर्वथा हेयत्वमस्य पक्षस्य । ज्ञानविषय एवाधिष्ठान इति नियमे या ज्ञानविषयतोक्ता सा सामान्याकारेणैव ग्राह्या, नतु विशेषाकारेण, विशेषज्ञाने तु भ्रमोत्पत्तेरेव असम्भवदुक्तिकत्वात् इत्याहुः—**नन्वारोपे ह्यधिष्ठानसामान्यज्ञानमिति** । उच्यते—नायमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् इत्यध्यासभाष्यनिरूपितमेव समाधानमत्राभिधीयते—**अहंवित्तौ भासमानस्येति** । नायमेकान्तेन अविषय इति समाधानमसमाधानमेवेत्याहुः—**उपाध्यवच्छिन्नस्यैवेति** । अत्रेदमाकूतम्—अहंप्रत्ययस्य शुद्धविषयत्वं, शबलविषयत्वमन्तःकरणाध्यासतादात्म्यापन्नचैतन्यविषयत्वं वा (जीवविषयत्वं वा), अहंप्रत्ययस्य शुद्धविषयत्वे तु 'भवेदेतदेवं यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत' इत्याद्यध्यासभाष्यीयसिद्धान्तपक्षप्रतिपादकभामतीसन्दर्भविरोध एवोपस्थापितो भवेत् । शबलविषयत्वे तु शबलस्य सामान्यज्ञानं भवितुमर्हति, नतु शुद्धस्य । ईश्वरादिसकलविवर्ताधिष्ठानं तु शुद्धमेव वाच्यम्; तस्यैव पारमार्थिकत्वेन सकलाधिष्ठानत्वात् । अतो द्वितीयपक्षाभ्युपगमे तु 'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायेन सकलविवर्ताधिष्ठानभूतशुद्धब्रह्मणोऽधिष्ठानतोक्तिरनुपपत्तिपराहतेत्याहुः—**उपाध्यवच्छिन्नेति** ।

द्वितीयविकल्पनिरासप्रकार एव तृतीयविकल्पनिरासेऽपि संयोज्यः । एतेन जडजीवादिभ्रमस्येश्वराधिष्ठानत्वकथनेऽपि ईश्वरभ्रमस्य तु शुद्धाधिष्ठानकतयैवोपपत्तौ शुद्धस्य सामान्यज्ञानाविषयत्वे तु ईश्वरादिभ्रमो निरूपयितुमशक्य इति नायमेकान्तेनेति समाधानं 'कर्णे स्पृष्टः कटिं चालयति', 'आम्रान् पृष्टः कोविदारान् व्याचष्टे' इति न्यायानुसरणमेव इत्येतत् सर्वं मनसिकृत्याहुः—**उपाध्यवच्छिन्नेति** । निर्दिष्टनियमं निगमयितुमुक्तिरियं—

---

*इदं किंचिदिति ज्ञानं सामान्यज्ञानं, इदमित्थमिति ज्ञानं विशेषज्ञानं, इदं विधिमुखं ज्ञानं, इदं न इदं न इत्याकारकं ज्ञानं निषेधमुखं ज्ञानं । पूर्णतया विशेषज्ञानं इदमित्थतया विधिमुखेन ज्ञानेनैव भवति इति निषेधमुखज्ञानस्य सामान्यज्ञानकोटावेवान्तर्भावः, पूर्णतया विशेषानिश्चायकत्वात् इत्यत्र वादिहृदयम् । यद्यपि निषेधमुखज्ञानस्य साक्षात्विशेषानिश्चायकत्वेऽपि परिशेषानुमानविधया परम्परया विशेषनिश्चायकत्वमेव निषेधमुखज्ञानस्य सिद्ध्यतीति विशेषज्ञानकोटावेवान्तर्भावः कार्यः, नतु सामान्यज्ञानकोटौ इति प्रतिवादिहार्दमेतत् ।

तन्न; शास्त्रोत्पाद्यस्य तस्याऽसर्वजनीनत्वे मूर्खाणां जगत्प्रत्ययाभावप्रसङ्गात्[1]। सर्वव्यावृत्तताज्ञानस्य त्वधिष्ठानविशेषज्ञानत्वेन प्रत्युत भ्रमनिवर्त्तकत्वाच्च। न च कस्यचिद्गगनज्ञानाभाववतोऽपि बालादेर्गगने नीलिमभानान्नाऽधिष्ठानसामान्यज्ञानस्य भ्रमकारणत्वम्, तथा सति निर्विशेषस्याऽधिष्ठानस्य सामान्यज्ञानाभावेऽपि तदधिष्ठानको जगद्भ्रमः स्यादेवेति वाच्यम्; इदं किञ्चिन्नीलमित्याकारकस्य किञ्चित्त्वेन रूपेणाऽधिष्ठानज्ञानस्य तत्रापि सत्त्वात्। अन्यच्च, यद्यधिष्ठानज्ञानरहितस्याऽपि नीलिमप्रतीतिरङ्गीक्रियेत तदा

एवं सत्यात्मनो निरुपाधिकस्येति।

विधिमुखेन ज्ञानं विशेषज्ञानं निषेधमुखेन ज्ञानं सामान्यज्ञानं इति केषांचिन्मतं प्रतिक्षिपन्ति—**केचित्त्विति**। निषेधमुखेन ज्ञानस्य शास्त्रप्रतिपाद्यतया सार्वजनिकत्वं वक्तुमशक्यं, असार्वजनिकेन तेनाधिष्ठानसामान्यज्ञानं सार्वजनीनं भवितुमनर्हमतो मूर्खास्त्वधिष्ठानस्य सामान्यज्ञानविषयतां नैवाऽनुभवेयुरिति मूर्खाणां जगत्प्रत्ययस्यैवासम्भवदुक्तिकत्वं भवेदित्याहुः—**शास्त्रोत्पाद्यस्य तस्येति**। किंच निषेधमुखेन ज्ञानं सर्वव्यावृत्तताज्ञानरूपं, अन्यापोहस्तु वैशेष्य एव पर्यवस्यतीति विशेषसंविद्रूपतैव तस्यातः सर्वव्यावृत्तताज्ञानं विशेषज्ञानमेवाभ्युपेयम्। एवं च विशेषज्ञानस्य भ्रमनिवर्तकत्वमेवानुभूयते इति भ्रमानुभूतिरपि अशक्येत्याहुः— **सर्वव्यावृत्तताज्ञानस्येति**॥

कस्यचन मुग्धशिशोः सर्वथा गगनज्ञानाभाववतोऽपि इदं नीलमिति प्रत्ययानुभवात् अधिष्ठानस्य ज्ञानविषयत्वे भ्रमोद्भूतिः, अन्यथा नेति नियमस्य भग्नतया अप्रयोजकतैव सिद्ध्यति इति प्रपंचभ्रमाधिष्ठानत्वं सामान्यज्ञानाऽविषयत्वेऽपि निरुपाधिकस्य ब्रह्मणः सुखेनोपपद्यते इत्याहुः—**नच कस्यचित् गगनज्ञानाऽभाववतोऽपि बालादेरिति**। इदं किंचिन्नीलम् इत्याकारकज्ञानस्यैव सामान्यज्ञानतया किंचित्त्वेन रूपेणाधिष्ठानसामान्यज्ञानस्य तत्राप्यस्तित्वं, अतः अधिष्ठानस्य सामान्यज्ञानविषयत्व एव भ्रमसम्भवः, नान्यथेति सुदूरमुत्सन्नानियमभङ्गकथेत्याहुः—**इदं किञ्चिन्नीलम् इत्याकारकस्येति**। अन्यच्चास्याः विपर्यासप्रतीतेः यद्यधिष्ठानसामान्यज्ञानाभावेऽपि सम्भव उपपाद्येत तर्हि इदमादिसर्वनाम्नामधिष्ठानपरामर्शित्वमनुपपत्तिपराहतमेव भवेत्॥

इदमादिसर्वनाम्नामधिष्ठानपरामर्शित्वाभावे तु कथं तस्याः संविदः विपर्यस्तत्वम्?। यदीदमित्यनेन इन्द्रियसन्निकृष्टं नीलमेव गृह्यते तर्हि तस्याप्रतीतेः प्रमारूपतैव, अतस्मिन् तद्बुद्धित्वाभावात्। अध्यासो नाम 'अतस्मिन् तद्बुद्धि'रित्यवोचाम इत्यध्यासभाष्योक्ताध्यासलक्षणानुसारेण इदमादिसर्वनाम्नामधिष्ठानपरामर्शित्वानभ्युपगमे इदं नीलमित्याकारकप्रतीतेः प्रमात्वमेवोपपद्यते इत्याहुः—**यद्यधिष्ठानज्ञानरहितस्यापीति**। किंच पूर्वपक्षिसमये इयं प्रतीतिः सोपाधिकभ्रमरूपा निरुपाधिकभ्रमरूपा वा? नात्र प्रथमपक्षस्य

---

१ जगत्प्रतीत्यभावेति ख.

तत्प्रतीतेर्भ्रमत्वमेव न स्यात्। नीलिमज्ञानस्य सर्वदा सर्वेषां जायमानत्वादुपाधिजन्यत्वाभावेनोपाधिनाशनाश्यत्वाभावाच्च । मायिकस्य नीलरूपस्य विद्यमानस्यैव विषयत्वेन तदवगाहि[1]ज्ञानस्य भ्रमत्वायोगात् । न च तस्याऽनिर्वचनीयत्वं सदसद्भिन्नतयेति[2] वाच्यम्, नीलिम्नः सर्वदैव विद्यमानत्वेन प्रतीतिविषयतया ज्ञानबाध्यत्वाभावेन गगनवत्स्थिरतयाऽनिर्वचनीयकल्पनायाः प्रवेशानवसरात्, अधिष्ठानभूतं गगनमनवगा-

---

साधुता; निरुपाधिकभ्रमरूपायाः प्रतीतेः अचिरस्थायिताया इदं नीलमिति प्रतीतेः सर्वदा जायमानत्वेन चिरस्थायिताया अनुभवात् चिरस्थायिप्रतीतेः सार्वदिकतया निरुपाधिकभ्रमात्मकताया अनुपपद्यमानत्वात् इत्याहुः–**नीलिमज्ञानस्येति**। एवं प्रथमविकल्पं निरस्य द्वितीयं निरस्यन्ति–**उपाधिजन्यत्वाभावेनेति**। यदीयं प्रतीतिः सोपाधिकविपर्यासरूपा स्यात् उपाधिजन्यतोपाधिनाशनाश्यता चास्यानुभूयेत, नैतदनुभूयते इति द्वितीयविकल्पोऽप्यसाधुः। यदि इदमित्यनेन गगनमपरामृष्य नीलमित्युच्यते, तर्हि अस्यां प्रतीतौ विद्यमानमायिकनीलरूपावगाहनं भवतीति तदभाववति तदारोपाभावात् इदं नीलमिति नीलरूपावगाहिज्ञानस्याऽविपर्यस्तत्वं स्यात् इति वदन्ति–**मायिकस्य नीलरूपस्येति**॥

ननु असच्चेन्न प्रतीयेतेति नियमानुसारेण इदं नीलमिति प्रतीतिविषयस्य नीलस्य असद्भिन्नतया, मायिकस्येत्युक्त्या सद्भिन्नत्वस्यापि सिद्ध्या परिशेषादनिर्वचनीयत्वमेव वाच्यमित्याहुः–**न च तस्यानिर्वचनीयत्वमिति** । अविद्यमानावगाहित्व एव ज्ञानबाध्यत्वसिद्ध्या इदं नीलमिति प्रतीतिविषयस्य अनिर्वचनीयत्वसिद्धेरुपपन्नता, सर्वदैव विद्यमानावगाहित्वे तु–ज्ञानबाध्यत्वासिद्ध्या गगनवत् स्थिररूपायाः नीलिम्नः अनिर्वचनीयत्वकल्पनाया अपि प्रवेशानवसरात् इत्याहुः—**नीलिम्नः सर्वदैवेति**। एतत्तु इदं नीलमिति प्रतीतेः सदसद्भिन्नत्वपक्षमभ्युपगम्य कृत्वाचिन्तयोक्तम् । वस्तुतस्तु इदं नीलमित्यस्याः प्रतीतेः भ्रान्तित्वसाधनमेवाशक्यं, किंच–अस्याः प्रतीतेः आरोपलक्षणानाक्रान्ततया आरोपरूपताया उपपत्तिरसम्भवग्रस्तैव। इदमादिसर्वनाम्नामधिष्ठानानवगाहित्वे तदभाववति तदारोपाभावात् कथं विपर्यस्तरूपताप्रतीतिविषयतया कथं वा असत्ता ? अतः अन्ततोगत्वा सत्तैवाभ्युपेयेति अस्याः प्रतीतेः प्रमात्वमेवापद्यते इत्याहुः—**अधिष्ठानभूतं गगनमनवगाह्येत्यारभ्य प्रमात्वमेवापद्येतेत्यन्तम्**।

अत्रायमभिसन्धिः–इदं नीलमित्यस्याः प्रतीतेः भ्रान्तित्वाभ्युपगमः बाध्यत्वाभ्युपगममन्तरेण वक्तुमशक्यः। बाध्यत्वं तु इदमादिसर्वनाम्नामधिष्ठानपरामर्श एवोपपन्नं; इदमादीनां अधिष्ठानपरामर्शित्वस्य बाध्यत्वनान्तरीयकत्वात्। किंच बाध्यत्वव्याप्यमिथ्यात्वोपपत्तिरपि प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपलक्षणलक्षितेति अधिष्ठानरूपोपाधिप्रतिपत्तावेव निरूपयितुं शक्या। उपाध्यप्रतिपत्तावपि प्रतियोगिनिषेधे निरधिष्ठानकविपर्यासाङ्गी-

---

१ तदवगाहीत्यादिः सर्वदैव विद्यमानत्वेनेत्यन्तो ग्रन्थो नास्ति **क.** २ सदसदः क्षरादित्येवं पाठः **ख.** सदसत इति तु क्षरविशेषणत्वे स्यात्।

ह्यैव इदं नीलमिति प्रत्ययात् । गगनस्य नीरूपत्वान्नीलरूपारोपे भ्रमत्वस्य सुवचत्वात्[1] । तथा गगनं नीलमिति प्रतीतावेव भ्रमत्वं, न तु केवलं नीलमिदमिति प्रतीतौ । तत्र गगनावगाहाभावात्, तदभाववति तदारोपाभावात्प्रतीतिविषयतया ह्यसत्त्वस्याऽपि भवन्मतेऽनङ्गीकारात् । अतः सत्त्वमेवोररीकार्यं स्यात् । तथा सति तदवगाहिज्ञानस्य प्रमात्वमेवाऽऽपद्येत । अत एतद्दूषणपरिहृतयेऽधिष्ठानस्य वियतः केनचिद्रूपेण ज्ञानं बालादीनामप्यस्तीति मन्तव्यम् । तथा च यदा शास्त्रसमुत्पन्नबुद्ध्या नीरूपत्वेन वियतो ज्ञानं समभूत्तदा रूपरहिते वियति नीलरूपस्याऽसम्भवं जानन् नीलिमानमसन्तमेव निश्चिनोति । एवं बाधविषयत्वेन सत्त्वाभावादविद्यमाननीलरूपावगाहिज्ञानस्य भ्रमत्वं सुवचमिति सन् पन्थाः । एतावता सिद्धमेतत्[2] । अधिष्ठानसामान्यज्ञानं भ्रममात्रे

कृतिरेव प्रणालीभेदेन सिद्ध्यतीति तथागतसमयस्यैव जयश्रीलाभः । अतः पूर्वनिर्दिष्टमिथ्यात्वलक्षणोपपत्त्यर्थं अध्यासभाष्योक्ताध्यासलक्षणोपपत्त्यर्थं च इदमादीनां अधिष्ठानावगाहिता अभ्युपेयैव । एतावता सिद्धमेतत् गगनं नीलमिति प्रतीतिरेव विपर्यस्ता गगनानवगाहिनी इदं नीलमिति प्रतीतिरविपर्यस्तैव । उपसंहरन्तः फलितमाहुः—**अत एतद्दूषणपरिहृतयेऽधिष्ठानस्येति** । एवमधिष्ठानपरामर्शे रूपरहिते वियति नीलरूपप्रत्ययस्य तदभाववति तदारोपात्मकत्वात् रूपराहित्यसाधिकायाः शास्त्रसमुत्पन्नबुद्धेरुदये बाध्यत्वसिद्धौ मिथ्यात्वसिद्धिः अविद्यमानरूपावगाहितया सौकर्येण सिद्ध्यतीति सरलः पन्थेत्येतदुपपादयन्ति—**तथा च यदा शास्त्रसमुत्पन्नबुद्ध्येत्यारभ्य—सन् पन्था इत्यन्तम्** । फलितपुनरुक्तिरियं—**एतावता सिद्धमित्यारभ्य सम्भवतीति दिगित्यन्तम्** । यदि तत्त्वशुद्धिकारमतेन सन्मात्रग्राहिप्रत्यक्षवादमवलम्ब्य अधिष्ठानज्ञानाविषयत्ववादे विरोधः समुद्भाव्यते तस्याप्यनवसरपराहतिं प्रदर्शयन्त उत्तरं वदन्ति—**यद्यपि सत्तारूपेणेत्यारभ्य विद्वद्भिः नादर्तव्यमित्यन्तम्** ।

एतदुक्तं भवति—यद्यपि घटः सन् पटः सन्नित्यादौ सत्ता प्रतीयते, किन्तु न सा अधिष्ठानरूपशुद्धब्रह्मसत्ता, अपि तु अधिष्ठेयनिष्ठा व्यावहारिकी सत्ता, घटः सन्निति प्रत्यये यदि ब्रह्मसत्तानुभवो भवेत् भवेत्तर्हि अवेद्यत्ववादस्य महती क्षतिः । अतः ब्रह्मावेद्यत्ववादान्यथानुपपत्त्या घटः सन्नित्यादिप्रत्यक्षे ब्रह्मसत्तानुभवं विहाय अधिष्ठेयनिष्ठा व्यावहारिकी सत्तैव प्रतीयतेत्यभ्युपेयं प्रमाणशरणैः । एवमनङ्गीकारे तु घटः सन्निति ज्ञानमेव ब्रह्मज्ञानं भवेत् इति बृहदायाससाध्ये ब्रह्मज्ञाने न कोऽपि यतेत । सर्वेषां ज्ञानित्वप्रसक्त्या विद्वदविद्वद्भेद एव विलुप्येत । अस्तु विलोप इति चेत्—न; भेदविलोपे तु अनेकश्रुतिस्मृतिवचनव्याकोपप्रसङ्गः । अनुभवव्यवहाराद्यानुकूल्यं अप्येवमेव भवति, अन्यथा अनुभवविरोधादयोऽनेकदोषाः समुपतिष्ठेयुः । घटः सन्नित्यत्र ब्रह्माभिन्नब्रह्मसत्तानुभवे ब्रह्मानुभवप्रसङ्गोपस्थितिरिति सर्वेऽपि मुक्ता भवेयुः, किंच महती दोषपरम्परा प्रसज्येत । तस्मात

---

१ सुवचनत्वादिति लब्धम् । स्यात्पुनरित्थम् । २ सिद्धमेव तदित्युपलब्धम् । स्यात्पुनर्यथानिवेशम् । सिद्धमेवैतदित्येव वा ।

कारणम् । तथा सति परमतेऽधिष्ठानत्वेनाऽभिमतस्य निर्विशेषब्रह्मणः केनाऽपि प्रकारेण ज्ञानविषयत्वाभावान्न तस्मिन्नधिष्ठाने भ्रमः सम्भवतीति दिक् । यद्यपि सत्तारूपेण सर्वत्र तदस्ति तथापि न ज्ञातुं शक्यम् । घटः सन् पटः सन्नित्यादौ तु न निर्विशेषरूपा सत्ता प्रतीयते अपि त्वधिष्ठेयनिष्ठसत्ताया एव प्रतीतिरिति भ्रमोऽधिष्ठानरूपब्रह्मणि निरूपयितुमशक्य एवेति प्रपञ्चमिथ्यात्वं विद्वद्भिर्नाऽऽदर्त्तव्यम् । किञ्च जगदभिपश्यतः परमेश्वरस्याऽपि भवन्मते भ्रान्तत्वापातः । भ्रमप्रतिपन्नस्य रजतादेर्भ्रान्तेनैवाऽध्यक्षीकरणात् । "वैधर्म्याच्च न स्वप्नादिवदि"ति तत्त्वसूत्रे आदिशब्देनाऽसत्त्वप्रतिपादकानां सर्वेषामेव निषेधात्प्रपञ्चसत्यत्वमेवाऽभिप्रेतं व्यासचरणानाम् । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमि"ति जगदसत्यत्ववादिनां भगवता निन्दितत्वाच्च । अन्यच्च, ब्रह्मणो यथार्थज्ञानं हि जगद्भ्रमं निवर्त्तयति । शुक्तिबोधो रजतभ्रममिव । तच्च मननादिजन्यत्वेन प्रपञ्चमध्यपातितया नाऽज्ञानरूपं प्रपञ्चं दूरीकर्त्तुमीष्टे । यावज्ज्ञानानां जगदन्तःपातित्वेनाऽज्ञानरूपत्वात् । प्रपञ्चोपशामकज्ञानस्योपशान्त्यै

सन्मात्रग्राहिप्रत्यक्षमवलम्ब्य अधिष्ठानस्य सामान्यज्ञानविषयत्वोपपादनम् अनुपपादमेवेत्यलं पल्लवितेन ॥

मिथ्याज्ञानप्रसंजितं रूपं तत्त्वप्रत्ययेनैवाऽपोद्यम् । तत्त्वप्रत्ययस्तु चरमवृत्तेः शुद्धविषयताभ्युपगम एव सम्भाव्यते । किन्तु देहसाहित्ये वृत्त्यतिरिक्तप्रकारेण ज्ञानाऽसम्भवेन वृत्तिस्वीकारे वृत्तेरज्ञानकार्यान्तःकरणकार्यतया उपाधित्वात् अन्योपाधिराहित्येन शुद्धविषयकत्वभानेऽपि वृत्तेरेवोपाधित्वं इति वृत्तिसम्बन्ध एव औपाधिकत्वसिद्ध्या वृत्तेरुपहितविषयकतैव सिद्ध्यति न शुद्धविषयकता ॥ 'नचान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, तस्यैव तदुपाधेर्विनश्यदवस्थस्य विद्यमानत्वात्,' इति भामतीपंक्त्यनुसारेण वृत्तिसम्बन्ध एव उपहितत्वसिद्धिरतोवृत्तिसत्त्वे शुद्धत्वस्यासिद्ध्या तत्त्वप्रत्ययालाभेन मिथ्याज्ञानप्रसंजितरूपाऽनपायितैव स्थेमानमनुभवति । यद्युपहितब्रह्मविषयकज्ञानस्यापि अतात्त्विकत्वम् तर्हि अन्यविषयकज्ञानस्य कैमुतिकन्यायेनैव अतात्त्विकतासिद्धेरित्यतो नह्यतात्त्विकज्ञानस्य भ्रमनिवर्तकतोपपत्तिः । ननु विवरणकारैः वृत्तिसम्बन्धेऽपि शुद्धत्वमभ्युपेतम्-अभ्युपगच्छन्तु नाम नोपपत्त्युपेतमभ्युपगम्यते । अज्ञानकार्यतया वृत्तेरुपाधित्वम् प्रमाणसिद्धम्, अतः वृत्तिसम्बन्धे अनभिलषितमपि उपहितत्वमशुद्धत्वं दुर्वारमायात्येव । एवं च तत्त्वप्रत्ययापह्नुतिः । प्रत्ययतात्त्विकतापगमे मिथ्याज्ञानप्रसक्तरूपस्थैर्यम् अबाध्यतया । उपाधिसम्बन्धेऽपि अनुपहितत्वशुद्धत्वस्थितिः कथमुपपद्यते इति विवरणकारैरेव निरूपणीयं । नच शब्दजन्यता अनुपाधित्वसाधिका, न हिरण्यजन्येति अशृंखला न वा तद्बद्धोऽबद्ध इति । एतन्निखिलं सूत्रीकृत्य निरूप्यते-अन्यच्च ब्रह्मणो यथार्थज्ञानं हीत्यारभ्य अज्ञानरूपत्वादित्यन्तम् ॥

एवं भ्रमोत्पादकप्रधानकारणद्वयानुपपत्त्या निवर्तकानुपपत्त्या च मायावादं निरस्य, निवर्तकनिवर्तकानुपलब्ध्या, अज्ञानध्वंसोपलब्ध्या, चरमवृत्तिनाशक्षणोपलब्ध्या च,

साधनान्तरस्य मृग्यत्वाच्च । न च चरमवृत्तिरज्ञानकार्यमखिलं नाशयित्वा स्वयं नश्यति कतकरेणुवदिति वाच्यम् ; चरमवृत्तिजन्यस्याऽज्ञानध्वंसस्य नाशकान्तराभावेनाऽवशिष्टस्य सत्तयाऽद्वैतसिद्धिव्याघातात् । चरमवृत्तिनाशक्षणस्य विद्यमानतया द्वैतापत्तेश्च । अपि च, चरमवृत्तेर्जगन्नाशं प्रति कारणत्वम् । तच्च कार्यनियतपूर्ववृत्तित्वम् । पूर्वत्वं तु कालकृतमिति कारणतानिर्वाहकः कालोऽवशिष्यत एव । तथा च चरमवृत्तिः स्वयं नश्यतीत्युक्तावपि कालस्य कारणतानिर्वाहकस्योर्वरितत्वान्नाऽद्वैतसिद्धिरिति ज्ञेयम् । न च ब्रह्मानतिरिक्तः कालः सुखेनाऽवशिष्यतामद्वैताबाधकत्वादिति वाच्यम् । चरमवृत्तिनाशरूपकार्यपरिच्छेद्यकालस्य सर्वापरिच्छेद्येन ब्रह्मणा सहाऽभेदस्य वक्तुमशक्यत्वादिति दिक् । न च वृत्तिरूपाणां तथात्वेऽपि "सत्यं ज्ञानमनन्तं ब्रह्मे"ति श्रुतेः स्वरूपभूतं ज्ञानं प्रपञ्चभ्रमापहारीति वाच्यम् ; स्वरूपभूते ज्ञाने प्रपञ्चनाशकत्वाङ्गीकारे निर्विशेषवादबाधापत्तेः । ब्रह्मण्येव प्रपञ्चनाशकत्वपर्यवसानात् । तस्य सर्वदैव विद्यमानत्वेन सदा सर्वेषां बन्धाभावप्रसङ्गाच्च । मननादिविधीनामानर्थक्यापत्तेश्च । मननादिविधीनां तदभिव्यक्तौ साफल्यमिति चेत्-न; तस्मिन्स्वरूपभूते ज्ञानेऽभिव्यक्तयात्मकधर्माङ्गीकारे धर्मत्वावच्छेदकावच्छिन्नाभाववादहानिप्रसङ्गात् । असत्त्ववादे ब्रह्मणि व्यापकत्वमपि दुरुपपादम् । व्याप्यानामज्ञानकल्पितत्वेनाऽपार्थकतया तत्सापेक्षस्य व्यापकत्वस्याऽपि सुतरामवास्तवत्वात् । अस्तु तथात्वमिति

द्वैतापत्त्या दूषितोऽयं मायावाद इति वदन्ति-प्रपंचोपशामकज्ञानस्येत्यारभ्य द्वैतापत्तेश्चेत्यन्तम् । अत्रायं भावः-कतकरेणुवत् स्वपरविरोधितास्वीकृतौ, -'अभावरूपा धर्मा नाद्वैतं घ्नन्ति', इति मण्डनोक्त्यनुसरणे च उपप्लवद्वयप्रशान्तिः जायते, किन्तु तृतीयदोषस्थैर्यं अद्वैतं विनाशयति तस्मान्मायावादस्य दौष्ट्यं व्यक्तमेव । एवमेकप्रकारेण मायावादं निरस्य अपरप्रकारेण निरसनीयतां साधयन्तः भिन्नप्रणाल्या कालसत्तया अद्वैतविघातमाहुः—अपि च चरमवृत्तेरित्यारभ्य नाद्वैतसिद्धिरिति ज्ञेयमित्यन्तम् । कालस्य ब्रह्माभेदपक्षमभ्युपेत्य पूर्वपक्षमुपस्थाप्य खण्डनमिदं—नच ब्रह्मानतिरिक्तः कालेत्यारभ्य वक्तुमशक्यत्वादित्यन्तम् । वृत्तिनाशरूपकार्यपरिच्छेद्यकालस्य सर्वापरिच्छेद्यब्रह्माभेदाऽयोगः परिच्छिन्नापरिच्छिन्नयोः सर्वथा भेदस्यैवाऽनुभवात् इति भावः । एवं वृत्तिरूपज्ञानस्याऽनिवर्तकतामुपपाद्य स्वरूपभूतज्ञाननिवर्तकपक्षं उन्मूलयितुमग्रिमग्रन्थारम्भः-नच वृत्तिरूपाणां तथात्वेऽपीत्यारभ्य मननादिविधीनामानर्थक्यापत्तेश्चेत्यन्तम् । स्वरूपभूते ज्ञाने निवर्तकत्वधर्माङ्गीकारे निर्धर्मकवादः कं शरणं व्रजेत् । किं च तस्य निवर्तकताङ्गीकारे कदाचिदपि बन्धो नानुभूयेत, ब्रह्मणः सार्वदिकतया बन्धविलयस्यापि सार्वदिकत्वात् । एवं च बन्धविलयोपयोगिन्यः मननादिविधयोऽपि स्वानुपयोगितामेव अनुभवेयुरित्येतदुक्तम्-स्वरूपभूते ज्ञाने इत्यारभ्य आनर्थक्यापत्तेश्चेत्यन्तम् । ननु अभिव्यञ्जकतया मननादिविधयः सफलाः स्युरित्यत आहुः तस्मिन् स्वरूपज्ञाने अभिव्यक्तयात्मकेति ॥ एवमपि सकलधर्मवैधुर्यमपसरतीति प्रतिपादयन्ति-धर्मत्वावच्छेदकावच्छिन्नेति ।

चेत्—न; "बृहत्त्वाद्बृंहणत्वाच्च ब्रह्मे"ति श्रुतिव्याकोपात्। जगदसत्यत्वे तदन्तःपातिनीनां श्रुतीनामपि तथात्वेन व्यवहारमात्रे प्रामाण्याङ्गीकारात्तदुक्तानां निर्विशेषत्वाज्ञेयत्वनिराकारत्वादीनां पारमार्थिकत्वेन त्वन्मतेऽभिमतानामपि व्यवहृतिमात्रैकसत्यत्वापातात्[1]। मनोव्यापारविजृम्भितत्वाच्च। त्वन्मते शुद्धब्रह्मणो मनोऽप्राप्यत्वेन मनोगम्यस्य ब्रह्मातिरेकादित्यलमुक्तिभिः। यदप्याहुः—सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत। अतः सदसद्विलक्षणमनिर्वचनीयं जगदिति। तत्र 'असच्चेन्न प्रतीयेते'ति यदुक्तम्,—तन्न; "अर्थाभावं विनिश्चित्य प्रतीतस्याऽपि नाऽऽत्मनः। तां चाऽपि युष्मच्चरणसेवयाऽहं पराणुदे" इति मैत्रेयवाक्यात्, "छायाप्रत्याह्वयाभासा असन्तोऽप्यर्थकारिण" इति वाक्यान्तराच्च असतोऽपि प्रतीतिस्वीकारात्। अतोऽसत्पदार्थ एव भेदद्वयमस्ति। एकमसन्न प्रतीयते शशशृङ्गादिवत्। एकमसत्प्रतीयते शुक्तिरजतादिवदिति व्यवस्था। न त्वनिर्वचनीयं कल्पनीयम्, मानाभावात्। ननु "त्वय्यद्वितीये भगवन्नयं भ्रम" इत्यादिवाक्येष्वसत्यता दृश्यत इति चेत् न; भ्रमः अज्ञानमसदित्यादिशब्दानामहन्ताममतात्मकसंसारविषयत्वात्। एतच्चाऽऽकरे स्पष्टम्। किञ्च, अनादिरयं भ्रम इति प्रवादोऽपि चिन्त्यः। भ्रमत्वस्य ज्ञानत्वव्याप्यत्वाद्यावज्ज्ञानानां जन्यत्वनियमात्। न च "बन्धोऽस्याऽविद्ययाऽनादिरि"ति वाक्यादनादित्वम्; अविद्यायाः करणत्वव्याघातापत्तेः[2]। तथा चेह सादित्वनिषेधो घटपटादिसाधारणापेक्षकः। देवेष्वमरपदेन मरणनिषेधवत्। अतः सर्वथा प्रपञ्च-

---

असत्त्ववादे व्याप्यानामज्ञानकल्पिततया मिथ्यात्वेन व्याप्यसापेक्षतया सुतरां व्यापकस्य मिथ्यात्वम्, अतः ब्रह्मणि व्यापकत्वमपि दुरुपपादमित्युक्तम्-**असत्त्ववादे ब्रह्मणी**त्यारभ्य **अवास्तवत्वादि**त्यन्तपंक्तिद्वयेन अस्तित्वत्यङ्गीकारे बृहत्वादिति श्रुतिर्विरुध्यते इत्युच्यते-**बृहत्त्वादिति**। अन्यच्च यदि जगन्मृषा तर्हि श्रुतिवचनानां व्यावहारिकप्रामाण्यसिद्धिः तदन्तःपातेन सिध्येदिति त्वन्मते पारमार्थिकत्वेनाभ्युपेतानाम् निर्विशेषत्वनिराकारत्वाऽज्ञेयत्वादीनामपि व्यवहृतिमात्रैकसत्यत्वोपपत्तिः। निर्विशेषत्वादिज्ञानमपि श्रुत्या मानसमेवोपपद्यते इति त्वन्मतसिद्धं मनोऽप्राप्यं शुद्धं ब्रह्मश्रुतिसिद्धमनोगम्यब्रह्मतोऽतिरिच्यते इत्युक्तम्—**त्वन्मते शुद्धब्रह्मणो मनोऽप्राप्यत्वेनेति**। सच्चेन्न बाध्येतेति उपपत्तिप्रदर्शनपूर्वकं अनिर्वचनीयत्वमुपस्थाप्य अर्थाभावं विनिश्चित्येति छायाप्रत्याह्वयाभासेति वचनद्वयेन असन्न प्रतीयतेत्यंशं विदूष्य असत एव प्रतीतत्वाप्रतीतत्वरूपं प्रकारद्वयं प्रमाणीक्रियते-**यदप्याहुः सच्चेदि**त्युपक्रम्य **मानाभावादि**त्यन्तसन्दर्भेण। ननु "त्वय्यद्वितीये" इति भागवतवचने प्रपंचमिथ्यात्वमेव साध्यते इत्याशंक्य भ्रमाऽज्ञानादिशब्दानां संसारविषयकत्वं साधयन्ति—**ननु त्वय्यद्वितीये**त्यारभ्य **स्पष्टमि**त्यन्तम्। भ्रमानादित्वसमयस्यापि खण्डनपरिधिप्रविष्टता प्रदर्श्यते-**अनादिरयं भ्रम इति**। ज्ञानकोटिनिविष्टतया भ्रमोऽपि जन्य इति निरूप्यते **भ्रमत्वस्य ज्ञानत्वव्याप्यत्वादि**त्यनेन। नच "बन्धोस्याऽविद्ययानादिः" इति वाक्यात् भ्रमस्यानादित्वमुच्यते, अस्मिन्नेव

---

1 व्यवहृतिमात्रैकसत्यत्वाभावादिति ख. 2 कारणत्वेत्युपलब्धम्.

भ्रमे अनादित्वकथनमयुक्तमेव । अन्यच्च, ज्ञानबाध्यत्वं मिथ्यात्वमित्याहुः—तन्न; चरमवृत्तिरूपे ज्ञाने ज्ञानबाध्यत्वाभावादव्याप्तेः । चरमवृत्तेः कतकरेणुदृष्टान्तेन स्वत एव नाशाङ्गीकारात् । न चाऽज्ञानजन्यत्वं मिथ्यात्वमिति वाच्यम्; मूलाज्ञानेऽज्ञानजन्यत्वविरहेण लक्षणाव्याप्तेः । मूलाज्ञानस्य भवत्सिद्धान्तेऽनादित्वाङ्गीकारात् । प्रकृतमनुस्रियते । ब्रह्मणो रूपत्रयम् । तत्राऽऽधिदैविकं परं ब्रह्म कृष्णाख्यं प्रथमम् । आध्यात्मिकमक्षरात्मकं द्वितीयम् । आधिभौतिकं प्रपञ्चात्मकं तृतीयम् । तत्र स्पष्टार्थं गङ्गां दृष्टान्तीकुर्वन्ति—**द्विरूपं चाऽपि गङ्गावदित्यादिना । माहात्म्यसंयुतेति** । मर्यादामार्गविधिना सेवतां भोगमोक्षदात्री द्वितीया तीर्थरूपेत्यर्थः ॥ ३ ॥ ॥ ४ ॥ ॥ ५ ॥ ॥ ६ ॥

आधिदैविक्याः स्वरूपमाहुः—

तत्रैव देवतामूर्तिर्भक्त्या या दृश्यते क्वचित् ।
गङ्गायां च विशेषेण प्रवाहाभेदबुद्धये ॥ ७ ॥
प्रत्यक्षा सा न सर्वेषां प्राकाम्यं स्यात्तया जले ।
विहिताच्च फलात्तद्धि प्रतीत्याऽपि विशिष्यते ॥ ८ ॥
यथा जलं तथा सर्वं यथा शक्ता तथा बृहत् ।
यथा देवी तथा कृष्णस्तत्राऽप्येतदिहोच्यते ॥ ९ ॥
जगत्तु त्रिविधं प्रोक्तं ब्रह्मविष्णुशिवास्ततः ।
देवतारूपवत्प्रोक्ता ब्रह्मणीत्थं हरिर्मतः ॥ १० ॥

तत्रैवेति ॥ ७ ॥ ८ ॥ ९ ॥ तृतीये भौतिके रूपे भेदमाहुः—**जगत्त्विति** । त्रिविधं त्रिस्वभावत्वेन प्रकटम् । आधिदैविके अंशभेदानाहुः–ब्रह्मविष्णुशिवाः देवतारूपवत्प्रोक्ता इत्यन्वयः । अत्राऽयमर्थः—देवताया आधिदैविकरूपाया गङ्गाया रूपाणि अंशभूतानि भीष्मजनन्यादीनि मूर्तिमन्ति तत्तत्पुराणादौ प्रोक्तानि तद्वद्देवतारूपस्य कृष्णस्य ब्रह्मविष्णुशिवरूपाणि अंशभूतानीत्यर्थः । तान्येव रूपाणि राजसादिस्वभावप्रकाशकानि जगतो नियामकत्वेनोत्पत्त्यादौ कार्ये व्यापृतानि[1] । तदंशी कृष्णस्तु नित्यनिरवध्यानन्दात्मको गुणातीतो रसात्मकलीलामात्रैककार्य इति भावः । ब्रह्मविष्णुशिवानां कृष्णांशत्वेन आधिदैविक-

---

पद्ये अविद्ययेति अविद्यायाः करणत्वनिर्देशात् अविद्याकरणत्वनिर्देशसमभिव्याहारेण अनादित्वकथनस्यापि संकुचितवृत्तित्वस्य सापेक्षत्वस्य चाभ्युपगमेन वृत्तिसंकोचेनैव अनादिशब्दार्थो निरूप्यः । देववाचकामरशब्दार्थवत् इत्येतत् सर्वंमुक्तं–नच बन्धोऽस्येति प्रस्तुत्य कथनमयुक्तमेवेत्यन्तम् । ज्ञाननिवर्त्यत्वं इति मिथ्यात्वलक्षणमपि अव्याप्तिदोषसहितम् कतकरेणुदृष्टान्तेन वृत्तेः स्वपरविरोधितायाः अभ्युपेततया चरमवृत्तेः ज्ञानबाध्यत्वाभावात् इत्येतदुक्तम् अन्यच्च ज्ञानबाध्यत्वेति । अज्ञानजन्यत्वं मिथ्यात्वमिति लक्षणमप्यव्याप्तम्, मूलाज्ञानस्याऽनादिताऽभ्युपगमेन अज्ञानजन्यत्वासिद्ध्यास्य लक्षणस्याव्याप्तत्वम् एवमनेकदूषणोपनिपातः मायावादे आयातीति अस्मन्मतस्य निरवद्यत्वम् ।

---

१ व्याप्तृतानीति ख.

रूपभेदमध्ये गणना। "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहाऽस्य धत्ते। स्थित्यादये हरिविरञ्चिहरेति संज्ञाः" "न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते' इत्यादिवाक्यात् ब्रह्मवैवर्त्ते स्पष्टमेव त्रयाणां कृष्णांशत्वप्रतिपादनाच्च। अत एव निबन्धे श्रीमदाचार्यचरणैरवादि–"गुणाभिमानिनो ये वै तदंशाः सगुणाः स्मृता" इति। अग्रे च "अन्तर्याम्यक्षरं कृष्ण" इत्यारभ्य "स्वभावकर्मकालाश्चे"त्यनेनाऽक्षरभेदानुक्त्वा "रुद्रो ब्रह्मा हरिस्तथे"ति वाक्येन कृष्णभेदा उक्ताः। तथा च सिद्धमेतत्—"द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत" इत्यत्र क्षराक्षरपुरुषोत्तमा उक्तास्तेऽत्र "परं ब्रह्म तु कृष्णो ही" त्यारभ्य "देवतारूपवत्प्रोक्ता" इत्यन्तेन प्रपञ्चाक्षरकृष्णशब्दवाच्या विवेचिताः। न च गीतासु त्रयाणां पृथगुक्त्या द्वैतं शङ्क्यम्; "वासुदेवः सर्वमि"तीत्यनेन शुद्धाद्वैतस्यैव भगवदभिप्रायविषयत्वस्फुरणात्। ब्रह्मणीति। स्थितानामिति शेषः। यथा जगतो नियामकाः कृष्णांशा ब्रह्मादय इत्थमक्षरब्रह्मभूतानां नियामको हरिरेव, न तु ब्रह्मादयः। तेषां ज्ञानिनां जगदतीतत्वादिति भावः॥ १०॥

अत्र किंचित् प्रास्ताविकं विमृश्यते। प्रतिबिम्बवादिनां षट्पक्षाः सिद्धान्तलेशे प्रतिपादिताः। तत्र अविद्यायां शुद्धब्रह्मप्रतिबिम्बो जीव इति पक्षस्तु प्रकटार्थविवरणे तत्त्वविवेके चोक्तः, तथा संक्षेपशारीरके चोक्तः केषांचिन्मतेऽप्युक्तः। ग्रन्थचतुष्टयेऽपि भिन्नभिन्नप्रक्रिययोक्तः। सिद्धान्तलेशानुसारेण तत्रत्या प्रक्रिया परामृश्यते। तत्र तावत् प्रकटार्थविवरणकृद्भिः अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया तस्यां चित्प्रतिबिम्ब ईश्वरः। तस्या एव परिच्छिन्नानन्तप्रदेशेषु आवरणविक्षेपशक्तिमत्सु अविद्याभिधानेषु चित्प्रतिबिम्बो जीवः। तत्त्वविवेके तु त्रिगुणात्मिकाया मूलप्रकृतेः जीवेशावाभासेन माया करोति चाविद्या च स्वयमेव भवति, इति श्रुतिसिद्धौ रूपभेदौ। रजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना माया, तदभिभूतमलिनसत्त्वा अविद्येति मायाविद्याभेदं परिकल्प्य मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बो जीव इत्युक्तम्। एकैव मूलप्रकृतिः विक्षेपप्राधान्येन मायाशब्दिता ईश्वरोपाधिः, आवरणप्राधान्येनाऽविद्या अज्ञानशब्दिता जीवोपाधिः, अत एव तस्या जीवेश्वरसाधारणचिन्मात्रसम्बन्धित्वेऽपि जीवस्यैव अज्ञोऽस्मीति अज्ञानसम्बन्धानुभवः, नेश्वरस्येति जीवेश्वरविभागः क्वचिदुपपादितः। संक्षेपशारीरके तु 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतिमनुसृत्याऽविद्यायां चित्प्रतिबिम्ब ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीवः। न चान्तःकरणरूपेण द्रव्येण घटेनाकाशस्येव चैतन्यस्यावच्छेदसम्भवात् तदवच्छिन्नमेव चैतन्यं जीवोऽस्त्विति वाच्यम्; इह परत्र च जीवभावेनावच्छेद्यचैतन्यप्रदेशस्य भेदेन कृतहानाऽकृताभ्यागमप्रसङ्गात्। प्रतिबिम्बस्तु उपाधेर्गतागतयोः अवच्छेद्यभेदवन्न भिद्यते इति प्रतिबिम्बपक्षे नायं दोष इत्युक्तम्॥ एवमुक्तेषु एतेषु जीवेश्वरयोः प्रतिबिम्बविशेषत्वपक्षेषु यत् बिम्बस्थानीयं ब्रह्म तत् मुक्तप्राप्यं शुद्धचैतन्यम्। निर्दिष्टपक्षचतुष्टये शुद्धचिदात्मकब्रह्मणः प्रतिबिम्बो निरूपितः। अत्र श्रीलालूभट्टमहानुभावैः पूर्वोक्तपक्ष-

कामचारस्तु लोकेऽस्मिन्ब्रह्मादिभ्यो न चाऽन्यथा ।
परमानन्दरूपे तु कृष्णे स्वात्मनि निश्चयः ॥ ११ ॥

कामचारस्त्विवति । अस्मिन् क्षररूपे लोके प्रपञ्चे कामचारः तत्फलप्रेप्सया प्रवृत्तानां मनोरथप्राप्तिप्रवाहो ब्रह्मादिभ्यः कृष्णांशभूतेभ्यो भवति । दृष्टान्तेऽपि गङ्गांशभूताया एव लौकिकव्यवहारः स्मर्यते भारते शन्तनुप्रसङ्गे न तु साक्षादंशवत्या गङ्गाया आदिदैविक्याः सकाशात् । तस्याः केवलभक्तिलभ्यायाः प्रवाहे सर्वदैव विद्यमानत्वात् । ननु लोके कामचारो ब्रह्मादिभ्य इत्युक्ते भक्तानामपि लोकमध्यपातितया तथैव भविष्यतीत्याशङ्क्य तेषां भिन्नप्रकारमाहुः—**परमानन्दरूपे त्विति** । लोकविशेषणमेतत् । परमानन्दो रूप्यते व्यवह्रियते यत्रेत्यर्थात् । तुशब्दः पूर्वप्रक्रियां व्यावर्त्तयति । परमानन्दरूपे लोके लीलायोग्यप्रपञ्चे तु पुष्टिभक्तानां स्वात्मनि स्वात्मत्वेन स्फुरिते कृष्ण एव निश्चयो मनःस्थैर्यं स्वसकलमनोरथपूरकत्वबुद्धिस्वच्छन्दप्रवृत्तिप्रवाहो न तु ब्रह्मादिभ्यः । "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाऽप्यहम्" "अहं भक्तपराधीनः" "तेषां नित्याभियुक्तानां योग-क्षेमं वहाम्यहम्" तेषामहं समुद्धर्त्ता मृत्युसंसारसागरादि"त्यादिवाक्येषु साधारणेभ्यः पृथक्तया भक्तानां चतुर्विधपुमर्थसाधकत्वस्य स्वस्मिन्नेव भगवताऽङ्गीकृतत्वात् ॥ ११ ॥ एवं साधारणजीवानां पुष्टिस्थानामंशांशिभेदेन कामचारव्यवस्थामुक्त्वा वस्तुतः साधारणानामंशेभ्यो जायमानमपि फलं भगवत एवेति भगवानेव सर्वेषां सर्वफलदायक इति प्रतिपादयन्ति—**अतस्त्वित्यादिना** ।

अतस्तु ब्रह्मवादेन कृष्णे बुद्धिर्विधीयताम् ।
आत्मनि ब्रह्मरूपे तु छिद्रा व्योम्नीव चेतनाः ॥ १२ ॥

वस्तुविमर्शे सर्व[1]स्य कृष्णात्मत्वं तदधीनत्वमतो ब्रह्मवादेन तु कृष्ण एव बुद्धिः फलप्रदत्वबुद्धिर्विधीयताम् । "फलमत उपपत्तेरि" ति न्यायेन कृष्णस्यैव फलदत्वम् । "यो यो यां यां तनुं भक्त" इत्यारभ्य " मयैव विहितान् हि तानि"त्यन्तेन स्वस्यैव फलदातृत्वोक्तेश्च । **आत्मनि ब्रह्मरूपे तु छिद्रा व्योम्नीव चेतना इति** । आत्मनि [2]आत्मविषये । उच्यत इति शेष इति प्रभुचरणाः । तथा च आत्मनीति प्रतिज्ञायां ज्ञेयम् । ब्रह्मरूपे जीवे छिद्राश्चेतना इवेत्यन्वयः । छिद्राणि विषयत्वेन विद्यन्ते यासु चेतनासु ताः छिद्राश्चेतनाः । अर्शआद्यच् । चेतनाशब्दो बुद्धिवाचकः "प्रतिपज्ज्ञप्तिचेतना" इति कोशात् । तथा च छिद्राश्चेतनाश्छिद्रवत्यो बुद्धय इत्यर्थः । बुद्धीनां छिद्रवत्त्वं तु विषयत्वेन छिद्राणां तत्र स्फुरणात् । एवञ्च व्योम्नि अविद्यमानानां छिद्राणां बुद्धिवृत्तिषु स्फुरणाच्छिद्राश्चेतना विपर्यासबुद्धय इति फलितम् । "संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथगि"ति कपिलवाक्याद्विपर्यासस्य बुद्धिवृत्तित्वात् । तत्र दोषविशेषवशात् व्योम्नि

चतुष्टयस्यैव खण्डनं क्रियते, निरासप्रकारस्यैव तथा दर्शनात् । तथा हि—जीवस्य शुद्धचैतन्यप्रतिबिम्बपक्षनिरास एव तैः क्रियते । एतेनायं पूर्वपक्षः अधस्तान्निर्दिष्टशुद्धचित्प्रतिबिम्बवादिनाम् पक्षचतुष्टयसम्बद्धः । पूर्वपक्षनिरूपकवाक्ये अविद्यापदस्य तन्त्रेण कुत्रचित् अविद्या किं वा तत्कार्यान्तःकरणादिवाचकत्वमपि अभिधया—लक्षणया

---

१ सर्वेति नास्ति ख. २ आत्मविशेषे इति क.

छिद्राणि प्रतीयन्ते । अतश्छिद्रवत्यो बुद्धयो व्योम्नि यथा मिथ्याभूतपदार्थावगाहिन्यस्तथा ब्रह्मरूपे छिद्राश्चेतनाः सदोषत्वादिबुद्धयो मिथ्याभूतसंसारावगाहिन्यो न तु यथार्थावगाहिन्यः । "जीवसंसार उच्यत" इति निबन्धे संसारस्य मिथ्याभूतत्वेन सिद्धान्तितत्वात् । "उच्यते न तु जायत" इति व्याख्यानात् । व्योम्नि यथा छिद्राश्चेतनास्तथा जीवे छिद्राश्चेतनाः । पूर्वत्र छिद्रशब्दस्य विवरविशेषवाचकत्वम्, उत्तरत्र तु छिद्रशब्दो दोषवाचकः । "खलः सर्षपमात्राणि परच्छिद्राणि पश्यती" त्यादौ दोषाणां छिद्रपदवाच्यत्वात् । तथा च जीवो ब्रह्मांशत्वेन वस्तुतो ब्रह्मरूप एव, न तु संसारी । संसारित्वं त्वौपाधिकम् । तच्च पूर्वोक्तकृष्णसेवानाश्यमित्यभिप्रायः ।

इदमेवाऽनुपदमुपपाद्यते—उपाधिनाश इत्यादिना ।

उपाधिनाशे विज्ञाने ब्रह्मात्मत्वावबोधने ।
गङ्गातीरस्थितो यद्वद्देवतां तत्र पश्यति ॥ १३ ॥

स्वसिद्धान्ते यादृशं जीवस्वरूपं तद्वन्धमुक्तिस्वरूपञ्च प्रभुचरणैरेतट्टीकायां विवृतमेव—"जीवा ह्यणवोऽक्षरात्मका" इत्यादिनेति न मया लिख्यते । ननु जीवस्याऽणुत्वं निरूपितं तन्माऽस्तु । किन्त्वविद्यायां ब्रह्मप्रतिबिम्बो जीव इत्युररीकार्यम् । पूर्वं बहुभिरादृतत्वादिति चेत्—न; नीरूपस्य ब्रह्मणः प्रतिबिम्बासम्भवात् । न च गुणे गुणानङ्गीकारान्नीरूपस्य रूपस्य प्रतिबिम्बदर्शनाद्रूपरहितस्य ब्रह्मणोऽपि प्रतिबिम्बः सुलभ इति वाच्यम्; रूपवतो घटादेः प्रतिबिम्बिततया तन्निष्ठरूपप्रतीतौ सिद्धायां पृथग्रूपप्रतिबिम्बे मानाभावात् । स्वाश्रयातिरेकेण रूपोपलब्धेः सर्वतन्त्रविरुद्धत्वात् । किञ्च, दर्पणादौ प्रतिबिम्बितं घटनिष्ठरूपं पश्यन् स्वयं प्रतिबिम्बितमिति रूपञ्च नीरूपमिति नीरूपस्य ब्रह्मणोऽपि प्रतिबिम्ब इति मनुषे । तथैव रूपशून्यं रूपं चाक्षुषमिति नीरूपः परमात्माऽपि चक्षुर्ग्राह्य इति मन्यस्व । ननु नीरूपस्य गगनस्य प्रतिबिम्बान्नीरूपस्य ब्रह्मणोऽपि स्यादिति चेत्—न; जलादावौपाधिकस्य प्रतिबिम्बितरूपस्य दर्शनादौपाधिकेन तेन च वियतः संबन्धाभावादाकाशप्रतिबिम्बस्य वक्तुमयो-

---

वा सिद्ध्यति । शुद्धब्रह्मणः प्रतिबिम्बपक्षं खण्डयन्ति—नीरूपस्येति । गुणानां निर्गुणतया नीरूपत्वात् यदि—नीरूपं रूपमपि प्रतिबिम्बते कस्माच्छुद्धं ब्रह्म न प्रतिबिम्बते इत्युच्यते—नच गुणे गुणानङ्गीकारादिति । समाधिं वदन्ति—रूपवतो घटादेरिति । स्वाश्रयातिरेकेण रूपोपलब्धेः सर्वतन्त्रविरुद्धतया रूपवन्निष्ठरूपस्य रूपवत्साहित्येनैव प्रतिबिम्ब इत्याशयेनोक्तं-रूपवतो घटादेरित्यारभ्य सर्वतन्त्रविरुद्धत्वादित्यन्तम् । अनिष्टप्रसञ्जनमेतत्—दर्पणादौ प्रतिबिम्बितमित्यारभ्य इति मन्यस्वेत्यन्तम् । पुनरपि सोदाहरणं स्वपक्षोपोद्बलनमेतत्—ननु नीरूपस्य गगनस्येति । निराक्रियते पूर्वपक्षोक्तिः—जलादावौपाधिकस्येति । पुनरपि अनिष्टं प्रसञ्जयन्ति—अन्यथा नीलमिदं गगनमिति प्रतीत्येति । इष्टापत्तिं वदति वादी—नच कल्पितरूपवत

ग्यत्वात्। अन्यथा 'नीलमिदं गगन'मिति प्रतीत्या गगनचाक्षुषत्वमङ्गीकृत्य ब्रह्मचाक्षुषत्वमङ्गीकार्यं स्यात् । न च कल्पितरूपवतो जगज्जन्मादिकारणस्य भवत्येव चाक्षुषत्वमिति वाच्यम् ; सोपाधिके ब्रह्मणि भवन्मते मायिकरूपाङ्गीकाराच्चाक्षुषत्वप्रतिबिम्बितत्वयोः सुवचत्वेऽपि शुद्धे नीरूपे ब्रह्मणि द्वयोरप्यसम्भवेन विवक्षितप्रमेयालाभात् । अपि च, चक्षुर्ग्रहणयोग्यस्यैव प्रतिबिम्बसम्भवं जानन्नप्ययोग्यस्य शुद्धस्य प्रतिबिम्बं प्रतिपादयन्नयोग्यस्य चाक्षुषत्वं किमिति न मनुषे ? । अन्यच्च, अवयवेऽवयवानङ्गीकाराच्चरणरहितयोरपि चरणयोर्गमनदर्शनाच्चरणरहितस्याऽपि कस्यचिद्देवदत्तादेर्गमनसम्भवः स्यात्, स चाऽखिलप्रमाणविरुद्ध इति चरणविशिष्ट एव पुंसि गतिरङ्गीकार्या । एवं नेत्रादावपि । तथैव रूपविशिष्ट एव प्रतिबिम्बते न तु रूपं पृथक्तयेति न रूपशून्यस्य प्रतिबिम्ब इत्यविद्यायां ब्रह्मप्रतिबिम्बो जीव इति नाऽऽदर्त्तव्यं सुधीभिः । ननु जपाकुसुमारुणगुणो द्रव्यं विहायैव स्फटिके प्रतिस्फुरति, अन्यथा दर्पणादौ मुखान्तरप्रतीतिवत् स्फटिके जपाकुसुमान्तरप्रतीतिः स्यात् , सा तु नास्ति; किन्तु केवलमरुणिमैव प्रतीयते । तत्र च नीरूपत्वमेव, गुणे गुणानङ्गीकारात् । अतो नीरूपस्याऽप्यरुणस्य प्रतिबिम्बदर्शनान्नीरूपस्य ब्रह्मणोऽपि प्रतिबिम्ब उपपन्न इति प्राप्ते समाधिरुच्यते । रूपमात्रस्याऽपि प्रतिबिम्बे रूपवतो जपाकुसुमादेः कारणत्वमन्वयव्यतिरेकसिद्धम् ; रूपवज्जपाकुसुमादि विना रूपप्रतिबिम्बाभावात् । एवं सर्वत्र ज्ञेयम् । न हि रूपवन्तं विना रूपमात्रप्रतिबिम्बो लभ्यते कुत्राऽपि, तथा च प्रतिबिम्बत्वावच्छिन्ने रूपवद्वस्तुनः कारणत्वाद्ब्रह्मणः प्रतिबिम्बो नोपपद्यते । अत एवाऽऽचार्यवर्यैर्निबन्ध उक्तम्—"न प्रतिस्फुरणं रूपरहितस्य कदाचने"ति । अत एव न वायोः प्रतिबिम्बः । एवं सति रूपवान् घटादिर्दर्पणादौ धर्मिरूपेण प्रतिबिम्बते । रूपवान् जपाकुसुमादिः स्फटिके धर्मरूपेणाऽरुणगुणेन प्रतिस्फुरति । एवमुभयथा रूपवत एव प्रतिबिम्बसम्भवान्नीरूपस्य ब्रह्मणः प्रतिबिम्बो न युक्तिसह इति सुधियो विदन्तु । अत एव प्रतिबिम्बत्वावच्छिन्ने रूपवतः कारणतामवगत्य विद्वन्मण्डन उक्तम्—"रूपवत

इति । 'आम्नान् पृष्टे' इतिवच्चोद्यमेतदित्युक्तं—**सोपाधिके ब्रह्मणीति** । नीरूपस्येति चोद्यं विभिन्नोदाहरणेन दूषयन्ति—**अवयवेऽवयवानङ्गीकारादिति** । द्रव्यत्यागेऽपि गुणस्थितिः दृश्यते इति जपाकुसुमारुणगुणमात्रप्रतिबिम्बदृष्टान्तेनोक्त्वा स्वाश्रयातिरेकेण रूपोपलब्धिं प्रसाध्य नीरूपरूपवत् नीरूपं-ब्रह्मापि प्रतिबिम्बते इत्युच्यते—**ननु जपाकुसुमारुणगुणो द्रव्यं इत्यारभ्य प्रतिबिम्ब उपपन्न इति प्राप्तेत्यन्तम्** । एवं रूपप्रतिबिम्बेऽपि ऋते रूपवन्तं रूपप्रतिबिम्बादर्शनाद्रूपवत एव रूपप्रतिबिम्बे कारणत्वमन्वयव्यतिरेकसिद्धमिति समाधानं निरूपयन्ति—**रूपमात्रस्यापि प्रतिबिम्बे इत्यारभ्य न वायोः प्रतिबिम्बेत्यन्तम्** । एवम् प्रतिबिम्बो रूपवत एवेति उभयथा निरूप्य धर्मधर्मिप्रतिबिम्बवैलक्षण्यमुपपाद्य नीरूपब्रह्मप्रतिबिम्बासम्भवोपपादनम्—**एवं सति रूपवान् घटादिरित्यारभ्य सुधियो विदन्तु इत्यन्तम्**। उक्तं सिद्धान्तं विद्वन्मण्डनोक्त्यापि परिपोषयन्ति—**अत एव प्रतिबिम्बत्वावच्छिन्नेति** ॥

एव प्रतिबिम्बनियमादि" ति । **उपाधिनाश इति** । भगवज्जीवयोरन्तरायभूताऽविद्या तस्याः कार्यस्य नाशे सति । "अन्यद्युष्माकमन्तरं भवती" ति श्रुतेर्ज्ञानं प्रत्यविद्यानाशस्य प्रतिबन्धकाभावत्वेन कारणतयाऽवश्यमपेक्षणात् । **विज्ञान इति** । ब्रह्मणो विशेषतः सर्वात्मकत्वेन सर्वातिरिक्तरूपत्वेन च ज्ञाने सति । **ब्रह्मात्मत्वावबोधन इति** । ब्रह्मज्ञानानन्तरं जडजीवयोस्तदात्मकतया स्वस्याऽपि ब्रह्मात्मत्वेनाऽवबोधे सति वक्ष्यमाणं फलं भवति । सिद्धान्ते हि ब्रह्मज्ञानं पुमर्थाय । "यस्मिन् विदिते सर्वमिदं विदितं भवती"-ति श्रुतेः । न त्वेकदेशभूतं पराभिमतं जीवमात्रे ब्रह्मत्वेन ज्ञानम् । एवं सत्यविद्यानाशे ब्रह्मस्वरूपज्ञानं तस्मिन् सति सर्वस्याऽपि पदार्थजातस्य बोधस्तेन स्वस्याऽपि सर्वमध्यपातितया निर्विकाराक्षरत्वेनाऽपरोक्षस्फूर्तिस्ततो "ब्रह्म वेद ब्रह्मैव भवती" ति श्रुतेरक्षरात्मकतायां सिद्धायां "तद्धाम परमं मम" "विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मन" इत्यादिवाक्यैरक्षरस्य भगवदधिष्ठानत्वात्तत्र स्थितमक्षरातीतं पुरुषोत्तमं कृष्णं ज्ञानी भक्तः पश्यति ।

तथा कृष्णं परं ब्रह्म स्वस्मिञ्ज्ञानी प्रपश्यति ।
संसारी यस्तु भजते स दूरस्थो यथा तथा ॥ १४ ॥

तदाहुः—**तथा कृष्णं परं ब्रह्मेत्यादि** । तत्र दृष्टान्तः—**गङ्गातीरस्थित इति** । यथा प्रवाहसन्निधौ वर्तमानस्तन्मध्यवर्त्तिनीं मूर्त्तिमतीं गङ्गां श्रद्धाधिक्ये पश्यति, तथा ज्ञानी भक्तोऽपि भगवदधिष्ठानत्वेन निकटस्थायिन्यक्षरात्मके स्वस्वरूपे भक्त्या कृष्णं पश्यतीति भावः । अत एव भगवता "चतुर्विधा भजन्ते मामि' ति सन्दर्भे ज्ञानी भक्तः प्रशंसितः । निबन्धेऽपि "ज्ञानी चेद्भजते कृष्णं तस्मान्नाऽस्त्यधिकः पर" इत्युक्तम् । ननु भक्त्या केवलयैव सर्वपुरुषार्थसिद्धौ किमर्थं ज्ञानाग्रह इत्याशङ्क्य प्रेमवतस्तदनपेक्षत्वेऽप्यनुत्पन्नस्नेहस्य भजनाङ्गत्वेनाऽस्त्येव ज्ञानापेक्षेति तद्रहितस्य

इति श्रीवल्लभाचार्यचरणश्रीमत्प्रभुचरणदासदासेन विद्वन्मूर्धन्यश्रीगोकुलनाथाचार्यात्मजेन मूर्तिमद्दयास्वरूपश्रीकुसुमप्रभागर्भसम्भवेन गोस्वामिदीक्षितेविरचिता लालूभट्टविरचितसिद्धान्तमुक्तावलीटीकाया विषमस्थलटिप्पणी समाप्ता ।

प्रभुः श्रीबालकृष्णः प्रसन्नोऽस्तु ।

श्रीवल्लभाधीशप्रसादोऽस्तु ।

श्रीप्रभुचरणप्रसादोऽस्तु ।

पुत्रतुल्य-पूर्णस्नेहास्पदसर्वसद्गुणशालिचिगोस्वामिश्रीरघुनाथलालकृते एतेषां अध्ययनसमय एव एषा टीका व्यरचि ।

सकलान्तरात्मा श्रीहरिः—

प्रसन्नोऽस्तु ।

दोषमाहुः—संसारीति। अनिवृत्ताहन्ताममताकोऽनुत्पन्नबोध इति यावत्। स तु कृष्णं भजन् दिदृक्षाया आधिक्यादविद्ययाऽन्तरायभूतया दर्शनाभावाद्दुःखभाग्भवति। अत्र दृष्टान्तः—दूरस्थ इति। यथा गङ्गाभक्तः स्नानपानाद्यर्थं तज्जलमभिलषन्नादिशब्देनाऽऽधिदैविकीं दिदृक्षन् दर्शनाभावात् प्रवाहरूपगङ्गाविप्रकर्षेणाऽऽधिदैविकीविप्रकर्षादुभयमलभमानो दुःखी भवति तद्वदित्यर्थः। सिद्धमुपदिशन्ति—

> अपेक्षितजलादीनामभावात्तत्र दुःखभाक्।
> तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः॥ १५॥
> आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत्।
> लोकार्थी चेद्भजेत्कृष्णं क्लिष्टो भवति सर्वथा॥ १६॥
> क्लिष्टोऽपि चेद्भजेत्कृष्णं लोको नश्यति सर्वथा।
> ज्ञानाभावे पुष्टिमार्गी तिष्ठेत्पूजोत्सवादिषु॥ १७॥
> मर्यादास्थस्तु गङ्गायां श्रीभागवततत्परः।
> अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिः॥ १८॥

तस्मादिति। श्रीकृष्णमार्गस्थ इति। भक्तिमार्गस्थ इत्यर्थः। सर्वलोकतः संसारतः विमुक्तो भूत्वा शुद्धपुष्टिमार्गीयव्रजसुन्दरीवृन्दविहारिणं कृष्णमेव निरवध्यानन्दं विशेषेण चिन्तयेत् मानसीसिद्ध्यर्थं लीलाविशिष्टभावनं कुर्यादिति भावः। अयमेवाऽर्थः श्रीमत्प्रभुचरणैष्टीकायां विवृतः—कृष्णपदादित्यारभ्याऽऽत्मपदं भगवत्परमित्यन्तेन। ननु ज्ञानरहितो भक्तो भगवद्दर्शनावरोधकसंसारस्य विद्यमानत्वाद्दुःखी भवतीत्युक्तम्। तथा सति केवलज्ञानवत् तादृग्भक्तेरप्यप्रयोजकत्वमित्याशङ्क्य पूर्वोक्तमनूद्य केवलभजनेनाऽपि निर्वाहमाहुः—लोकार्थीति। लोकार्थी पशुपुत्रादिविषयकाङ्क्षावान्, अनुत्पन्नज्ञानः संसारीति यावत्। भजनं कुर्वन् पूर्वोक्तप्रकारेण दिदृक्षाधिक्याद्दर्शनाभावात्क्लिष्टो भवति। तादृगपि आग्रहं कृत्वा भजनं चेन्न त्यजति तदा भगवत्कृपया लोकः संसारोऽहन्ताममतात्मको भगवत्साक्षात्कारप्रतिबन्धकर्त्ता नश्यतीत्यर्थः। अत्र प्रपञ्चवाचिना लोकशब्देन तदन्तःस्थितः संसारो लक्ष्यते। नाशस्योक्तत्वादर्थस्वारस्याच्च लक्ष्यार्थ एव ग्राह्यः। एवं केवलया भक्त्या भगवद्भजनं निर्वहतीत्युक्तम्। तत्कथमित्याकाङ्क्षायां प्रमेयबलेन तद्भवतीति वदन्ति—अनुग्रह इति। पुष्टिमार्गस्याऽनुग्रहैकनियम्यत्वात्प्रमाणविरुद्धमपि प्रमेयबलेन भवेत्। "नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया। प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात्" इत्यादिवाक्येभ्य इति भावः। पुष्टिमार्ग इति। पुष्टिजन्ये भक्तिमार्ग इत्यर्थः। पुष्टिश्च "पोषणं तदनुग्रह" इति वाक्यादनुग्रहरूपो भगवद्धर्मः। स च लौकिकालौकिकोत्तमफलसाधकः। विशेषानुग्रहस्तु विरलजनविषयो भगवद्रूपात्मकफलसाधकः। तज्जन्यत्वं पुष्टिभक्तौ। अत्र पुष्टिशब्देन पुष्टिविशेषो ग्राह्यः, न तु साधारणानुग्रहः। तस्य लौकिकफलं प्रति कारणत्वात्। अत एव पुष्टिस्कन्धे साधारणेनैव कृष्णानुग्रहेणेन्द्रादीनां दैत्यानां च तादृग्भक्तिरहितानामपि

स्वाभिलषितलौकिकफलसिद्धिः । तथोक्तं निबन्धे—"एवमिन्द्रे महापुष्टिः सर्वबाधा[1] निरूपिता । सर्वबाधकरूपा हि दैत्ये पुष्टिरथोच्यते" इति । इन्द्रे महापुष्टिरित्यत्राऽनुग्रहे महत्त्वं तु बलवत्प्रतिबन्धनिवृत्त्या मनोरथपूरकत्वं, न तु भक्तितत्सम्बन्धिसाधकत्वम्; लौकिकफलस्यैव दृश्यमानत्वात् । अतः साधारणानुग्रहो लौकिकफलसाधकः । विशेषानुग्रहस्तादृग्भक्तिहेतुरिति निष्कर्षः । सा च नवमस्कन्धसूर्यसोमवंशीयवृत्तान्तकथनेन प्रपञ्चिता मर्यादापुष्टिभेदेनेशानुकथाशब्देन व्यवह्रियते । ईशस्य अनुगामिनां भक्तानां कथा भक्तिरित्यर्थः । पुष्टिजन्या भक्तिः पुष्टिभक्तिः । अत एवोक्तं श्रीमत्प्रभुचरणैः—"तदनुग्रहैकलभ्यां भक्तिं च नुम" इति भक्तिहेतुनिर्णये । एवं सति भगवत्स्वरूपातिरिक्तफलाकाङ्क्षारहिता भक्तिः पुष्टिभक्तिरिति पुष्टिभक्तेर्लक्षणं ज्ञेयम् । न च निष्काममर्यादाभक्तावतिव्याप्तिः; अत्र मोक्षात्मकफलस्याऽऽकाङ्क्षितत्वात् न च मोक्षः स्वरूपात्मक एवेति वाच्यम्; "न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे" इति वृत्रवाक्ये स्वरूपातिरेककथनात् । अत एव पुष्टिमार्गीया नैनं कामयन्ते । एतच्च "अक्षण्वतामि"ति श्लोकविवृतौ, "वीक्ष्यालकावृतमुखमि"त्यस्य सुबोधिन्यां स्पष्टम् । अत एव मोक्षकामनाऽपि काममध्ये[3] विमृष्टा[4] ।

उभयोस्तु क्रमेणैव पूर्वोक्तैव फलिष्यति ।
ज्ञानाधिको भक्तिमार्ग एवं तस्मान्निरूपितः ॥ १९ ॥
भक्त्यभावे तु तीरस्थो यथा दुष्टैः स्वकर्मभिः ।
अन्यथाभावमापन्नस्तस्मात्स्थानाच्च नश्यति ॥ २० ॥
एवं स्वशास्त्रसर्वस्वं मया गुप्तं निरूपितम् ।
एतद्बुद्ध्वा विमुच्येत पुरुषः सर्वसंशयात् ॥ २१ ॥

इति श्रीवल्लभाचार्यविरचिता सिद्धान्तमुक्तावली समाप्ता ॥

तथोक्तं निबन्धे—"तत्समुद्राधारणं काम्यम्"। "हरिसालोक्यकाम्ययेति वाक्यादि"ति । अतः स्वरूपातिरिक्तफलाकाङ्क्षारहिताः पुष्टिभक्ता एवेति सुधीभिर्विभावनीयम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ ॥ १९ ॥ २० ॥ २१ ॥

(यदुक्तं श्रीमदाचार्यैर्विवृतं विट्ठलेश्वरैः)
कृतं तदनुसार्यैतद्बालकृष्णाङ्घ्रिसेविना ॥ १ ॥
यदत्र बुद्धिदोषेण चेष्टितं बालचापलम् ।
क्षम्यतां श्रीमदाचार्यचरणैः कृपया मयि ॥ २ ॥

---

[1] सर्वाबाधेत्युभयत्र । भाति त्वेवम् । [2] अत्रापि पूर्ववत् । [3] काम्यमध्य इति ख.

[4] विसृष्टा इति ख.

श्रुतिसिद्धरसात्मत्वकृष्णप्रेमप्रकाशकाः ।
दासे मयि प्रसीदन्तु प्रभवो विट्ठलेश्वराः ॥ ३ ॥
कालिन्दीपुलिने शरच्छशिकरैः शुभ्रीकृते मल्लिका
कुन्दामोदमदोन्मदालिनिनदे घोषाङ्गनाभूषिते ।
रासे राधिकया समं विहरतो मोदैर्मुहुर्नृत्यतः
श्रीगोवर्द्धनधारिणो भगवतः सेवेय पादद्वयम् ॥ ४ ॥
यश्चिन्त्यो ब्रह्मरुद्राद्यैर्बल्लवीजनचिन्तकः ।
अस्मत्कुलपतिः श्रीमद्बालकृष्णः प्रसीदतु ॥ ५ ॥

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविट्ठलेश्वरचरणानुचरसेवकेन लाल्लुभट्टोपनामविदितबालकृष्णेन विरचिता सिद्धान्तमुक्तावलीयोजना सम्पूर्णा ॥

शुद्धिपत्रकम्

(अधस्तनीयोंऽशः (पृ. ३८ पं. २१) इत्यत्र मुद्रितः 'सागरघोषतुल्यैव।' (पृ. ३८ पं. ५) इत्यस्याग्रे पठनीयः)

यदपि बोधिचर्यावतारे यदि नाम किंचिन्नास्तीति मनसिकाराभ्यासाद् भवति शून्यता वासनाया प्रहाणं, तथापि तदभ्यासात्पुनरभावकल्पना प्रवर्तमाना निवर्तयितुमशक्या, ततश्च गण्डप्रवेशे अक्षितारानिर्गमो जात इति तदवस्थम् तव दौष्ट्यं इत्याशंक्य यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते इति उत्तरितम्, व्यक्ततया तत्र व्याहतार्थभाषित्वं दृश्यते। यदा निराश्रयो अभावः न तिष्ठति कथं तर्हि निराश्रया शून्यता तिष्ठति। निरालम्बनत्वस्य उभयत्रापि तुल्यत्वात्। किंच अभावस्य निरालम्बनस्थितिकत्वस्वभावेन एतत्दूषणस्य अनवसरपराहतत्वमेव। नहि अभावस्य सत्ताकाले प्रतियोगिसत्ता केनापि बुद्धिमता वक्तुम् पार्यते, प्रतियोगिसत्वे तु अभावस्यैव अशक्यत्वात्॥ किंच तस्य सम्बन्धिनो अभावात् इति पंक्त्या स्वयमेव अभावस्य निरालम्बनस्थितिकत्वाभ्युपगमात्। नच यो भावो नास्तीति प्रकल्प्यते यस्य भावस्य प्रतिषेधः क्रियते स यदि विचार्यमाणो निःस्वभावतया न लभ्यते तैमिरिकोपलब्धकेशस्तबकवत्, तदा निराश्रय इति पंक्त्या यस्य भावस्य प्रतिषेधः तस्यैव निःस्वभावत्वप्रदर्शनेन निरालम्बनस्य निषेधस्य असम्भवग्रस्तत्वं प्रदर्शितमिति वाच्यम्, एवमपि ध्वंसस्यैव निषेधः स्यात्। नतु अत्यन्ताभावस्य अत्यन्ताभावाव्यतिरिक्तत्वात् शून्यतायाः। अन्यथा शून्यताया अपि निषेधे निरस्ता शून्यवादाशापि॥ ननु 'न सन्नासत् न सदसत् न चाप्यनुभयात्मकम्' इति पद्येन शून्यताया असद्विलक्षणत्वप्रदर्शनेन अत्यन्ताभावस्य असत्कोटिनिविष्टत्वेन च नोक्तदोषाणां प्रसर इति चेत्, एतत्कथनस्यापि अभ्युपगममात्रैकशरणत्वात् विद्वदुपेक्ष्यत्वमेव। तथा हि चतुष्कोटिविनिर्मुक्तस्य तत्त्वस्य कोटिद्वयविनिर्मुक्तस्य तत्त्वस्य च बौद्धगृह अद्वैतिगृह एव सुप्रथितत्वं तु अनुक्तसिद्धम्। लोके तु सदसद्रूपपदार्थद्वयस्यैव प्रसिद्धिः। असत् शून्यं तुच्छम् असत्यम् अनृतम् मिथ्या मृषेत्यादिशब्दानां पर्यायत्वमेव कोषादिषु प्रसिद्धम् इति पूर्वोक्तदोषाणां स्थिरत्वमेव। असत एव प्रकारद्वयाऽभ्युपगमेन खपुष्पवन्ध्यापुत्रादीनां अप्रतीतिः मरुमरीचिकादीनाम् प्रतीतिरिति सर्वमनवद्यम्। तस्मात् 'यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते। तदा निराश्रयोऽभावः कथं तिष्ठेन्मतेः पुरः। यदा न भावो नाऽभावो मतेः सन्तिष्ठते पुरः। तदान्यगत्यभावेन निरालम्बा प्रशाम्यति' इत्यादीनि वचनानि असम्बद्धवादबहुलानीति सिद्धम्। ननु सर्वमेतदसाधीयः, न च शून्यता भावात् व्यतिरिक्ताभावस्यैव तत्स्वभावत्वात् अन्यथा शून्यताया भावात् व्यतिरेके धर्माणां निःस्वभावता न स्यात् इति ग्रन्थभागेन शून्यताया भावस्वरूपत्वस्यैवाऽभ्युपगमात्, कथं वा अत्यन्ताभावाव्यतिरिक्तत्वं शून्यताया–इति चेत्, त्वन्मते तु पदार्थानाम् संवृतिसत्वाङ्गीकारेण संवृत्या भावरूपताया अभाव एव पर्यवसितत्वेन त्वन्मतेऽपि परमार्थतः अभावस्यैवाङ्गीकारेण व्यावहारिकपदार्थे भाव इति शब्दप्रयोगोऽपि असम्बद्धवादपोषकः; किंवा, वञ्चनार्थ उपन्यासो लालावक्त्रासवादिवत्–इति श्रीकुमारिलोक्त्यनुसारेण वञ्चनार्थ एव॥

अनित्ये जननं, नित्ये परिच्छिन्ने समागमः ।
नित्यापरिच्छिन्नतनो भास्करं येत्यहति सा मिथ्या ॥

तृणादेर्भासिकाप्येवा सूर्यदीप्तिः तृणं दहेत् ।
सूर्यकान्तमुपारुह्य तन्न्यायं चिति योजयेत् ॥

अज्ञान नाशक चैतन्य अज्ञाननाशक कैसे बनता है ।
अर्थात् ... वृत्ति वृत्त्यवच्छिन्न चैतन्य अज्ञाननाशक है, सर्व चैतन्य (आवरणकारक) नहीं बनता है ।

न चान्तःकरणवृत्तावपि ब्रह्मणः अस्य साक्षात्कारे सोपाधिकं निर्विषयकं, तस्यैव तु तदुपाधेः निरुपप्लवस्य स्वरूपविरोधिनो विद्यमानत्वात् । भामती पृ. ५७

अर्थात् ... वृत्तिव्याप्य ब्रह्म उपहित ब्रह्म है अतः वह मिथ्या है यह मानते हैं भामतीकार । इससे अनुमान होता है तो बच गया पर मोक्ष नहीं बना — प्रपंच का भ्रम तो दूर हुआ पर दूसरा भ्रम (उपहित ब्रह्मानन्द) आ गया। मोक्ष तो वस्तुतः पूर्णब्रह्मनिवृत्ति होगा । भामती पृ. ४५.

अवच्छेदन्याय
दूर है पर बलवान् । अर्थात् निर्गुण को पर, सगुण को पूर्व मानते हैं ।

अध्वर्युं प्रस्तोता संततुयात् । प्रस्तोतारं उद्गाता । प्रतिहर्ता उद्गातारं ब्रह्मा । ब्रह्माणं यजमानः । यजमानं प्रतिहर्ता ।
(यजु. सं.)

प्रशास्ता | प्रतिहर्तारं प्रशास्ता
ज्योतिष्टोम की श्रुति

यदि प्रस्तोता के अध्वर्यु की लांग छूट जाती है तो प्रस्तोता का अवच्छेद (प्रस्तोत्रपच्छेद) होता है । उद्गाता से प्रस्तोता की लांग छूट जाए तो उद्गातृपच्छेद होता है — इसी तरह से आगे भी । यदि अकेले का अवच्छेद हो तो कोई झगड़ा नहीं पर यदि दो अवच्छेद हों तो झगड़ा आता है प्रतिहर्त्रपच्छेद और उद्गात्रपच्छेद में। क्योंकि दोनों के प्रायश्चित्त विरोधी हैं । और दुगपदपच्छेद हो तो विकल्प है — अर्थात् दोनों में अन्यतर आचार करे । पर यदि एक क्रम का भी पौर्वापर्य हो तो झगड़ा — दूर्व कहते हैं तो पूर्व को बाधित कर पर प्रायश्चित्त लेवे । यदि उद्गाता को पहले छूटा तो प्रतिहर्ता (पर) वाला प्रायश्चित्त करेगा (यदि प्रतिहर्ता का पहले छूटा तो उद्गाता (पर) वाला प्रायश्चित्त करेगा)

अद्वैतियों के हिसाब से निर्गुणवाक्य परत्वात् प्रबल हैं सगुणवाक्य पूर्वत्व बाधित हैं अवच्छेदन्यायेन । रामानुजाचार्य के अनुसार अवच्छेदन्याय का अवसर नहीं है क्योंकि अवच्छेदन्याय अनियत विरोध और अनियत पौर्वापर्य के स्थल में लगता है। यहाँ नियत विरोध और नियत पौर्वापर्य के उपक्रम-न्याय लगता है ।

ध्रुवत्वहेतोः चरमवृत्ति ब्रह्म (विराज) (मायाग्नी)

निर्गतमनुप-
पत्ति

बोधस्यानन्दरूपस्य वेद्यं किन्तु तत् विशदे ब्रह्म, मायान्विते वा
किं वा भेदप्रपञ्चः किन्तु तदन्तर्गता किन्तु वेद्यं न किंचित् ।
आद्ये स्यात् ब्रह्मरूपं तदुपरि युगले मोहसत्ता ऽ
थ तुर्ये सत्ते द्वैते सती सा स्वविहितिमहता पंचमे स्यान्नचापि
।
मिथ्यात्वस्य मिथ्यात्वे मिथ्यात्वे वाधितं भवेत्
~~सत्त्व~~ सत्यत्वस्य सत्यत्वे सत्यत्वे साधिते ।।

1913